CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

श्रीश्रीरामकृष्णकथामृतम्

प्रथमो भागः

रामकृष्ण-मिशन-कलिकाता-विद्यार्थि-आश्रमः
बेलघरिया

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीश्रीरामकृष्णकथामृतम्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीश्रीरामकृष्णकथामृतम्

('श्रीम'-संग्रथितम्)

प्रथमो भागः

(१८८२–खृष्टाब्दीयः)

"तव कथामृतं तप्तजीवनं कविभिरीड़ितं कल्मषापहम् ।
श्रवणमङ्गलं श्रीमदाततं भुवि गृणन्ति ये भूरिदा जनाः ॥"

श्रीमद्भागवतम्, १०।३१।९

Bharatiya Vidya Bhavan's Sri Sankaracharya Sanskrit Mahavidyalaya
540

रामकृष्ण-मिशन-कलिकाता-विद्यार्थि-आश्रमः
बेलघरिया, कलिकाता ७०० ०५६

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गीतिसूचिका

(वर्णानुक्रमिका)

गीतयः			पृष्ठाङ्काः
अद्यत्वे किमु नाम	..	..	९८
अभिनवमिह कञ्चिद्	..	..	२५
अमुना किल दुःखरंहसा	..	..	८६
अश्नन् सुखं संविहरं-	..	..	८९
आनन्ददीप्तवदनः परमेशनाम	..	..	६६
आह्वय मानस समुचितभावैः	..	..	८
उदेति भावः परिभावनाभिः	..	..	५०
एकाकिना मम तु मानस	..	..	११६
एहि रे मम मानस	..	..	८९
कालीनाम वदन् निमज्ज	..	..	७०
काली सा किंस्वरूपा	..	..	२४
किमिह हृदय तं भोः	..	..	४९
कृष्णरुचिमयी किमु मे जननी	..	..	८५
गयागङ्गाप्रभासादीन्	..	..	१००
चिदाकाशे प्रेमद्युतिधवलितः	..	..	६८
चिदानन्दरसे पूर्णे	..	..	१८
चिन्तय मम मानस हरिं	..	..	१७
दुर्गा दुर्गेति मन्त्रं	..	..	१५, १०१
दुर्गां दुर्गां मम तु जपतो	..	..	४८
नित्यं राजति चित्तमन्दिरगतं	..	..	६५
निनदति पुरतो विपिने	..	..	९०
भवसागर-सङ्गत-तनुतरणीयं	..	..	१११
मद्यं नैव पिबामि रे	..	..	३४
मम फलविरहः किं	..	..	२०
मम हृदयपिञ्जर	..	..	११८
महामायामाया जयति	..	..	१११

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

युगान्तरं भोः परमेण योगिना	..	..	११४
रूपपयोनिधिमध्यविलासं	..	..	१०७
वाचं वक्तुमितो बिभेमि	..	..	३५
श्रीश्यामाजननी भवार्णवतटे	..	..	८५
सुरधुनीतट हरिनाम वदन्	..	..	३१
हृदय सरसिजान्तर्ध्यायतां	..	..	१८
हृदि वृन्दावने यदि	..	..	११८

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

RAMAKRISHNA MATH

P. O. Belur Math, Dt.— Howrah

(Phone— 66-2391)

FOREWORD

The life-story of Sri Ramakrishna is unique in the religious history of the world. He was a spiritual luminary of an exalted type. His talks with his devotees were recorded by one of them, Sri Mahendra Nath Gupta or 'M', the pseudonym adopted by him. These conversations were originally published in book form in Bengali under the title, **"Sri Sri Ramakrishna Kathamrita"**. This book has become today a world religious classic. In it we have a most dependable record of the words of a great spiritual Master of mankind. It has been translated into various languages and is sure to be translated into many more for the simple reason that in it one finds the quintessence of religion put in the language of today perfectly understandable by modern man. The popularity of the book among seekers of Truth of various countries across religious and racial barriers proves that contrary to common assumption, the message of true religion has a tremendous appeal even today all over the world.

The Ramakrishna Mission Calcutta Students' Home is bringing out a Sanskrit version of this great work. It is hoped that the Sanskrit version would enrich the Sanskrit religious literature by an inflow of a mighty and authentic spiritual experience and also help to promote the study of Sanskrit in our country.

May this noble venture meet with due success.

Swami Viswananda

President

15, 11. 76

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

*रामकृष्ण-मठः

पोः अः—बेलुड़मठः, जिला—हाओड़ा
(दूरभाषः—६६-२३९१)

मुखबन्धः

अनन्यं खलु श्रीरामकृष्णस्य चरितं विश्वधर्मेतिहासे। आसीदेष मूघन्य-भूत आध्यात्मिकज्योतिष्कः। स्वभक्तजनैः सार्धं तत्कथालापाः तेषामन्यतमेन 'श्रीम'-इति छद्मनामधारिणा श्रीमहेन्द्रनाथगुप्तमहोदयेन अभिलिखिताः। इमे कथालापाः "श्रीश्रीरामकृष्णकथामृतम्" इति शिरोनाम्ना आदौ वङ्ग-भाषायां ग्रन्थाकारेण प्रकाशतां नीताः। ग्रन्थोऽयम् अधुना विश्वधर्ममहा-ग्रन्थत्वमापन्नः। समुपलभ्यते अस्माभिरेतस्मिन् मानवानां कस्यचित् महतो धर्मगुरोर्वचसाम् अतिप्रामाणिकसङ्कलनम्। विभिन्नाभिः भाषाभिः अनूदितोऽयं नूनमन्याभिरपि बहुविधभाषाभिः अनूदितो भवेत्, तत्र सरलनिदानम् एतदेव यदस्मिन् ग्रन्थे धर्मस्य सारभूतं तत्त्वं साम्प्रतिकजनानां सम्पूर्णावगतियोग्यया इदानीन्तन-गिरा ग्रथितम्। नानादेशधर्मजातिव्यवहितेष्वपि सत्यानुसन्धित्सुषु ग्रन्थस्यास्य लोकप्रियत्वं प्रचलितधारणां प्रतीपयत् एतदेव प्रमाणयति यद् यथार्थधर्मसन्देशस्य अद्यापि निखिलभूमण्डले सुमहद् हृदयग्राहकत्वमस्त्येव।

श्रीरामकृष्ण-मिशन-कलिकाता-विद्यार्थि-आश्रमोऽस्या महत्याः कृतेः संस्कृतानुवादं प्रकाशयन्नास्ते। अनुवादोऽयं परमशक्तिमति प्रमाणभूते चाध्यात्मिकानुभूतिप्रवाहे अनुप्रवेशेन धर्मीय-संस्कृतसाहित्यस्य समृद्धिं विधास्यन् अस्मद्देशे संस्कृतभाषाध्ययनप्रसारे सहायको भवेदिति आशास्महे।

गम्यात् सुसिद्धिं महोद्यमोऽयम्।

१५. ११. ७६. स्वामी वीरेश्वरानन्दः
मठाध्यक्षः

---

*अनूदितं सुरगिरा

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रकाशकस्य निवेदनम्

इह खलु विदितमेवैतद् यत् श्रीभगवतां युगावताराणां श्रीश्रीरामकृष्णपरमहंसदेवानां साधनकर्मसु परिसमाप्तिं गतेष्वेव मधुलुब्धैर्भ्रमरैरिव धर्मरसपिपासुभिर्भक्तजनैः प्रफुल्लज्ञानराजीवायमानानां परमहंसदेवानामभ्याशे समारब्धमागमनमिति। समागतानाञ्च तेषां भक्तपुरुषाणां मध्ये विशेषतो ययोः प्रयत्नप्रभावो भगवता श्रीरामकृष्णपरमहंसदेवेन विततेपरमोदारे महति शिक्षाकर्मणि प्राधान्यं गतः, तयोरेकस्तावद् विश्वविश्रुतः श्रीमत्स्वामिविवेकानन्दः, अपरश्च सुगृहीतनामा श्रीमन्महेन्द्रनाथगुप्तः। 'श्रीश्रीरामकृष्णकथामृतं' नाम अमृतायमानं ग्रन्थं विरचयन्नसौ महात्मा स्वात्मानं तावदपह्नोतुकामः 'श्रीमः' इति छद्मनाम्ना प्रत्यहं परमहंसदेवमुखगङ्गोत्रीविनिःसृतं यथायथं गङ्गाम्भःसङ्काशं वचनजातं स्वकीयायां दिनपञ्जिकायामलिखत्। ततस्तदेव पञ्चखण्डात्मक-'श्रीश्रीरामकृष्णकथामृत'ाख्य-ग्रन्थाकारेण जनसमक्षं प्राकाश्यं नीतवांश्च। नूनं निखिलकल्याणप्रदेन महता चैतेन कर्मणा कृतार्थीकृतानस्मान् सर्वान् कृतज्ञतापाशबद्धान् विहितवान्, महात्मा ग्रन्थकृदसौ। एतावतैव कालेन विविधाभिर्भाषाभिः अनूदितोऽयं वङ्गभाषामयो महाग्रन्थः संस्कृतभाषयाऽपि अनूदितो भवेदित्यहो परमं हर्षस्थानम्! एतदपि स्मर्तव्यं यत् सामग्रिकरूपेण संस्कृतानुवादोऽयम् अकृतचरः—प्रथम एव।

संस्कृतानूदितेऽस्मिन् ग्रन्थे श्रीरामकृष्णदेवानां वचोराशिस्तु प्रथमकथनदिवसक्रमेणैव सन्निबद्धः। मन्ये, एतेन श्रीरामकृष्णदेवानां गुरुभावेन आत्मविकाशक्रमस्तथा तद्भक्तजनानामपि साधनसमुन्नतिप्रकारश्च अनायासत एव समधिगम्यौ भवेताम्। अपि च संस्कृतैकनिष्णातानां प्राचीनरीत्याध्ययनेन लब्धवैदुष्याणां भारतीयानां पण्डितानां शास्त्रनिचयाधीतौ अविसंवादितायामपि महापुरुषप्रवराणाम् एषाम् अवतारवरिष्ठानां परमहंसदेवानां जीवनवृत्तान्तेषु वचनसन्दर्भेषु च पुनरेतावता विशेषतो नानुप्रवेश इव प्रतिभाति। एषा खलु संस्कृतानुवादकृतिः परिस्थितिमिमाम् अन्यथयेदिति आशास्यते।

'श्रीम'-कथितस्यास्य ग्रन्थस्य स्वत्वाधिकारी संस्कृतानुवादमस्य सानन्दमनुमन्यमानः प्रकाशकस्य असंख्यातभक्तपाठकानां च कृतवेदित्वभाजनतां गतः। समग्रमेव 'श्रीश्रीरामकृष्णकथामृतं' भागशः प्रकाश्यम्। प्रथमत एव प्रकाशितोऽयं ग्रन्थः १८८२-खृष्टाब्दीयघटनासंबद्धः। येषामशेषाणां महानुभवानाम् आर्थिकार्थिकेतरानुकूल्येन प्रकाशनकर्मेदं लब्धावसरम्, कृतज्ञेन चेतसा तेषां सर्वेषां भूयो भूयः स्मरामो वयम्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कृत्स्नमेव ससम्पादनानुवादकार्यम् एकया त्रिसदस्यीयसम्पादकमण्डल्या अनुष्ठितम् । श्रीरामकृष्णमिशन-कलिकाता-विद्यार्थि-आश्रम-कर्मसचिवः स्वामि-ध्यानात्मानन्दः, यादवपुर-विश्वविद्यालयस्य संस्कृताध्यापकः पण्डितः श्रीविधु-भूषण-भट्टाचार्यः तर्क-वेदान्ततीर्थः, कलिकाता-महिला-महाविद्यालयस्य उपाध्यक्षः संस्कृताध्यापकश्च श्रीज्ञानेन्द्रचन्द्र-दत्तः, एम्. ए.—एते तावन्मण्डल्या सादस्य-भाजः ।

अधुना महासमाधिमापन्नः श्रीरामकृष्ण-मिशन-कलिकाता-विद्यार्थि-आश्रम-सभापतिचरः श्रीमत्स्वामिसन्तोषानन्दमहाराजः 'श्रीश्रीरामकृष्णकथामृत'स्य संस्कृतानवादं कल्पितवान् । सैव महती परिकल्पनाऽधुना साकारत्वमवाप्तेति सुतरां हर्षपदम् ; परमिदानीं तेषां महाराजपादानाम् अभावस्तीव्रतया प्रत्यक्षी-क्रियते ।

आदित एव कर्मसवेऽस्मिन् स्वात्मानं सोत्साहं नियुञ्जानौ श्रीरामकृष्ण-मिशन-विद्यार्थि-आश्रमस्य प्राक्तनान्तेवासी अध्यापकः श्रीविद्युद्वरण-घोषः, एम. ए., वर्तमानोऽन्तेवासी च श्रीमान् नवनारायण-वन्द्योपाध्यायः, बि. ए. अपि अस्माकं कृतज्ञतामर्हतः ।

किञ्च कलिकाता-अद्वैताश्रमस्य उद्बोधनकार्यालयस्य च कर्माध्यक्षौ कानि-चन चित्रफलकानि व्यवहारार्थं प्रदाय अस्माकं कृतज्ञतामर्जितवन्तौ ।

परमकारुणिकस्य भगवतोऽशेषकरुणया ग्रन्थोऽयं सुधियां पाठकानां चित्तानन्दकरश्चेत् स्यात्, तर्हि परिश्रमोऽपि अयमस्माकं सार्थकीभवेदिति अलमतिपल्लवितेन ।

१७. १२. ७६

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अनुवादकानां वक्तव्यम्

श्रीभगवतोऽशेषकरुणया श्रीम-कृत-श्रीश्रीरामकृष्ण-कथामृतस्य १८८२-खृष्टाब्दसंबन्धी अंशविशेषः संस्कृतेनानूदितः सन् प्रकाशतां नीयते। आदावेव काचित् पृच्छा उत्थाप्येत—कथामृतस्य संस्कृतानुवादेन किं प्रयोजनम्? श्रीरामकृष्णः मातृभाषया आत्मनः अमृतायमानान् उपदेशान् प्रदत्तवान्। किं तन्माधुर्यं भाषान्तरे सर्वांशतः प्रकटीभवेत्? सत्यम्; परन्तु एतदपि विस्मष्टव्यं—यद्यपि कथामृतं बह्वीषु भाषासु अनूदितं, तथापि सर्वे जिज्ञासवः सकला भाषा न जानन्ति। भारतवर्षस्य विभिन्नराज्येषु तथा पाश्चात्त्य-विषयेषु च प्रचुरा विद्वांसो वर्तन्ते ये परमार्थतः संस्कृतभाषाविदः। विशेषत-स्तेषामेव उपकारहेतोरियं प्रवृत्तिः। फलतः, भारतस्य ऐतिह्यस्य संस्कृतेश्च वाहिकया अखिलभाषाजनन्या संस्कृतगिरा प्रकाशिता इयं सर्वधर्मसमन्वयमूला श्रीरामकृष्णभावधारा नूनमेव जगज्जनेषु सहजमनुप्रविष्टा भवेत्, शास्त्र-वच्च तत्रभवतो वाणी देशनात्मिका स्यात्।

अनुवादकार्यस्य अतिदुष्करत्वं सर्वैरपि मनस्विभिरवश्यमेव स्वीक्रियते। प्रत्येकभाषायाः प्रकाशशैली विभिन्ना। सा अनुवादे कृत्स्नशो रक्षितुं न शक्या। तदस्माभिः प्रतिपदमनुभूतम्।

श्रीरामकृष्ण-मातृभाषा वङ्गवाणी अत्यन्तमेव तत्समशब्द-प्रचुरा। मन्ये तस्यां शतसंख्यकशब्देषु षष्ट्यधिकसंख्यकास्तत्समाः। अतो मूलगतास्तत्सम-शब्दा अनुवादे सर्वशो रक्षिताः। परन्तु वङ्गभाषायां बहवस्तत्समशब्दा विद्यन्ते येषां विशिष्टव्यञ्जनाः सन्ति। श्रीरामकृष्णव्यवहृता तेऽपि अपरिवर्तितया रक्षिताः। केचन तद्भवशब्दा देशीय-वैदेशिक-शब्दाश्च श्रीरामकृष्णमुखकमल-विनिर्गता इति कृत्वा अगत्या वा व्यवहृताः। तेषां तात्पर्यं शब्दार्थसूचिकायां प्रदर्शितम्। वङ्गवासितया वङ्गीयरीतिपरिहारः सुदुष्करः। तथात्वेऽपि वङ्गेभ्यो बहिर्जनानामावेदनं विशेषेण यथा स्यात्, सा चेष्टा आन्तरिकतया कृता।

व्याकरणविषयकमधुना किञ्चित् प्रस्तूयते। संस्कृतव्याकरणे काल-वैभिन्न्यसूचका लङ्-लुङ्-लिङ्-विभक्तयो वर्तन्ते। ग्रन्थेऽस्मिन् तिस्रोऽपि सामान्येन प्रयुक्ताः, केवलं केषु केषु स्थलेषु घटनानां चिरातीतत्वप्रदर्शनहेतोः लिट्-प्रयोगः कृतः। माष्टारमहाशयस्य उपस्थितिकालीना मूलग्रन्थे ये विषया आलोचिताः तेषामतीतत्वबोधनाय लिट्प्रयोगो न कृतो ग्रन्थकारस्य पारोक्ष्या-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भावात्। कुत्र कुत्रचित् काललिङ्गवचनविभक्तीनाम् आपातवैषम्यं दृश्येत, तत्तु विशेषार्थबोधकतया प्रकरणतः समर्थनीयनम्। 'सापेक्षत्वेऽपि गमकत्वात् समास' इति प्रसिद्धवैयाकरणनिर्देशमनुसृत्य कानिचन पदानि समासवाह्यानि विहितानि। सीमित-यति-व्यवहारः संस्कृतभाषायां प्राय एव प्रेक्ष्यते। वतमानयुगे तु यतिव्यवहारप्राचुर्यं परिलक्ष्य अत्रापि भावसौषम्यव्यक्तये बहुविधानि यतिचिह्नानि प्रयुक्तानि। सन्धिसमासबाहुल्यञ्चापि यथासम्भवं वर्जितम्।

ग्रन्थेऽस्मिन् अनेकत्र मातृशब्दः जगन्मातृपर्यायः ; 'असौ' 'सः' इत्यादयः शब्दाः परमेश्वरवाचिनः ; 'राणी' राज्ञीति ; 'माष्टारः' 'मणि'र्वा श्रीमहेन्द्रनाथगुप्तः ; 'हृदयः' च श्रीरामकृष्णभागिनेय इति प्रसङ्गतो बोद्धव्यम्।

मूलग्रन्थे यत्र यत्र श्रीरामकृष्णः 'ठाकुर' इति आख्यातः, अस्मिन् ग्रन्थे तत्र तत्र 'श्रीरामकृष्णः' इति उदाहृतम् ; यत्र यत्र च मूलग्रन्थे 'ठाकुर श्रीरामकृष्ण' इति उक्तं वर्तते तत्र तत्र 'भगवान् श्रीरामकृष्णः' इति प्रदत्तम्।

मूलग्रन्थः खण्डशो विभक्तः ; अत्र तु खण्डविभागः परिहृतः, केवलं कालक्रममनुसृत्य घटनाः सज्जीकृताः। मूले खण्डारम्भे केचित् गीतादिश्लोका उद्धृता वर्तन्ते। तेऽपि मुक्ताः।

सर्वेषामेव बोधसौकर्यार्थम् अन्ते काचित् शब्दार्थसूचिका (Glossary) प्रदत्ता।

सङ्गीतानामनुवादं यथासम्भवम् आक्षरिकं छन्दोबद्धं च विधातुं प्रयत्नः कृतः। तेषां गेयत्वविषये सङ्गीतशिल्पिन एव प्रमाणम्।

अनुवादकर्मणि निम्नोक्तग्रन्थानां साहाय्यं पदे पदे गृहीतम् —

(१) The Gospel of Sri Ramakrishna—Translated from the original by Swami Nikhilananda.

(२) श्रीश्रीरामकृष्णवचनामृत (हिन्दि)।

(३) Sanskrit-English Dictionary—By Sir Monier Williams.

(४) Practical Sanskrit-English Dictionary—By V.S. Apte.

(५) The Students' English-Sanskrit Dictionary—By V. S. Apte.

(६) संसद् बाङ्ला अभिधान—श्रीशैलेन्द्र विश्वास, एम. ए. सङ्कलित।

पूर्वोक्तग्रन्थानां प्रणेतॄन् प्रकाशकांश्च तथा अन्यानपि साहाय्यकारिणः प्रत्यस्माभिः आन्तरिकी कृतज्ञता प्रकाश्यते।

कृतेरस्याः सहृदया विद्वांस एव याथार्थ्येन मूल्यनिर्धारकाः। तेषां सविधे ग्रन्थमिमं समर्प्य वयं दायमुक्ताः। वस्तुतः श्रीरामकृष्णकथामृतसदृशो सहजो

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सुन्दरो ग्रन्थः पाण्डित्यविजृम्भनेन यथा दुर्बोध्यो न भवेत्, तथा संस्कृतभाषायाः यथासम्भवं सारल्यविधानेन विचेष्टितम्। यदि कुतोऽपि स्खलनं स्यात्, सचेतोभिः विद्वज्जनैः सानुग्रहं क्षन्तव्या वयम्। केवलमेतदेव वक्तुमर्हामः— श्रीरामकृष्णकर्मेति मनसि धारयन्तः कृतिमिमां धर्मरसपिपासुभ्यः विपश्चिद्भ्यः समर्पितवन्तः। तत्रभवतामाशिषमेव केवलमाशास्महे। शमिति

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.



CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीरामकृष्ण-चरितम्

प्रस्तावना

भगवान् श्रीकृष्णः कम्बुकण्ठं विघोषितवान्—

"यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे॥

(गीता, ४।७-८)

अस्मत्प्रसूतौ धर्मभुवि भारतभूमौ अष्टादश-शताब्द्या अन्तिमभागे एतादृशी काचित् सङ्कटमयी परिस्थितिः प्रादुरासीत्। पाश्चात्त्यसमाजस्य आपातमधुरां वस्तुपरतन्त्रां जीवनयात्रां भोगसर्वस्वताञ्च परमाग्रहं स्वीकुर्वाणा भारतसन्ताना विध्वंसवर्त्मना प्रचलिता आसन्। एतेन भारतस्य धर्मचेतनायां, संस्कृतिबोधे शिक्षाक्षेत्रे च किञ्चित् युगान्तकृदान्दोलनमापतितम्; भारतीयजनसमूहश्च उत्तरोत्तरम् आत्ममर्यादाहीनः परमुखापेक्षः, परानुचिकीर्षुर्जड़वादानुरक्तश्चासीत्। अस्मिन्नेव युगसन्धौ युगप्रयोजननिर्वाहार्थं परमपुरुषः श्रीभगवान् स्वयमेव श्रीरामकृष्णरूपेण अस्यां पावनभूमौ अवततार। श्रीरामादिरूपेण आदौ यस्यावतार आसीत्, स एव पुनरात्मसृष्टिं विधाय मानवकल्याणं साधितवान्।

जन्मकथा

भारतराष्ट्रान्तर्भूत-पश्चिमवङ्गस्थ-हुगली-मण्डलस्य कामारपुकुराभिधाने कस्मिंश्चित् ग्रामके ऊनविंशतिशताब्द्या मध्यभागे स एव भगवान् सम्बभूव। सैव आविर्भवनभूर्नैसर्गिकसम्पदा विमण्डितासीत्। नागरिककोलाहलात् दूरसंस्था सा शान्तस्निग्धा पल्ली सरलचेतोभिरमायैर्मानवैरध्युषिता बभूव। अस्याः पश्चिमदिशि 'देरे'-इत्यभिधाने ग्रामे मानिकराम-चट्टोपाध्यायनामा कश्चित् स्वधर्मनिरतो ब्राह्मण उवास। १७७५-खृष्टाब्दे तस्य ज्येष्ठात्मजः क्षुदिरामः समजनि। मानिकरामस्य तिरोधानात् परं संसारस्य समग्रभारो ज्येष्ठपुत्रस्य क्षुदिरामस्य स्कन्धे न्यस्तः सञ्जातः। धर्मपत्न्या चन्द्रमणिदेव्या सहासौ क्षुदिरामो गृहदैवत-श्रीरामचन्द्रस्योपरि नितरां निर्भरमाधत्त। श्रीरामचन्द्रगतप्राणौ तावेव परमनिष्ठामालम्बमानौ सांसारिकं कृत्स्नमेव कर्मजातं निर्वाहयामासतुः। अनयोर्ब्राह्मणदम्पत्योः सर्वातिशायि चारित्रं, देवभक्तिं, दयावृत्तिं, दाक्षिण्यं, निर्भीतिसत्यनिष्ठां च लक्षयन्तो ग्रामवासिनस्तौ प्रति परमश्रद्धादृष्टय आसन्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अचिरादेव क्षुदिरामः कस्मिंश्चित् संकटे पतितोऽभूत्। ग्रामस्य प्रजा-पीड़को रामानन्दरायनामा भूस्वामी तं मिथ्यासाक्ष्यप्रदानार्थमनुरुद्धवान्। सपद्येव क्षुदिरामेण प्रस्तावोऽसौ दृढ़तया प्रत्याख्यातः। एतेन क्रोधोन्मत्तो रामानन्दस्तमलीकव्यवहारेण सर्वस्वहीनं व्यदधात्। भक्तवत्सलो रघुवीरस्तु तं महत्यामपि तस्यां विपदि कल्याणमार्गमदर्शयत्। क्षुदिरामस्य परमसुहृत् कामारपुकुरग्रामवास्तव्यः श्रीसुखलाल-गोस्वामी तं स्वग्रामे आवासार्थं समाहूत-वान्। एवं सुहृत्साहाय्यं लभमानोऽसौ कामारपुकुरे पत्न्या चन्द्रमणिदेव्या, पुत्रेण रामकुमारेण, दुहित्रा कात्यायन्या च सह नूतन-संसारयात्रां समारभत। श्रीगोस्वामिमहोदयः क्षुदिरामाय कानिचिदुटजानि लक्ष्मीजलाभिधानां कर्षण-भूमिं च प्रदत्तवान्।

तस्मिन्नवसरे कश्चिदलौकिको व्यापारः संवृत्तः। एकदा ग्रामान्तरादावर्त-मानः क्षुदिरामः कस्यचिद् वृक्षस्य तलदेशे उपविष्ट आस। क्लान्तदेहोऽसौ स्निग्धसमीरणस्पर्शेन निर्भरं प्रसुप्तः। तदा बालकवेषः श्रीरामचन्द्रः स्वप्ने तमादिदेश, "अहमत्र बहुकालमयत्नेन अनाहारेण चावतिष्ठे ; मां त्वद्गृहं नय।" निद्रोत्थितः क्षुदिरामः स्वप्ननिर्दिष्टे स्थाने भुजङ्गफणाच्छादितां काञ्चित् शालग्रामशिलां दृष्टवान्। तं दृष्टवैव भुजङ्गस्तिरोदधे। परमाह्लाद-परीतात्मासौ रघुवीरशिलापाणिः स्वगृहं प्राप। यथाशास्त्रं रघुवीरं स्वनिवासे प्रतिष्ठाप्य क्षुदिरामो भक्त्यानन्यया तत्सपर्यां कृतवान्।

गच्छति काले क्षुदिरामस्य षोड़शवार्षिको ज्येष्ठात्मजो रामकुमारश्चतु-ष्पाठीतः साहित्य-व्याकरण-स्मृत्यादीनि शास्त्राणि समधीत्य अर्थार्जनक्षमः सञ्जातः। एवमसौ पितृसंसारयात्रानिर्वाहे सहायोऽभूत्। अधुना पुत्रस्योपरि संसारभारं विन्यस्य क्षुदिरामः १८२४-खृष्टाब्दे तीर्थभ्रमणार्थं गृहान्निरगात्। वत्सरमेकं सेतुबन्ध-रामेश्वरादीनि तीर्थानि पर्यटन् क्षुदिरामः प्रत्यावृत्तः। तदा तस्य द्वितीयात्मजो रामेश्वराभिधानो जनिं लेभे। यदा क्षुदिरामः षष्टिवार्षिकस्तदा तस्य मनसि पदव्रजेन गयाधाम-दर्शनार्थं प्रबलाकाङ्क्षा पदमकरोत्।

१८३५-खृष्टाब्दे पुनस्तीर्थानि पर्यटन्नसौ आदावेव मुक्तिक्षेत्रे वाराणसी-धामनि श्रीविश्वनाथस्य दर्शन-स्पर्शन-पूजनादीनि सम्पादितवान्। अतःपरं गयाधामासाद्य पितॄनुद्दिश्य श्रीगदाधरपादपद्मयोः पिण्डप्रदानमकरोत्। तत्र गभीरायां रजन्यां क्षुदिरामः स्वप्नेऽद्राक्षीत्—परमपुरुषः श्रीभगवान् स्वभक्तं प्रति प्रसन्नदृष्टिपातं मधुरया वाचा ब्रवीति स्म—"क्षुदिराम, प्रसन्नोऽहं ते परमया भक्त्या। पुत्ररूपेणाहं त्वद्गृहमवतीर्य त्वत्परिचर्यां ग्रहीष्ये।" सहसा जाग्र-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दसौ पुलकाञ्चितदेहो विस्मयविमूढ़चेता आत्मसौभाग्यविषयं व्यचिन्तयत्—"किमेतत् सम्भाव्येत नामे"ति।

गयाधाम्नः प्रत्यावृत्तः क्षुदिरामो धर्मपत्न्याः चन्द्रमणिदेव्याः सकाशात् एवं श्रुतवान्—एकदा ग्रामस्य कर्मकारदुहित्रा धनिरिति सख्या सह सा युगीति ख्यातानां ग्रामवासिनां शिवमन्दिरस्य पुरतः कथां कुर्वती स्थिता आस्त ; तदा अकस्मादेवापार्थिवं ज्योतिरेकं देवादिदेवस्य महादेवस्य शरीराद् विनिष्क्रम्य तरङ्गाकारेण तस्या एव उदरं सवेगं प्राविशत्। एतेन सा विलुप्तसंज्ञा जाता। तद्दिनादारभ्य चन्द्रमणिदेवी ससत्त्वाहमिति सदैवानुभवति स्म, नानाविधानि दिव्यदर्शनानि च तस्या अभवन्। एवंविधैर्लक्षणैः स्वप्नदृष्टस्य परमपुरुषस्य वाणी नूनमेव साफल्यं गमिष्यतीति विषये क्षुदिरामस्य सन्देहलवोऽपि नासीत्।

क्रमेण शुभा फाल्गुनी शुक्ला द्वितीया तिथिः संक्रान्ताभूत्। १२४२-वङ्गाब्दस्य ६-फाल्गुनदिवसे (१८३६-खृष्टाब्दस्य १८-फेब्रुयारी) श्रीरामकृष्णो विश्वमनांसि समुल्लासयन् युगकल्याणसाधनार्थं पूतंगम्भीरे ब्राह्ममुहूर्ते क्षुदिरामगृहे भूमिष्ठः सञ्जातः। अहो, परमविस्मयावहमेतत् यत् जन्मानन्तरमेव नवजातको भस्मपूर्णायां चूल्ल्यां पतितो विभूतिभूषिताङ्गः सन् निःशब्दमेव तस्थौ। ज्योतिर्विदो जातकस्य जन्मकुण्डलीं परीक्ष्य शिशुरयमुत्तरकाले नूतनसम्प्रदायं प्रवर्त्य नारायणवंशसम्भूतो महापुरुष इति जगति प्रसिद्धिं यास्यतीति क्षुदिरामं विज्ञापितवन्तः। गयाधाम्नो दिव्यस्वप्नवार्तां संस्मरन् क्षुदिरामस्तस्मै गदाधरेति नाम प्रादात्।

बाल्यलीला

गतेषु केषुचिद् वर्षेषु क्षुदिरामेण गदाधरः पाठशालायां प्रेरितः। बालकस्य तु पाठानुरागस्तादृशो नासीद् यादृशस्तस्य क्रीड़ानुरागः। स श्रुतिधरत्वगुणादत्यल्पकालेन देवतानां स्तोत्राणि, पुराणकथाः, रामायणमहाभारतादिग्रन्थेभ्यश्च विचित्राणि उपाख्यानानि आयत्तीकृतवान्। गदाधरस्यैश्वरीयकथायां समुल्लासं, चित्राङ्कनविद्यायामासाधारणीं प्रतिभां, नाटकादिदर्शनानन्तरं तदनुकरणदाक्ष्यं, भगवल्लीलाकीर्तने सुगभीरां तन्मयतां, नृत्यगीतादिकं, मनोहारिभङ्गीवैचित्र्यञ्च संदृश्य पल्लीवासिनो विमलानन्दरसाम्बुधौ निमग्ना अभवन्।

बालकोऽधुना सप्तवार्षिकः। एतस्मिन्नेव स्वल्पवयसि तस्य तन्मयता एतादृशीं वृद्धिमभजद् यन्निसर्गस्य किमपि रामणीयकं पश्यन्नेवासौ विलुप्तसंज्ञो बभूव ; तस्य निर्मलं स्वान्तं ससीमलोकादसीमलोके विलीनमभूत्। एकदा सहचरैः सह प्रान्तरमध्ये यदृच्छया परिभ्रमन् नवजलधरक्रोड़े स्वच्छन्दतो विहरन्तीः श्वेतबलाकाश्रेणीरवालोकयत्। एतेन तस्य भावप्रवणं मानसमनन्त-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भावसमुद्रे निमग्नमभूत्। सपद्येव संज्ञाहीनस्तद्देहो भूतले लुलोठ। अष्टवर्षीयोऽसौ एकदा पल्लीललनाभिः साकमनतिदूरवर्तिनि 'आनुड़ा'ख्ये ग्रामे देव्या विशालाक्ष्या दर्शनार्थं गच्छन्नासीत्। पथि सुमधुरं गायतस्तस्य भावातिशयात् संज्ञाविलुप्तिः समजनि। अपरेद्युः शिवमहिमसूचको यात्राभिनयः चलति स्म। यस्य नाम बालकस्य शिवभूमिकायामवतरणकथासीत्, सोऽकस्मादेवास्वस्थः सञ्जातः। अतो अभिनयाधिकारिणो गदाधरमेव शिवरूपेण सज्जीकृत्य रङ्गस्थानं समानीतवन्तः। अहो चित्रम्! शिवध्याननिमग्नो बालको गदाधरो बाह्यज्ञानविरहितः सन् दण्डायमानः समतिष्ठत। तस्यामेव रजन्यां गदाधरस्य समाधिभङ्गो बहुप्रयत्नेनापि सम्पादयितुमशक्यो जातः।

१८५६-खृष्टाब्दीय-श्रीदुर्गापूजावसरे क्षुदिरामः छिलिमपुराभिधानग्रामस्थं स्वभागिनेयरामचाँदस्य गृहं गतः। तत्रासौ ग्रहणीरोगाक्रान्तः सन् रघुवीरश्रीरामचन्द्रस्य तारकनामोच्चारणपूर्वकं परमपूते विजयादशमीदिवस एव स्वदेहमुत्ससर्ज। एतेन पितृस्नेहाञ्चलपरिभ्रष्टो गदाधरो निरतिशयं व्याकुलः संवृत्तः। क्षुदिरामनेत्रमणिरसौ ततः प्रभृति विविक्तसेवायामत्यादृतो जातः। कदा कामारपुकुरात् पश्चिमोत्तरभागस्थ-भूतिरखालेतिश्मशाने, कदा वा विजने मानिकराजस्याम्रकानने एक एवोद्भ्रान्तमानसो विचरति; कदा वा ग्रामादाग्नेय्यां दिशि संस्थिते पान्थनिवासे प्रज्वलदग्निसकाशे समासीनैर्जटाजूटधारिभिर्दिगम्बरसन्न्यासिभिर्मिलितो भवति। बहुधासौ तान् सेवमानो नितरां निर्वृतिं प्राप्नोति। सन्न्यासिनाममोघाशिषा गदाधरस्याशेषं कल्याणं भवितेति मन्यमाना माता चन्द्रमणिस्तस्य साधुसङ्गं प्रसन्नदृष्ट्याभिननन्द। परं त्वेकदा कौपीनपरीधानः काषायवेषो गदाधरो मातुः समीपे समागत्याभ्यधात्—"मातः, पश्य, साधवो मां कीदृक् सज्जीकृतवन्तः!" दृश्येनानेन पुत्रगतप्राणायाः स्नेहमय्या जनन्या हृदयं कयाचिदज्ञातशङ्कया चकम्पे। मन्ये, परिव्राजकास्ते बालं विमोह्यात्मसहचरं कुर्युरिति चिन्तयन्ती केवलमश्रूणि विसृष्टवती! बालको द्रागेव मातृशोककारणमबुध्यत। अतो मातुरुत्कण्ठां दूरीकर्तुमसौ पुनः पान्थशालागमनाद् व्यरमत्। सन्न्यासिनस्तु गदाधरादर्शनान्नितरां व्याकुलाः संवृत्ताः। ते चन्द्रमणिदेवीसकाशं समागम्य सर्वमेव वृत्तान्तमवगतवन्तः। वयं तावत् भवत्पुत्रमात्मसहचरं न विधास्याम इति तामाश्वासयामासुः। जननी च पूर्ववदेव गदाधरस्य साधुभिर्मेलनमनुमेने।

गदाधरोऽधुना नववार्षिकत्वमुपागतः। संप्राप्तस्तस्य उपनयनकालः। उपनीतस्य तु बालकस्य मातृहस्तादेवादौ भिक्षा ग्राह्येति विधिः। कर्मकारदुहिता 'धनी'नामिका ब्राह्मणेतरजातीया काचित् महीयसी महिला सन्तानसंकाशे गदाधरे अतितरामस्निह्यत्। उपनयनकाले भवतीमेव भिक्षामातरं

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विधास्यामीति गदाधरस्तस्यै पूर्वमेवाङ्गीकृतिं प्रददौ। विषयेऽस्मिन् स ज्येष्ठाग्रजस्य रामकुमारस्यानुमतिं ययाचे। रामकुमारेण तु घोरतरा आपत्तिरुत्थापिता। सत्यनिष्ठो बालकोऽपि आत्मसंकल्पे दार्ढ्यमाधत्त। परिणामतो निःस्वार्थप्रेम्णा सत्येन च जितमासीत्। पितृसुहृदा श्रीधर्मदासलाहानामकेन महात्मना साकं परामर्शपुरःसरं रामकुमारः कनिष्ठभ्रातुर्गदाधरस्य अभिलाषं पूरयामास।

तदानीमपरः कश्चिद् अद्भुतव्यापारोऽघटत। भूस्वामि-लाहामहोदयानां वाटिकायां कस्मिंश्चिद् अनुष्ठानावसरे काचित् पण्डितसभा समाहूतासीत्। तत्रोपस्थिताः पण्डिताः कस्यचित् कूटप्रश्नस्य समाधाने अक्षमा अभवन्। श्रोतृमण्डलीतस्तु बालको गदाधरः कञ्चित् परिचितपण्डितं प्रश्नमीमांसासूचकं स्वसिद्धान्तमावेदयामास। अहो चित्रम्! यथायथोऽयं सिद्धान्त इति मन्वानाः पण्डिताः परं विस्मयं जग्मुः। समवेताः सर्वे गदाधरस्य बुद्धिप्राखर्यं प्रत्युत्पन्नमतित्वञ्च भूयसा प्राशंसन्।

क्रमशो गदाधरो जनमानसानि अबोधपूर्वम् अधिकृतवान्। कामारपुकुरनिवासी श्रीनिवास-शाँखारीति कश्चिद् वृद्धो गदाधरे नितरां स्नेहं श्रद्धां चाधत्त। एकदा श्रीनिवासस्तन्मयेन मनसा इष्टदेवतामुद्दिश्य माल्यरचनं कुर्वन्नास्त। अकस्मादेव गदाधरस्तत्पुरत उपस्थितोऽभूत्। तद्दर्शनमात्रमेव श्रीनिवासः कयाचिदज्ञातप्रेरणया समीपस्थविपण्याः फलमिष्टादीनि आनीतवान्। ततोऽसौ परमप्रेम्णा बालकं पुष्पमाल्येन विभूष्य परितोषपरीतात्मा सन् फलमिष्टान्नादीनि अभोजयत्, बाष्परुद्धकण्ठश्च सगद्गदमुवाच—"वत्स गदाधर! भजनहीनोऽहम्, दीनातिदीनोऽहम्, अकिञ्चनोऽहम्। मरणञ्च मे नानतिसन्निहितम्। त्वमायत्यां जगद्धिताय प्रभूतकर्माणि साधयिष्यसि; तद्दर्शनसौभाग्यं मे नापतिष्यति। वत्स, त्वत्समीपे मदीयेयं प्रार्थना—दीनं मां न कदापि विस्मरेः।" धन्यस्तावत् कृतकृत्यस्तावदयं महात्मा श्रीनिवासः! केवलशुद्धप्रेमबलादसौ नररुपधारिणः श्रीभगवतो यथार्थस्वरूपमुपलब्धवान्!

गदाधरोऽधुना द्वादशवर्षवयाः। तदैव तस्य मध्यमभ्रातू रामेश्वरस्य कनिष्ठभगिन्याः सर्वमङ्गलायाश्च उद्वाहक्रिया सम्पन्नाभूत्। कालेऽस्मिन् रामकुमारजीवने कश्चिद् विपर्ययः समागतः। तस्य पत्नी परमरूपवन्तं पुत्रमेकं प्रसूयाम्रियत। ततः प्रभृति तस्य अर्थागमोऽपि न्यूनतां गच्छन्नास्त। अर्थोपार्जनार्थमसौ कलिकातानगरीमगमत्। तत्र झामापुकुर-लेनेति वर्त्मनि चतुष्पाठीमेकां प्रतिष्ठाप्य विविधशास्त्राणि अध्यापयितुमारभत, यजन-याजनादिक्रियाभिश्च अर्थोपार्जनं कृतवान्।

गच्छति काले गदाधरस्य चेत उत्तरोत्तरं वैराग्यप्रवणं जायमानमास्त।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

या नाम विद्या विद्यालयेषु अन्तेवासिभिर्लभ्यते, सा केवलमर्थकरीति मन्यमानोऽसौ तां प्रति नितराम् उदासीनः संवृत्तः। ततः प्रभृति असौ बाल्यसहचरैः साकं मानिकराजस्याम्रकानने श्रीकृष्ण-रामचन्द्र-लीलाभिनयैः कालं निनाय। एवमपार्थिवसुधाम्बुधिमग्नो गदाधरः पाठशालागमनमध्ययनञ्च अशेषत एव जहौ।

रामकुमारो भ्रातुर्गदाधरस्य विद्याभ्यासे ईदृग् औदासीन्यमभिलक्ष्य अतितरां चिन्तितोऽभवत्। अतोऽसौ अनुजं तं कलिकातामानीतवान्। गदाधरस्तदा सप्तदशवर्षीय आसीत्।

दक्षिणेश्वर-भवतारिणी-मन्दिरे

कलिकातायामपि विद्यार्जन-विषये गदाधरस्य औदासीन्यं पूर्ववदेव प्राचलत्। अनुजस्य एवंविधं मनोभावमवेक्ष्य रामकुमारस्तमेकदा भर्त्सयामास। तदासौ दृढ़कण्ठमवादीत्—"यया विद्यया तण्डुल-कदल्यो बध्यन्ते तामहमधिगन्तुं नेच्छामि ; अहमीदृशीं विद्यां लब्धुकामो यया यथार्थज्ञानोदयात् जीवास्तत्त्वत एव कृतकृत्या भवेयुः।" उत्तरेणानेन रामकुमारः परं विस्मयं जगाम।

तदानींतने काले कलिकाता-नगर्या जानवाजारेति पल्ल्यामशेषगुणालंकृता राणी-रासमणिरुवास। तस्या दया-दाक्षिण्य-बुद्धिमत्ता-प्रभृतीनां कथा सर्वत्र विस्तृतिम् अगाहत। १८४७-खृष्टाब्दे भक्तिमती रासमणिः पूतसलिलायाः सुरधुन्याः पूर्वरोधसि दक्षिणेश्वराभिधस्थानस्य कूर्मपृष्ठाकृतौ एकस्मिन् विस्तीर्ण-भूमिखण्डे प्रभूतार्थव्ययेन श्रीश्रीभवतारिण्याः कालिकायाः श्रीश्रीराधाकान्तस्य च मन्दिरे निर्मापयामास ; सममेव देवादिदेव-महादेवस्य द्वादश मन्दिराणि च निर्मितान्यासन्। १८५५-खृष्टाब्दस्य ३१-मे-मित-दिनांके बृहस्पतिवारे परम-माङ्गलिक-स्नानयात्रादिवसे मन्दिर-प्रतिष्ठा भवेदिति स्थिरीकृतम्। परं तु शूद्रजातीयया राणी-रासमणि-महोदयया प्रतिष्ठापितायै जगदम्बिकायै कथमन्न-भोगदानं सम्भवेदिति शङ्कया ब्राह्मणास्तस्मात् प्रतिष्ठापनकर्मणो विरता अभवन्। शास्त्रविद् रामकुमारस्तु ईदृग्विधानं दत्तवान्—'मन्दिर-स्थापनात् प्रागेव राणी-रासमणिश्चेत् तदेव देवतायतनं कस्मैश्चित् ब्राह्मणाय दद्यात्, ब्राह्मणोऽप्यसौ च यथाविधि प्रतिष्ठापनकर्मादि सम्पादयेत्, तर्हि शास्त्रमर्यादा अव्याहता भवेत्। एवं सति ब्राह्मणादीनामपि तस्मिन् देवमन्दिरे प्रसादग्रहणं युक्तं स्यात्।' पण्डित-रामकुमार-विधानतः सा परमभक्तिमती रासमणिस्तमेव देवालयं ब्राह्मणत्रा कृतवती, स्वयञ्च केवलमेव देवसेवायास्तत्त्वावधायिका-पदे स्थिताभवत्। तस्या निर्बन्धातिशयाद् देवीभक्तो रामकुमारो मातृ-मन्दिरस्य राधाकान्त-मन्दिरस्य च प्रतिष्ठापन-कर्मणि आत्मानं न्ययुङ्क्त।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गदाधरोऽपि उद्यानसनाथे देवतायतनेऽस्मिन् ज्येष्ठाग्रजेन सार्धं निवसन्नास्त। ततः प्रभृति गदाधरजीवनमेकेन अभिनवरूपेण सञ्चरमाणमभूत् ! अधुना निबन्धेऽस्मिन् गदाधरः श्रीरामकृष्णेत्यभिधानेन ज्ञातव्यः ।*

इतः अत्यल्पकालात् परं श्रीरामकृष्णस्य पितृस्वस्रीयाया भगिन्याः श्रीमत्या हेमाङ्गिनीदेव्या आत्मजः श्रीहृदयराममुखोपाध्याय आजीवसन्धानार्थं दक्षिणेश्वर-देवालये समुपस्थितोऽभवत् । श्रीरामकृष्णस्य सौम्यमूर्तिं भगवद्भक्तिञ्च संदृश्य राणी-रासमणेर्जामाता श्रीमथुरानाथ-विश्वासस्तं देव्या भवतारिण्या वेशकारि-पदे हृदयरामञ्च तत्सहकारिरूपेण नियुक्तवान्।

एकदा जन्माष्टमीतिथौ किमपि अत्याहितं संवृत्तम्। पूजान्ते पूजकः क्षेत्रनाथः श्रीगोविन्दविग्रहं शयनगृहं नयन्नासीत् । अकस्मादेव पदस्खलनात् क्षेत्रनाथो भूपतितोऽभवत् । एतेन श्रीविग्रहस्य कश्चिच्चरणो भग्नो जातः। श्रीरामकृष्णस्तु आत्यनैपुण्येन श्रीविग्रहस्य भग्नस्थानं योजयामास। मूर्ति-भङ्गापराधात् क्षेत्रनाथः पूजकपदान्निराकृतोऽभवत् ; तत्स्थाने श्रीरामकृष्णो राधाकान्त-पूजकपदमवाप्तवान् ।

एवं गच्छति काले विग्रहाराधनव्यपदेशेन श्रीरामकृष्णस्य वैराग्यप्रवणं चेतो गभीरध्यानतन्मयतामभजत् । रामकुमारोऽपि कनिष्ठानुजस्य आराधन-निष्ठाया भक्त्यतिशयेन च नितरां प्रीतिमुद्वहन् तस्मै विभिन्नदेवतानां विशेषतः श्रीश्रीकालिकामातुर्वैधीमेवार्चनां शिक्षयामास । देवीपूजायां शक्ति-मन्त्रेण दीक्षाग्रहणमेकान्तत एवावश्यकम् । अतः श्रीरामकृष्णः कलिकाता-वास्तव्यात् शक्तिसाधकात् श्रीकेनाराम-भट्टाचार्य-पादात् शाक्तदीक्षामगृह्णात् । दीक्षाग्रहणात् परं श्रीमथुरानाथः श्रीरामकृष्णमेव तस्याग्रजस्थले भवतारिण्या अर्चनकर्मणि न्ययुङ्क्त । रामकुमारोऽपि वार्धकनिबन्धन-शारीरदौर्बल्यवशात् शनैः शनैः आत्मानं सर्वकर्मभ्योऽपासारयत् । अकस्मादेवासौ १८५६-खृष्टाब्दे दिवं गतः ।

अग्रजस्य आकस्मिकमरणादनन्तरं श्रीरामकृष्णस्य वैराग्यानल उत्तरोत्तरं प्रज्वलन्नास्त । ततः प्रभृत्यसौ पूजाध्यानप्रार्थनैः रामप्रसाद-कमलाकान्त-प्रमुखरचित-भजनकीर्तनैश्च कालं निन्ये । स पूजावसाने सान्द्रनिशीथे अन्तिकस्थं गहनवनं प्राविशत् ; तत्रामलकीपादपमूले उपवीतं परिधेयञ्च

---

*राणी-रासमणेर्जामाता श्रीमथुरानाथविश्वासः प्रथममेव गदाधरं श्रीरामकृष्णनाम्ना अभिहितवानिति एके वदन्ति । सन्न्यासग्रहण-समये श्रीमत्स्वामि-तोतापुरी तं श्रीरामकृष्णनाम्नाभूषयदिति अपरेषां मतम् । शेषोक्तमतमेव समीचीनतरं प्रतिभाति ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उन्मुच्य गभीरध्याननिमग्नोऽभूत्। कदा वा जगदम्बापूजासने उपविष्टः सन् स्वशिरसि पुष्पादीनि समर्प्य कियत्कालं स्थाणुवत् तत्रातिष्ठत्; कदा वा सुगन्धिभिः पुष्पैर्मनोरमाणि माल्यानि विरचय्य जगन्मातृकां साह्लादचेतसा सज्जीकृतवान्।

क्रमेण प्रवर्धमानभावावेगाद् भक्त्यतिरेकाच्च श्रीरामकृष्णस्य धैर्यबन्धनं संछिन्नमभूत्। मातृगतप्राणस्य साधकस्यास्य हृदयविदारकेण निरन्तरक्रन्दनेन दक्षिणेश्वरस्य आकाशमण्डलं पवनमण्डलञ्च भाराक्रान्ते संजाते। तस्य विरामविहीनैर्नेत्राम्बुभिर्भवतारिणीचरणद्वयं निषिक्तमभूत्। सन्ध्यासमागमे यदा शङ्खघण्टादिवादित्रध्वनी रात्र्यागमवार्तामघोषयत्, तदा अन्यदपि दिनमेकं वृथातिक्रान्तमिति भावयतस्तस्य व्याकुलता शतशो विवृद्धिमाप्नोत्। आकुलकण्ठमसौ अवादीत्—"अयि मातः, अधुनापि त्वद्दर्शनमलब्धं मे! रात्रिंदिवम् एतावत् क्रन्दामि, एतावदनुनयामि! अयि जगदम्बिके, किं न मां प्रति कृपाकटाक्षं प्रहिणुयाः?" एवम् असह्यव्याकुलतया भूमौ मुखघर्षणात् तस्य शरीरं विक्षतं जातम्।

एकदा मातृविरहजां तीव्रमनोवेदनां सोढ़ुमशक्नुवन् देवीचरणयोः आत्मबलिं प्रदातुकामः श्रीरामकृष्णो मन्दिरगात्रविलम्बितम् असिं ग्रहीतुमैच्छत्; तदर्थं धावमानोऽसौ झटिति जगन्मातुः दिव्यदर्शनं लब्ध्वा विलुप्तसंज्ञो न्यपतत्। तस्यामेव भावतन्मयतायां श्रीरामकृष्णो व्यापारयामास दिव्यविलोचने, "गृहद्वारं देवतायतनं वृक्षा व्रतत्य उद्यानं जीवानां कलरवश्च—सर्वमेव क्रमेण उत्तरोत्तर-क्षीणतामापाद्य महाशून्ये विलीयते; तदेव च शून्यं पूर्णत्वमापाद्य कश्चिदनन्तः चेतनात्मको ज्योतिःसमुद्रः उत्तुङ्गतरङ्गभङ्ग्या दोदुल्यमानः सर्वतः प्रसर्पत्सु आलोकच्छटासु उच्छ्वासं समानीय तस्योपरि साभिघातं पतत्येव। यावदेव दृष्टिः प्रसरति क्वापि किमपि नास्ति—पुलकाभामण्डितस्य विलसच्चिन्मयज्योतिःसमुद्रस्य अगाधापारा विस्तृतिः; तस्मिन्नेव च अपूर्वानन्दमयस्य आलोकसिन्धोरुपरि एका चिद्घना वराभयकरा आनन्दमयी मूर्त्तिः असीमकरुणया मृदुमन्दहसिताधरा वर्तते।"* अस्या दिव्यानुभूतेः परं जगदम्बाया निरन्तरदर्शनलालसा श्रीरामकृष्णम् अधिकतरमेव व्याकुलीकृतवती।

भावतन्मयता-प्रकर्षात् श्रीरामकृष्णस्य यथाविधि पूजासम्पादनम् असम्भावितकल्पमासीत्। मन्दिराधिकारिकपुरुषास्तस्य शास्त्राननुमतमाचरणं

---

*देवेन्द्रनाथवसु-कृतात् 'परसहंसदेवः' इति वङ्गभाषया लिखितात् पुस्तकात् अंशोऽयं गृहीतः। (पृः ५८ .....)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीमथुरानाथाय न्यवेदयन् । मथुरानाथश्च पूजाकाले समागच्छन् मन्दिराभ्यन्तरं प्रविश्य मातृभावविह्वलं बाह्यज्ञानविरहितं श्रीरामकृष्णं दृष्ट्वा अपार्थिवानन्दरसे निमग्नोऽभवत् । मन्ये, आकुलार्तिपरस्य श्रीरामकृष्णस्य पूजा मात्रा नियतमेव स्वीकृता। अहो ! अद्य अश्ममयी जननी चिन्मयी सञ्जाता ! सा अशेषतो जाग्रती एवेतिविषये सन्देहलवोऽपि भवितुं नार्हतीति। सानन्दान्तःकरणो मथुरानाथः सर्वमेवैतत् परमभक्तिमत्यै राणीरासमणये आवेदयामास। सापि अपरेद्युः कालिकायतनं समागम्य विस्मयविस्फारितेन स्वचक्षुषा सर्वमेतत् दृष्ट्वा मथुरानाथाभिमतपुष्टिं कृतवती ।

राणी-रासमणिर्यदैव दक्षिणेश्वरं समागच्छति, तदैव श्रीरामकृष्णकृत-सुमधुर-मातृनामकीर्तनं शुश्रूषुर्भवति। एकदा श्रीरामकृष्ण आवेगमधुरं रासमणिमहोदयां मातृसङ्गीतानि श्रावयन्नास्त। अद्य मातृभावव्याकुलात्मनः श्रीरामकृष्णस्य सान्द्रीभूतं प्रेम सङ्गीतस्य प्रतिमूर्च्छनायां तरङ्गायितमभूत् । स्निग्धभाववन्यया मन्दिरं प्लावितम्; भक्तसाधकोऽपि प्रेमावेशेन स्वान्तर्लीनतां गतः। सहसैवासौ मधुस्रावी श्रीरामकृष्णकण्ठः स्तब्धो जातः ! पुरत आसीनायाः रासमणेः सुकोमलदेहे कराघातं विधाय श्रीरामकृष्णो रुक्षस्वरेणाह, "केवलं सैव भावना, अत्रापि सैव चिन्ता !" राणी-रासमणिस्तु सङ्गीतश्रवणावसरे कस्यचित् व्यवहारस्य साफल्यवैफल्यचिन्तया विमनस्कत्वं गतेति बुद्ध्वा नितरां सानुशया संवृत्ता। मथुरानाथस्तु वृत्तान्तेनानेन वायुरोगाक्रान्तम् आशङ्कमानस्तं ख्यातनाम्नो भिषग्वर-गङ्गाप्रसाद-सेनस्य चिकित्साधीनं विहितवान् । परंतु सत्यामपि चिकित्सायां श्रीरामकृष्णस्य दिव्योन्माद-दशा स्तोकेनापि प्रशान्तिं नान्नजत् ।

श्रीरामकृष्णसेवको मथुरानाथः

श्रीरामकृष्णेन मथुरानाथस्य सम्पर्कमाधुर्यं प्रतिमुहूर्तमेव वर्धमानमास्त। अहेतुककृपया आध्यात्मिक-प्रभावेणासौ मथुरानाथं निःशेषमेव जितवान् । बालस्वभावः श्रीरामकृष्ण आत्मनो विविधा अतीन्द्रिया उपलब्धीः तस्मै सार्जवं प्रकाशयामास । जन्मान्तरीणसुकृतिवशात् कीदृश आध्यात्मिक-महीरुहाश्रयो मया लब्ध इति मथुरानाथः स्व-मर्मणि सविशेषमन्वभूत्। अहेतुक-कृपासिन्धुः श्रीरामकृष्णः सर्वास्ववस्थासु मथुरानाथं निजकल्याणहस्तेन दुर्भेद्यवर्मवत् सदैव ररक्ष। श्रीरामकृष्ण एव मे जीवित-तरण्याः कर्णधारः ; विपत्-सङ्कुले संसारवारिधौ स एव मे ध्रुवतारकेति मथुरानाथः प्रतिक्षणमेव अनुभूतवान्। अतः पवित्रतैकविग्रहस्य श्रीरामकृष्णस्य अभयांघ्रिसरोजे आत्मानं

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सर्वथैव समर्प्य मथुरानाथस्तज् जीवितनियन्तुः परिचर्यार्थं रक्षणावेक्षणहेतोश्च देहमनांसि सर्वभावेन न्ययुङ्क्त। एवमसौ अतुलाध्यात्मिकसम्पद्भिः विमण्डितः सन् कृतकृत्यतां जगाम।

दिव्योन्मादो विवाहश्च

इतः प्रभृति श्रीरामकृष्णस्य जीवितस्रोत एकया अभिनवधारया प्रवहति स्म। जगन्मातुर्ज्योतिर्घनमूर्तिदर्शनात् परं नैरन्तर्येण तस्या निर्बाधसाक्षात्कारार्थं श्रीरामकृष्णस्तीव्रेण व्याकुलत्वेन समन्वितोऽभूत्। एतेनास्य देहबुद्धिर्गतकल्पैव संजाता। श्रीरामकृष्णो वदन्नास्त—"तदानीं शरीरसंस्कारं प्रति मनागपि नासीन्मे मनः; शिरस्तु केशबाहुल्याद् धूलिमृत्तिकासम्पर्काच्च जटान्वितं जातम्; ध्यानार्थमासीनस्य च मे मनस ऐकाग्र्यहेतोः शरीरं स्थाणुवत् स्थिरमभूत्; पक्षिणस्तावज् जड़पदार्थबुद्ध्या निःसंकोचं मम मस्तकस्योपरि उपविशन्तः केशमध्यगतान् धूलिराशीनपि चंचुभिः संचाल्य तस्मिन्नेव (मस्तके) तण्डुलकणान् अन्विष्टवन्तः।"

सर्वभावमयस्य श्रीरामकृष्णस्य मनः कस्मिन्नपि एकस्मिन् धर्मभावनायाम् समाबद्धं सत् परिपूर्णां तृप्तिं लब्धुं नाशकत्। जगदम्बायाः साक्षात्कारात् परमसौ निजकुलदैवतस्य रघुवीरस्य दर्शनकाङ्क्षया नितरां व्याकुलः संजातः; स आत्मनि महावीरस्य हनुमतो दास्यभावमारोप्य तदनुरूपञ्च समाचर्य अहोरात्रमिष्टध्याने निमग्नो बभूव। एकदासौ पञ्चवटीतलदेशे आसीन आसीत्; सहसा तेन दृष्टम्—काचित् ज्योतिर्मयी स्त्रीमूर्तिः प्रसन्नदृष्टिपातं धीरललितगत्या उत्तरदिशस्तमभि प्रचलति स्म। तस्मिन्नेव काले कश्चित् कपिस्तत्रोपस्थितः सन् तस्या एव स्त्रीमूर्तेः पदयोर्लुलोठ। तन्मयभावपरीतात्मा श्रीरामकृष्णः सपद्येवान्वभूत्—"अत्र भवत्येव सीता—आ जन्मनो दुःखार्तिसहचरी सीता, जनकराजनन्दिनी सीता, राममयजीविता सीता!" निमेषमात्रेण सा स्निग्धसमुज्ज्वला कमनीयकान्तिर्मातृमूर्तिः श्रीरामकृष्णस्य शुद्धापापविद्धशरीरे विलीनाभूत्। विमलानन्देन परमविस्मयेन चाभिभूतस्य तस्य बाह्यचेतना विलुप्तिं गता।

कामारपुकुरस्थिता माता चन्द्रमणिरपि लोकमुखात् श्रीरामकृष्णस्य दिव्योन्मादवार्तामवाप्तवती। पुत्रार्थं नितरां चिन्ताकुलाया जनन्या आदेशेनासौ १८५८-खृष्टाब्दस्य आश्विने कार्तिके वा मासि कामारपुकुर प्रत्यावर्तत। श्रीरामकृष्णस्तदा त्रयोविंशतिवार्षिको युवा। मातुः स्नेहच्छायायामवस्थानात् स बहुतरं स्वस्थः सबलः शान्तश्चापि बभूव, परंतु ग्रामप्रान्तस्थिते 'भुतिर-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

खाले'ति 'बुधुइमोड़ले'ति च श्मशानद्वये दिवसस्याधिकभागमतिवाहयन्नास्त। सातिशयमुद्वेगमावहन्ती माता पुत्त्रमुद्वाहबन्धनेन आबद्धं विधातुं कृतयत्ना जाता। परं तु सुयोग्या कन्या अनायासं प्राप्तुं न शक्येति विज्ञाय श्रीरामकृष्णः स्वयमेव निर्दिशन्नाह—"जयरामवाटी-ग्रामस्य श्रीरामचन्द्र-मुखोपाध्यायस्य वाटिकायां वधूरादितो परिणयार्थं बद्धेवास्ते।" अचिरादेव शुभेऽहनि पुण्ये च क्षणे जयरामवाटीग्रामस्य श्रीरामचन्द्रमुखोपाध्यायस्य षड्वर्षवयसा दुहित्रा सारदामण्याख्यया श्रीरामकृष्णस्य परिणयक्रिया सम्पन्नाभूत्। आयत्यां सारदादेवीमभिलक्ष्यासौ अवादीत्—"सारदा स्वयं सरस्वती ; ममैव शक्तिः। मम तावत् कार्य-साधने साहाय्यार्थं पृथिवीमवतीर्णा सारदारूपेण।"

विवाहात् परं श्रीरामकृष्णः सप्तमासोत्तरं वर्षमेकं कामारपुकुरेऽवस्थाय पुनर्दक्षिणेश्वरमावर्तत। इदानीं पूर्ववदेवासौ जगन्मातुः स्मरण-मनन-निदिध्यासनेषु एकान्तत एव निमग्नोऽभूत्। तत्कालस्य दिव्योन्माददशां स्मरन्नसौ परवर्तिनि काले वदन्नासीत्—"अद्य प्रभृति षड् वर्षाणि यावन्मे अत्यल्पापि निद्रा नासीत्। चक्षुः निष्पलकं जातम्—शरीरमेतत् अतितुच्छं हेयञ्च मे प्रतिभाति स्म ; मातुर्दर्शनेन तस्याः अभयवाण्या च आश्वस्तोऽभवम्।"

१८६१-खृष्टाब्दस्यादौ राणी-रासमणि-महोदया अकस्मादेव ग्रहणीरोगाक्रान्ता सती आत्मेष्टदेव्या जगज्जनन्याः श्रीश्रीकालिकाया अभयचरणयोर्मिलिताभूत्। रासमणि-महोदयाया अन्तर्धानात् परं तस्याः सुयोग्यो विचक्षणश्च जामाता मथुरनाथ एव देवसेवासंबद्धं समग्रमेव कार्यजातं परमनैपुण्येन परिचालयन्नासीत्, श्रीरामकृष्णसेवां च स्वजीवितस्य श्रेष्ठकर्तव्यं मन्यमानस्तत्साधने सर्वभावेन मनो निदधे।

तन्त्रसाधना

१८६१-खृष्टाब्दस्य एकस्मिन् शुभे रमणीये च विभाते काचित् ब्राह्मणवर्णजा काषायाम्बरपरिधाना परमसुन्दरी भैरवी दक्षिणेश्वरमागमत्। श्रीरामकृष्णं दृष्ट्वैव साबुध्यत—"नूनमयम् अनुपमदैवसम्पद्विमण्डितः।" श्रीरामकृष्णोऽपि सरलबालकवत् आन्तरा एव सर्वाः कथास्तस्यै प्रकाशयामास। सा भैरवी श्रीरामकृष्णस्य भावसमाधौ मुहुर्मुहुर्बाह्यचैतन्यलोपं संकीर्तने च परमोल्लासं लक्षितवती। तस्यामवस्थायां तस्य यानि शारीर-मानस-लक्षणानि प्रकटितान्यासन् तानि श्रीचैतन्यदेवस्यापि अभूवन्। महाप्रभोर्भावलक्षणानि वैष्णवग्रन्थेषु वर्णितानि दृश्यन्ते। उभयोः सादृश्यं लक्षयन्ती सा मुक्तकण्ठमघोषयत्—"इदानीमेकस्मिन्नाधारे (श्रीरामकृष्णशरीरे) श्रीचैतन्य-नित्यानन्द-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

योराविर्भावो जातः।" सा ब्राह्मणी एतदपि दृढ़कण्ठमाकलयत्—"शास्त्र-प्रमाणेनाहं मत्सिद्धान्तं स्थापयितुं पण्डितैः साकं विचारार्थमुद्युक्ता।" एतच्छ्रुत्वा कौतूहल-परवशः श्रीरामकृष्णः पण्डितसभाह्वानार्थं श्रीमथुरानाथ-मनुरुरोध। श्रीमथुरनाथस्य व्यवस्थापनेन बाँकुड़ामण्डलान्तर्गतस्य इँदेशा-भिधानस्य स्थानस्य तान्त्रिकसाधकः पण्डित-गौरीनाथ-तर्कभूषणः कलिकाता-वास्तव्यो वैष्णवशास्त्रनिष्णातो वैष्णवचरणश्च विचारसभायां समवेतौ बभूवतुः; अन्ये च विद्वज्जना उपस्थिता आसन्। विचारस्तु अधिकदूरं न प्रासर्पत्। वैष्णवचरणो भैरव्याः सर्वसिद्धान्तानाम् अवितथत्वमङ्गीकुर्वन् विघोषितवान्—"भक्ति-शास्त्राणि येषामेव प्रधान-भूतानाम् ऊनविंशति-प्रकाराणां भावानां सम्मेलनं 'महाभावे'ति निर्दिशन्ति, तेषामेव सर्वाणि लक्षणानि श्रीरामकृष्णे प्रकाशितानीति मे मतम्। एतावता कालेन महाभावोऽयं केवलं श्रीराधिकायां श्रीचैतन्यदेवे च प्रकटित आसीत्।" श्रीरामकृष्णेन पृष्टो गौरीकान्त-पण्डितः वैष्णवचरण-सिद्धान्तविषये सुस्पष्टदृढ़तयाह—"किं वैष्णवचरणो भवन्तमवतारं व्यपदिशति? तर्हि क्षुद्रैव कथा तेनोच्यते। ममैव तावद् धारणा—यस्यांशतः प्रतियुगमवतारा लोककल्याणसाधनार्थं जगति अवतीर्णा भवन्ति, यस्य च शक्त्या ते तदेव कार्यं साधयन्ति, भवान् स एव।" बालकस्वभावः श्रीरामकृष्णो हसन्नशंसत्—"युष्माभिरेतदुच्यते; अहं तु किमपि न जानामि।" श्रीरामकृष्णस्य दिव्यसङ्गगुणात् उत्तरकाले गौरीकान्तस्य अन्तरे तीव्रो वैराग्या-नलः प्राज्वलत्। स श्रीरामकृष्णाशिषं शिरसि धारयन् अचिरेण संसारबन्धनं छित्त्वा विविक्तप्रदेशे साधनभजनेषु निमग्नोऽभूत्।

श्रीरामकृष्णेन कृत्स्नशस्तन्त्रसाधनं कारयितुमनाः प्रज्ञाभास्वरा परम-सिद्धा भैरवी ब्राह्मणी तान्त्रिक-क्रियोचितं सुदुर्लभं वस्तुजातं नानास्थानतः समाहृतवती। चित्रक्रियाकलापैः प्रतनूनि तत्त्वानि स्वशिष्याय प्रदेयानीति सा श्रीरामकृष्णस्य तन्त्रदीक्षायां कृतादरा जाता। सर्वाण्येव तान्त्रिकसाधनानि सान्द्रनिशीथे करणीयानि आसन्। श्रीरामकृष्णोऽपि जननीसंकाशाया भैरव्या निर्देशं शिरसि धारयन् तन्त्रसाधनाम्बुधौ निमग्नोऽभूत्। एतत् साधनमभि-लक्ष्यासौ वदन्नास्त—

"तद्दशायां मनसोऽसम्भावित-तन्मयत्वहेतोर्मालिकया जपन्नेव समाधिस्थोऽभवम्; तान्त्रिक-क्रियाणामपि फलानि सम्यक्तया प्रत्यक्षीकृतवान्। तत्समये दर्शन-परम्परा अनुभूति-परम्परा च मे सञ्जाते; कति नाम अद्भुतभावा मया प्रत्यक्षीकृता इति वा परिच्छेत्तुं न शक्यम्। विष्णुक्रान्तायां चतुःषष्टि-स्तन्त्राणि प्रचलितान्येव; तेषु यानि यानि साधनानि वर्णितानि तान्येव कृत्स्नशो ब्राह्मणी मयानुष्ठापयत्। दुश्चराण्येव तान्याचरतां साधकानां

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बहुशः पथभ्रंशो जायते। मया तु जगदम्बिकायाः कृपया सर्वाण्येव तानि उत्तीर्णानि।"

दक्षिणेश्वर-साधनपीठे श्रीरामकृष्णेन कस्याश्चिन् नार्या गुरुत्वेन वरणम्, निजधर्मपत्न्याः षोड़शी देवीति आराधनम्, मातृभावेन च साधनम्—ननु किं नेतैर्वर्तमान-युगस्य नारीसमाजस्य प्रगतिरेव सूच्यते?

प्रस्फुटितेष्वेव प्रसूनेषु सर्वदिग्भागतो मधुरसिका अलयः समुद्भ्रान्ताः समागच्छन्ति। दक्षिणेश्वर-तपोवने श्रीरामकृष्णस्य सौरभ्यसमृद्धे अध्यात्म-जीवनपुष्पे विकसित एव कति नाम विद्वांसः सिद्धसाधका योगिनो भक्ता नाना-सम्प्रदायानाञ्च सन्न्यासिनो दूरातिदूरतो धावमाना इव समायान्ति। सर्व एव अद्भुतस्यास्य भावोन्मादस्य महामानवस्य दिव्यसाहचर्यं ज्ञान-गर्भानुपदेशांश्च लभमाना जन्मसाफल्यं गताः। पूर्वोक्त-गौरीकान्त-वैष्णवचरणौ मुक्त्वा पण्डितो जयनारायणो, राजपुतानावास्तव्यः षड्दर्शननिष्णातः सुपण्डितो नारायण शास्त्री, वर्धमानराज-सभापण्डितः विश्रुतनामा नैयायिकवर्यः पद्मलोचन-तर्कालंकारः—अपरे च बहवो विद्वज्जनाः श्रीरामकृष्णस्य अध्यात्म-ज्ञानपूतस्य जीवितस्य दिव्यसंस्पर्शेन कृतार्था अभवन्।

१८६४-खृष्टाब्दस्य एकस्मिन्नहनि जटाधारीति सुगृहीतनामा कश्चित् श्रीरामभक्तः साधको भारतवर्षस्य विभिन्नतीर्थानि पर्यटन् दक्षिणेश्वरं प्राप। साधकोऽसौ नैरन्तर्यसेवित-निष्ठा-भक्तिभ्यां रामलालेति श्रीविग्रहस्य सपर्यां विदधानो बालक-रामचन्द्रस्य भावघनां मूर्तिं प्रत्यक्षीकृत्य कृतार्थताम-गमत्। भावराज्य-सार्वभौमाधीश्वरः श्रीरामकृष्णो दिव्यदृशा अस्य तावत् निगूढं रहस्यं सम्यग् अवाबुध्यत।

अचिरादेव श्रीरामकृष्णो जटाधारिणः सविधे राममन्त्रेण दीक्षितः सन् वात्-सल्यभावसाधनायाः परां कोटिं गतः; सममेव श्रीरामचन्द्रस्य ज्योतिर्घन-शिशुमूर्तिं संदृश्य परानन्दं लेभे। रामलालेति यस्तमुद्दिश्य श्रीरामकृष्णोऽ वदत्—"अपश्यम्, परमार्थत एवापश्यम्—रामलाला मत्सहचरः कदा ममाग्रतः, कदा वा मत्पश्चात् नरीनृत्यमान आयाति नाम। कदा वा मदुत्सङ्गमारोढुं निर्बन्धातिशयं दर्शयति। कदा पुनरहं तमुत्सङ्गे उपवेश्य स्थितः—परं स कथमपि मत्क्रोड़े न स्थास्यति। क्रोड़ादवतीर्य रौद्रे धावनादिकं कुर्यात्, कण्टक-वनं वा प्रविश्य पुष्पाणि चिनुयात्, गङ्गाम्भो वावतीर्य जलोत्क्षेपणादिकं कुर्यात्। यावदहं वारयामि'—'रे एवं मा कुरु, आतपात् चर्मस्फीतिः स्यात्। रे एतावत् जलं मा घट्टय, शीतेन ज्वरो भवेत्।' स तत् किं शृणोति? कः कं वदतीति न निश्चयः। मन्ये, पद्मपलाशवत् सुन्दरेण चक्षुर्द्वयेन मामभि निरीक्ष्य मृदुचञ्चलं स्मयितुं प्रक्रमते, अधिकतरं वा अविनयं कर्तुमारभते,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ओष्ठद्वयं वा फुल्लीकृत्य मुखविरूपतां दर्शयन्नास्ते। तदा यथार्थत एव रोषं कृत्वावदम्—'तर्हि रे जाल्म, तिष्ठ, अद्य त्वां प्रहृत्य अस्थि ते चूर्णयामि।' एवमातपाज् जलाद्वा तं प्रसह्य आकर्षामि ; पुनः अनेन वा अमुना वा प्रलोभ्य गृहमध्ये क्रीड़नार्थं वदामि च। पुनस्तस्य दौरात्म्यं कथमपि निवृत्तं न भवतीति पश्यन् तस्मै चपेटं ददामि। प्रहृतः सन् स सुन्दरं ओष्ठद्वयं फुल्लीकृत्य सजलनयनो मां निरीक्षते! तदा पुनर्मे मनसि कष्टमभूत्, क्रोड़े कृत्वा कियद्वा आदृत्य असान्त्वयम्। एतत् सर्वं तत्त्वत एवापश्यम्, अकरवम्। एकदा स्नातुं गच्छन्नासम्, अहमपि गमिष्यामीति स निर्बन्धं कृतवान्। निरुपायः सन् तमपि सङ्गे नीतवानहम्। ततो जलात् कथमपि उत्तीर्णो नाभूत् ; मद्वचनं स कथमपि नाशृणोत्। शेषे रोषं गतोऽहं तं जले मज्जयित्वावदम्, 'अधुना यथेच्छं जलघट्टनं कुर्वि'ति। अथ सत्यमेव मया दृष्टम्—स जलाभ्यन्तरे रुद्धश्वासो जात इति। तदा तस्य कष्टमवलोक्य किं मयानुष्ठितमिति वदन् तं क्रोड़े कृत्वा जलादुत्थाप्य नीतवानासम्।"

अतःपरं श्रीरामकृष्णो मधुररसाश्रिते मुख्यभाव-साधने मनो निवेशयामास। अस्मिन् मधुरभावसाधने प्रवृत्तः श्रीरामकृष्णः स्त्रीजनोचितं वेषं धृतवान्। एवं सज्जितोऽसौ श्रीकृष्णप्रेमाकांक्षिनीनां व्रजरमणीनां भावेन क्रमश एतादृक् निमग्नो जातो यत् पुरुषोऽहमिति बोधस्तस्य तिरोहितो बभूव। श्रीमत्या राधिकायाः कृपामृते श्रीकृष्णदर्शनमसम्भावितमिति जानन् श्रीरामकृष्णस्तद्-गतचित्तेनाधुना तस्या उपासनायां प्रवृत्तोऽभूत्। श्रीराधिकायाः प्रेमघनमूर्त्याः स्मरण-मनन-निदिध्यासनेषु अनिशं निमग्नः सन् तस्याः श्रीपादपद्मयोः स्वहृदयस्य आकुलावेगं निवेदयितुम् प्रक्रमते स्म। अचिरादेवासौ श्रीमत्या राधिकाया दर्शनमासाद्य चरितार्थो जातः। तदनन्तरं श्रीरामकृष्णः कियत्कालं स्वात्मानं श्रीराधिकेति निरन्तरमुपलब्धवान्। स्वल्पकालात् परमेवासौ सच्चिदानन्द-घन-विग्रहस्य भगवतः श्रीकृष्णस्य पुण्यमेव दर्शनमुपलभ्य धन्यतां जगौ। तत्-कालघटनमधिकृत्य श्रीरामकृष्णो वदन्नास्त—'तदाहं श्रीकृष्णचिन्तया कृत्-स्नशस्तन्मयो भवन् पृथगस्तित्वबोधविहीनः कदा स्वात्मानं भगवान् श्रीकृष्ण इति अबुध्ये, कदा वा आब्रह्मस्तम्बपर्यन्तं समग्रं जगत् श्रीकृष्णविग्रहरूपेण अनुभूतवान्।'

अद्वैत-साधना

भावसाधनायाः सर्वोच्चभूमिमारूढः श्रीरामकृष्ण इदानीं सर्वभावातीतस्य 'अवाङ्मनसगोचर'स्य 'एकमेवाद्वितीयम्' इत्यस्य निर्गुणस्य निराकारस्य परमब्रह्मण उपलब्ध्यर्थं प्रवलामेकां प्रेरणामनुभूतवान्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एवं साधन-चतुष्टय-सम्पन्नस्य श्रीरामकृष्णस्य मनसि अद्वैतसाधनार्थमुपयुक्तक्षेत्रीभूते सत्येव प्रख्यात-दशनामि-सन्न्यासि-सम्प्रदाय-भूक्तः परिव्राजकाचार्यः श्रीमत्स्वामी तोतापुरी पुण्यपीठात्मकं दक्षिणेश्वरं समाजगाम। तत्र श्रीरामकृष्णस्य सारल्यपूर्णां प्रोज्ज्वलां मुखकान्तिं निरीक्ष्यैवासौ ब्रह्मविद्वर्यो नूनमेकोऽद्वैतसाधनस्य उत्तमाधिकारी पुरतो मे वर्तत इति समर्थयामास। अतः श्रीमत्तोतापुरी श्रीरामकृष्णं तच्छिष्यत्वपरिग्रहार्थमाहूतवान्। सर्वभावेन भवतारिण्या जगन्मातुर्मुखापेक्षो बालकस्वभावः श्रीरामकृष्णोऽपि तदनुज्ञामुपलभ्य तोतापुरीमहाराजस्य शिष्यत्वमगृह्णात्। ततो यथाशास्त्रमात्मक्षाद्धादिकं समाप्य विविक्तगम्भीरे ब्राह्ममुहूर्ते पञ्चवटीसमीपस्थे कुटिरे प्रज्वलति होमाग्नौ आहुति-प्रदानपूर्वकं सर्वस्वत्यागात्मकं सन्न्यासव्रतं गृहीतवान्, सम्प्रदायोचितानि नामचिह्नादीनि च धृतवान्। श्रीरामकृष्णो गुरूपदेशं हृदि सम्यग् धारयन् दृढ़सङ्कल्पेन स्वीयं मनः शनैः शनैः नामरूपात्मकात् द्वैतभूमेरूर्ध्वे ब्रह्मस्वरूपे न्यवेशयत्; एवमसौ निर्विकल्प-समाधौ विलीनोऽभवत्। दिवसत्रयं श्रीरामकृष्णमेवं सिद्धासने समासीनं दृष्ट्वा समाधितत्त्वज्ञस्तोतापुरी सहर्षं जगाद—'किमेतन्नाम! का तावत् दैवी माया संवृत्ता! किमसौ निर्विकल्पसमाधिमारूढः! अस्मात् परं क्रमेण निर्विकल्पसमाधेर्व्युत्थितः सन् श्रीरामकृष्णः श्रद्धावनतशिरसा विस्मितपुलकितस्य श्रीगुरोस्तोतापुरी-महाराजस्य पादौ ववन्दे।

शिष्यस्य अभूतपूर्वाम् आध्यात्मिकीं प्रतिभां दृष्ट्वा तस्य च सप्रेम्णा सश्रद्धेन व्यवहारेण विमुग्धः सन् तोतापुरी दक्षिणेश्वर-तपोवने एकादशमासान् यापितवान्। निर्भीको बलिष्ठदेहोऽयं महातपस्वी विद्याऽऽविद्यास्वरूपाम् माहेश्वरीमाद्यां शक्तिं शुद्धाद्वैतसाधनमार्गे कदापि नाङ्गीचकार। परन्तु महामायाया अनभ्युपगमात् सृष्टि-स्थिति-प्रलयाणां निगूढ़रहस्यस्य कथमुद्भेदः स्यात्? मन्ये तावत्, सन्न्यासिप्रवरस्यास्य ज्ञानस्य परिपूर्णता-सम्पादनार्थमेव तस्य द्रढ़िष्ठ-बलिष्ठ-देहेऽपि अकस्मात् कश्चिद् दुरारोग्यो व्याधिराविर्बभूव। आत्मज्ञाने सम्यग् अवाप्तप्रतिष्ठो यतिराजोऽसौ व्याधेः कमपि उपशमं नाद्राक्षीत्; अतोऽकिञ्चित्करम् आत्मदेहं भागीरथीसलिले विस्रष्टुमना एकदा यामिन्या अन्तिमयामे तस्यां निमज्जितुं प्रयत्नं कृतवान्; परन्तु कृतकार्यो नाभूत्। तदा विमूढ़-विस्मित्या भावनामापेदे—"केयं दैवी माया! निमज्जनेन मर्तुमपि नाशक्नवम्! नद्यां तावदपि जलं नास्ति। अहो! ईश्वरस्य कीदृशी अपूर्वा लीला!"

सहसा तोतापुरी-महाराजस्य अन्तश्चक्षुषः पुरतः विश्व-प्रपञ्चस्य उपरिभागतः किञ्चिद् दुर्भेदमावरणं स्खलितमभवत्। विस्मयविह्वलोऽसौ परि-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लक्षितवान्—कश्चिद् अगाधः, अपारः, अनन्त-शक्तिसमुद्रः—विचित्रलीलाभिरसौ तरङ्गभङ्गचपलः, निश्चलः निष्क्रियश्च। प्रशान्तदशायां यदेव ब्रह्म, लीलावस्थायां सैव जगज्जननी महाशक्तिर्माता। सृष्टि-स्थिति-प्रलयाः—एते खलु महाशक्तेर्महामायाया लीलानाट्यस्य नित्यनवपटावर्तनानि नाम! प्रशान्त-सरसीवक्षसि फेन-बुद्बुद-तरङ्गाणामुत्थानपतनवत् अपरिसीम-चिदम्बुधौ असंख्यातकोटिवैचित्र्याणां सृष्टिप्रलयरूपेण तस्या एव महाशक्तेश्चिरन्तना-भिनयः प्रचलत्येव। मधुरं भयङ्करञ्च, सुन्दरं कुत्सितञ्च, सुखं दुःखञ्च, आलोकोऽन्धकारश्च—सर्वद्वन्द्वमयीरूपेण विभाता काचिद् अचिन्त्य-शक्तिरेव प्रतिनियतं नूतनं पुरातनं, पुरातनञ्च नूतनं विधातुमास्ते। एकस्या एव विचित्रविजृम्भणम्! नानारूपैः, नानानामभिः एकस्या एव चिन्मयसत्ताया लीलाप्रतिभासः! एकस्मिन्नेव आधारे शिवः शक्तिश्च; अतो वेदान्तादिशास्त्रेषु निगद्यते—'शक्तिशक्तिमतोरभेदः।' अनधिगतेयमनुभूतिः श्रीमत्तोतापुरी-महाराजस्य अद्वैतज्ञानं पूर्णाङ्गत्वं प्रापितवती। संहृष्टान्तरात्मा उपशान्तरोगः परमवैदान्तिकोऽसौ आत्मविदं शिष्यमापृच्छत।

इसलाम-खृष्टधर्मयोः साधना

अद्वैतभूमिं समारूढस्य श्रीरामकृष्णस्य विशुद्ध-सुशान्तं मन एकस्य समुन्नतोदारभावस्य रङ्गभूमित्वमवाप। स सर्वधर्माणां निगूढतत्त्वानि आत्मजीवने प्रत्यक्षीकर्तुं कृतप्रयत्नो बभूव। १८६६-खृष्टाब्दस्य अन्तिमभागे भगवान् श्रीरामकृष्णः सुफिसम्प्रदायस्य गोविन्दराय-सकाशात् ऐसलामीय-दीक्षां गृहीतवान्। अतो वत्सरत्रितयमध्ये स श्रीमहम्मदस्य दिव्यदर्शनमुपलभ्य इसलामधर्मस्य तत्त्वानि संबोद्धुं शशाक। श्रीरामकृष्ण एवमभाषत—"मन्ये, हिन्दु-मुसलमानयोर्मध्ये किञ्चित् पर्वतप्रमाणं व्यवधानं वर्तते। तयोः चिन्ता-प्रणाली धर्म-विश्वासः कार्यकलापश्च.....परस्परसविधे अशेषतो दुर्बोधा-स्तिष्ठन्ति।" व्यवधानमेतत् दूरीभूतं स्यात्, हिन्दुमुसलमानाश्च भ्रातृभावेन संबद्धा भवेयुरिति श्रीरामकृष्णस्य मुसलमानधर्मसाधनस्य अन्यतममुद्देश्यमिति बोधे विलम्बो न भवति।

अत्रैव निखिलधर्ममतानां साधनस्य परिसमाप्तिर्नाघटत। श्रीरामकृष्णः कलिकातायाः सिन्दुरियापटिनामक-पल्लीनिवासिनो ब्राह्मभक्तस्य दानशौण्डस्य श्रीयुक्त-शम्भुमल्लिक-महोदयस्य सकाशात् खृष्टीयधर्मग्रन्थस्य 'बाइबेल'स्य पाठं समाकर्णयत्। तदनन्तरमसौ खृष्टीयधर्मतत्त्वं प्रत्यक्षीकर्तुं स्वमनसि सुतीव्रा-माकाङ्क्षामनुभूतवान्। एकदासौ दक्षिणेश्वर-कालिकायतनस्य अत्यन्तिके वर्तमानस्य श्रीयुक्त-यदुलाल-मल्लिकस्य उद्यानवाटिकाया उपवेशन-प्रकोष्ठे

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आसीन आसीत्। तत्र कुड्ये लम्बमानानाम् अनेकेषां चित्राणां मध्ये एकस्मिन् मातृक्रोड़मारूढ़स्य भगवतो बाल-यीशुखृष्टस्य मूर्तिं दरीदृश्यमानस्तन्मयत्वमवाप्य श्रीरामकृष्णस्तस्य दिव्यजीवितस्य विचित्रकथां चिन्तयामास। अकस्मादसौ दृष्टवान्—यीशुखृष्टदेवस्य देहात् किञ्चिज्ज्योतिर्निर्गत्य तस्यैव देहाभ्यन्तरं प्राविशत्। एतेन श्रीरामकृष्णस्य चिरपोषिता ब्राह्मण्यसंस्कारा आमूलं परिवर्तिता अभवन्। भावतरङ्गेणासौ दिवसत्रयमभिभूतो बभूव। तदनन्तरं पञ्चवटीसमीपतो भ्रमन् कारुण्यप्रतिकृतिं कञ्चन देवमनुजमपश्यत्। तस्य साक्षात्कारमुपलभ्यासौ बुबुधे—अयमेव परमप्रेमावतारो भगवान् यीशुखृष्टः, यो जीवोद्धारहेतोरशेषसुदुःसहानि दुःखानि यदृच्छया निर्विकारचित्तेन च सहमानः परिणामे आत्मजीवितमुत्ससर्ज। श्रीरामकृष्ण एवं द्वन्द्वसंघात-मुखरे विशालविश्वे सर्वान् प्रेमबन्धनेनाबन्धनार्थं सर्वधर्माणां समन्वयात्मकं 'यावन्ति मतानि तावन्तः पन्थान' इति किञ्चिदभूतपूर्वम् अच्छेद्यं मिलनसूत्रमाविष्कृतवान्।

जन्मभूमि-दर्शनम्

सुदीर्घसमयं कृच्छ्राचरणात् श्रीरामकृष्णस्य देहः क्रमेण विशीर्णो जातः। स मथुरानाथस्य अन्येषाञ्च हितैषिणामनुरोधतः १८६७-खृष्टाब्दस्य 'मे'-मासि स्वास्थ्य-विधानार्थं जन्मभूमिं कामारपुकुरमागमत्। तेन सार्धं तन्त्र-साधन-नायिका भैरवी ब्राह्मण्यपि तत्राजगाम। श्रीरामकृष्णस्य धर्मपत्नी श्रीसारदा-देवी तदा चतुर्दशवर्षीया आसीत्। श्रीरामकृष्णः शिक्षादिकं विधाय तस्याः सर्वाङ्गीणकल्याणसाधने बद्धपरिकरो जातः। श्रीमत्-तोतापुरी श्रीरामकृष्णं कृतोद्वाहं विज्ञाय एकदावोचत्—"पत्न्यां समीपवर्तिन्यामपि यस्य त्याग-वैराग्य-विवेक-विज्ञानानि सर्वतोऽक्षुण्णानि अवतिष्ठन्ते, तेनैव तत्त्वतो ब्राह्मी स्थितिर्लब्धा। स्त्रीः पुरुषांश्च प्रति यः समदर्शनः सन् तान् आत्मस्वरूपानुपलभ्य व्यवहरति, तस्यैव यथार्थत एव ब्रह्मविज्ञानं सम्पन्नम्।"

पूर्वमेवोक्तं यत् कामारपुकुरं समागत्य श्रीरामकृष्णः स्वधर्मपत्नीं प्रति शिक्षादान-प्रभृतीनि आत्मकर्तव्यानि समाचरत्। एतेन श्रीरामकृष्णस्य आध्यात्मिक-जीवितस्य अनिष्टं भवेदित्याशङ्क्य भैरवी ब्राह्मणी विचलिताभवत्, स्वल्पकारणेनैव च सा संरब्धा सती श्रीसारदादेवीमन्यांश्च परिजनान् प्रति विसदृशाचरणं कुर्वत्यास्त। परमकारुणिको भगवान् सम्यक्तया बोद्धुं शशाक—भैरवी मायावशगा विभ्रान्ता सती एवं भ्रमप्रमादयोः पतितवतीति। विवेकविशुद्धमतिः परमसाधनशीला भैरवी अचिरादेव आत्मनो भ्रममुपलब्धुं

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शक्ताभूत्। कस्मिंश्चित् शुभेऽहनि सा स्वग्रथितपुष्पमाल्येन प्राणप्रतिमं श्रीरामकृष्णं विभूष्य श्रीगौराङ्ग-बुद्ध्या तस्य पादौ ववन्दे। एवं दुश्छेद्यस्नेहबन्धनं छित्त्वा सा विश्वस्य उन्मुक्तप्राङ्गणे निर्बाधं विचरितुं प्राक्रमत। प्रव्रजनशीलासौ काशीधाम्नः प्रशस्तपथेन निर्गताभूत्। एवं श्रूयते—सा जीवनस्य अन्तिमभागं भगवतः श्रीकृष्णस्य लीलानिकेतन-ब्रजपुर्यां परमानन्देन अतिवाहयन्ती महायोगेन आत्मलीलां संवरयामास। भगवान् श्रीरामकृष्णः कामारपुकुरे परममुदा माससप्तक-कल्पम् अति-वाह्य हृदयरामेण साकं पुनरात्मसाधनपीठं दक्षिणेश्वरं प्रत्याजगाम।

तीर्थपर्यटनम्

१८६८-खृष्टाब्दस्य २७-जानुयारी-दिवसे मथुरानाथः सपत्नीकः शताधिक-परिजनैः साकं उत्तरपश्चिमविभागस्थित-तीर्थानि द्रष्टुमनाः कलिकाताया निरगात्। स हृदयरामसहायं श्रीरामकृष्णमपि निनाय। एकैकशो वैद्यनाथ-धाम-वाराणसी-प्रयाग-श्रीवृन्दावन-मथुराप्रभृतीनि मुख्यानि तीर्थक्षेत्राणि संदृश्य ते सर्वे परम मोदं लेभिरे। तेनैव तीर्थपर्यटनव्यपदेशेन महान् मथुरा-नाथो मुक्तहस्तं प्रभूतानर्थान् महार्घाणि वस्तूनि च ब्राह्मणादिभ्यः प्रायच्छत्।

वाराणस्यां श्रीवृन्दावनधाम्नि चावतिष्ठमानस्य श्रीरामकृष्णस्य नानाविधानि दिव्यदर्शनानि अलौकिकोपलब्धयश्च समजनिषुः, असौ वाराणसीं प्रविशन्नेव भावदृष्ट्यापश्यत्—शिवपुरी वाराणसी सुवर्णनिर्मिता इति। "युग-युगान्तराणि यावत् साधुभक्तानां चामीकरसमुज्ज्वला महार्घा भावराशयः स्तरविन्यासेन पुञ्जीभूता घनीभूताश्च अस्या नगर्या वर्तमानाकारेण प्रकाशमाना आसते! सैव ज्योतिर्मयी भावघनमूर्तिरस्या नगर्य्या नित्यसत्यरूपम्—परं बहिर्यद् दृश्यते तत् तस्या एव चैतन्यमूर्तेः छायामात्रम्। भारतस्य त्रिंशत्कोटिदेश्यानां मानवानां भक्तिभाव एतावन्तं कालं यत् प्रकारेणानेन अस्यामेव नगर्यां सम-भावेन मिलितः सन् अस्या एव चैत्यन्यमूर्तेरेतादृशं बहिःप्रकाशमानीतवान् तच्चिन्तयतः कस्य न मनः स्तब्धं स्यात्?"

अपरेद्युः श्रीरामकृष्णो मणिकर्णिकादीनि वाराणसीतीर्थाङ्गानि द्रष्टुकामो नावा मणिकर्णिकाघट्टस्य पुरतः समागतोऽभूत्। सहसासौ किमपि पश्यन्निव रोमाञ्चितकलेवरो नौप्रान्तदेशमागम्य स्थैर्यमालम्ब्य निश्चेष्टभावेन दण्डाय-मानोऽभूत्। तन्मुखे तदा अपूर्वं दिव्यज्योतिः, अधरप्रान्ते च सुमधुरं स्मितं—भावावेशेनासौ समाधिस्थः! भावोपशमे सम्प्राप्ते स्थानान्तरमुपस्थितः सन्नसौ मथुरानाथप्रभृतीन् तद्दर्शनमन्तरेण वक्तुं प्राक्रमत—"पिङ्गलवर्णो जटाधारी

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दीर्घाकृतिः श्वेतकायः कश्चित् पुरुषो गम्भीरपादविक्षेपं श्मशाने प्रत्येक-चिता-पार्श्वतः समागत्य प्रत्येकदेहिनं सयत्नमुत्तोल्य तस्मै तारकब्रह्ममन्त्रं प्रयच्छन्नासीत्। सर्वशक्तिमयी श्रीश्रीजगदम्बापि स्वयं महाकालीरूपेण जीवस्या-परपार्श्वतः तच्चितायामेव उपविशन्ती तस्य स्थूल-सूक्ष्म-कारणात्मकाणि सर्वाण्येव संस्कारबन्धनान्युन्मुच्य निर्वाणद्वारं निरर्गलं विधाय स्वहस्तेनैव तमखण्ड-सद्मनि प्रहिणोति। एवं बहुकालनैरन्तर्यासेवितयोगतपसा योऽद्वैतानुभव-भूमानन्दो जीवान्तिके समुपस्थितो भवति, श्रीविश्वनाथस्तं सद्य एव जीवाय प्रदाय तं कृतार्थीकुर्वन्नास्ते।"

काशीधाम्नि अवस्थानावसरे श्रीरामकृष्णः प्रायशः प्रत्यहमेव श्रीविश्वनाथ-दर्शनार्थं गच्छति स्म ; एतेनास्य भावावेशोऽपि समजनि। देवस्थानादीनि ऋते श्रीरामकृष्णो लोकख्यातान् साधु-सन्न्यासिनश्च संपश्यन् प्रभूतं प्रमोदमवाप। परमहंस-मौलिमणिः श्रीमत्-त्रैलङ्गस्वामि-पादस्तदा मौनमवलम्ब्य मणिकर्णिका-घट्टे अवातिष्ठत। तद्दर्शनानन्तरं श्रीरामकृष्णो जगाद—"दृष्टमेतत्, साक्षाद् विश्वनाथस्तच्छरीरमाश्रित्य प्रकाशमानो वर्तते। तस्यावस्थानेन काशी उज्ज्वला सती सन्तिष्ठते। तस्य खलु उत्तुङ्गज्ञानावस्था। इङ्गितेनाहम-प्राक्षम्, "ईश्वर एक अनेको वा ?" पुनरहमिङ्गितेन बोधितः—"समाध्यवस्थाया-मेकः ; परं यावत् 'अहम्' 'त्वम्' 'जीवः' 'जगत्' इत्यादि ज्ञानमस्ति, तावत् अनेकः।" तमेव लक्षयन् हृदयराममवदम्—"एषैव यथार्थ-परमहंसावस्था व्यप-दिश्यते।"

काशीधाम्नि कियन्तं कालं यापयित्वा मथुरानाथसहचरः श्रीरामकृष्णो भगवतः श्रीकृष्णस्य लीलानिकेतनं श्रीवृन्दावनधाम द्रष्टुमागच्छत्। तत्र निधु-वनाभ्याशे कस्याञ्चित् वाटिकायामसौ अवातिष्ठत। श्रीवृन्दावनस्य पूर्वां शोभां निरीक्ष्य युगयुगान्तरस्मृतिस्तस्य मानसपटे जाज्वल्यमानाभूत्। सैव यमुना अद्यापि तरङ्गभङ्गेन कलं शब्दायमाना नृत्यरता सती चञ्चल्यते। त एव नीलतमालराजयः, तदेव नीपवनम्, अद्यापि प्रतिकुञ्जं पुञ्जीभूताः भ्रमराः भ्रमर्यश्च कृष्णगुणगाने प्रमत्ताः। उच्छ्रितपुच्छाः शिखिनः पुलकेन पक्षान् प्रसार्य विचित्रभङ्ग्या नृत्यन्ति। गोपगोपीनां पदाङ्कपूतं रजोऽद्यापि श्रीकृष्णस्मृतिं वहदास्ते। कास्तावत् शताब्द्यः अतीतकुक्षौ विलीनाः ! परं व्रजस्य जीवित-धारा अधुनापि तुल्यभावेनैव सावलीलच्छन्दसा प्रवहन्ती वर्तते। वृन्दारण्यस्य वृक्षाः, लताः, वनानि, उपवनानि, मन्दिराणि च संपश्यतः श्रीरामकृष्णस्य आन्तरः प्रेमसिन्धु-रुद्वेलो जातः, श्रीकृष्णचन्द्रस्य च विचित्रलीलां भावनयनेन निरीक्ष्यासौ प्रतिक्षणं समाधिमापन्नो बभूव।

यथा काश्यां तथा वृन्दावनेऽपि श्रीरामकृष्णः कांश्चित् वैराग्यवतः साधकान्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तपोनिरताः साधिकाश्च दृष्टवान्। निधुवने षष्टिवर्षीया सिद्धसाधिका गङ्गामाता श्रीरामकृष्णं श्रीराधिकां मन्यमाना समाद्रियत ; दुलालीति नाम्ना च तमाकारयत्। श्रीरामकृष्णोऽपि अस्याः प्रवीणायास्तपस्विन्याः कृष्ण-प्रेम्णा सातिशयं विमुग्धः सन् वृन्दावन एव आत्मजीवितस्य शिष्टदिवसान् यापयितुं मनश्चकार। किन्तु वृद्धाया जनन्याश्चन्द्रमणिदेव्याः कथायां स्मृति-पथमायातायां स वृन्दावनवास-सङ्कल्पं जहौ। एवं मासचतुष्टयकल्पकालं विभिन्नानि तीर्थस्थानानि पर्यटन् मथुरानाथमहोदयेन साकं श्रीरामकृष्णो दक्षिणेश्वरं पुनरावर्तत। स वृन्दावनधाम्नः समानीतं रजः स्वहस्तेन पञ्च-वट्यां विकिरन्नवादीत् : "अद्य प्रभृति स्थलमिदं श्रीवृन्दावनतुल्या देवभूमिः सञ्जाता।" श्रीरामकृष्णो भूयोऽपि १८७१-खृष्टाब्दे समथुरानाथस्तीर्थाटन-व्यपदेशेन कालना-नवद्वीप-प्रभृतीनि स्थानान्यपि जगाम। कालनाभूमौ श्रीचैतन्यपदाश्रितेन वैष्णवकुलचूड़ामणिना भगवानदास-बाबाजी-महोदयेन भगवत्-प्रसङ्गं कुर्वन्नसौ भावावेशनिमग्न आनन्दप्रमत्तश्च जातः। नवद्वीपधाम्नि श्रीरामकृष्णो भावनेत्राभ्यां बालकवेषं मनोहरकान्तिं श्रीगौराङ्गं प्रभुपाद-श्रीनित्यानन्दञ्च आत्मदेहं प्रविशन्तौ दृष्टवान्। एतेन तीर्थभूम्या माहात्म्य-मनुभवन् नितरां पुलकाञ्चितदेहो बभूव।

एवं श्रीरामकृष्णं सेवमानस्य तस्य च दिव्यसङ्गे निवसतो मथुरानाथस्य षोड़शवर्षकल्पकालो व्यतीतः। श्रीरामकृष्णस्याहेतुककृपया मथुरानाथमानसं निष्कामभावेन भगवत्प्रीत्या च परिपूर्णं जातम्। तेन आत्ममर्मणि तावद् अनु-भूतं यत्—सङ्कटसमाकुलं संसृतिवारिधिं तितीर्षूणां श्रीरामकृष्ण एव निष्कारणः कर्णधार इति। अतो गुरुपदाम्भोजैकशरणो मथुरानाथः श्रीरामकृष्ण एव कृत्स्नशो निर्भरमाधाय शान्तनिश्चिन्तः संवृत्तः। १८७१-खृष्टाब्दस्य जुलायि-मासि मथुरानाथः सहसा कठिनरोगाक्रान्तो बभूव। मथुरानाथस्य जीवन-प्रदीपो निर्वाणकल्प इति श्रीरामकृष्णो सम्यगबुध्यत। सत्वरमसौ काली-घट्टं समानीतः। श्रीरामकृष्णस्तु अन्तिममुहूर्ते तं द्रष्टुं न गतः। मथुरानाथ-स्यान्तकाले समुपस्थिते श्रीरामकृष्णोऽकस्मादेव समाधिस्थः सन् सूक्ष्मदेहं समाश्रित्य ज्योतिर्मयपथेन मथुरानाथसमीपमव्रजत् ; एवमस्य दिव्यलोका-वाप्तिः श्रीरामकृष्णेन विहिता। मथुरानाथस्य तिरोधानात् श्रीरामकृष्ण-चरित-नाट्यस्य एको विशिष्टः स्मरणीयश्चाङ्कः समाप्तिं गतः।

षोड़शी-पूजा

मथुरानाथस्य देहत्यागात् परं मासषट्ककालो व्यतीतः। श्रीसारदा-देवी अधुना अष्टादशवार्षिकी संवृत्ता। श्रीरामकृष्णस्य कामारपुकुरे

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अवस्थानावसरे श्रीसारदादेवी (श्रीश्रीमातृदेवी) देवमानवस्य पतेः पदप्रान्ते आसीना दाम्पत्यजीवनस्य एकं विमलमादर्शं शिक्षितवती ; तस्य च अलोकसामान्यस्य पवित्रप्रेम्णः संस्पर्शेन तस्या अन्तरं मधुमयं सञ्जातम्। तेनैव शिक्षाक्रमेण सा त्यागतितिक्षाव्रतचारिणी बभूव। सा ईदृशीमानन्द-सम्पदं लभमाना परमतृप्तमानसा पित्रालये चत्वारि वर्षाणि यापितवती। इदानीं दक्षिणेश्वरस्थितस्य स्वामिनस्तावत् का वार्ता ? लोकमुखात् तया श्रुतम्—श्रीरामकृष्ण उन्मत्तवत् नग्नदेहो हरिनाम कीर्तयन्, नृत्यन् गायंश्च विचरति। तच्छ्रवणेन पतिप्राणायाः श्रीसारदाया मनो नितरां व्याकुलं जातम्। पतिं द्रष्टुं तत्सेवायाञ्च आत्मानं नियोजयितुं सा बलवत् सस्पृहा संवृत्ता। तस्याः पिता रामचन्द्र-मुखोपाध्यायः कन्याया मनोभावं सम्यक् बुद्ध्वा तया सह १८७२–खृष्टाब्दस्य मार्च्‌मासि स्वयं पादचारं दक्षिणेश्वरे जामातुः श्रीरामकृष्णस्य समीपं समागमत्। पथि सा दारुणज्वराक्रान्ता सती नितरां कृशा जाता। समभेव श्रीरामकृष्णः सयत्नं तस्याः कृते भैषज्यविधानं कृतवान्। तदा श्रीरामकृष्ण-जननी चन्द्रमणिदेवी सङ्गीतशालामध्युवास; तत्रैवासौ श्रीसारदामवास्थापयत्। श्रीसारदा श्रीरामकृष्णस्य सर्वाङ्गीणस्वस्थतामवेक्ष्य सानन्दा निश्चिन्ता चाभूत्।

एकदा श्रीरामकृष्णः श्रीश्रीमातुः सारदादेव्या मनोभावं जिज्ञासमानः तामपृच्छत्—"किं त्वं मां संसारपथे आक्रष्टुमागता ?" श्रीश्रीमाता धैर्यमालम्ब्य प्रत्यवादीत् : "कथमहं भवन्तं संसारपथे आक्रष्टुमागच्छेयम् ? भवत इष्टपथ एव साहाय्यं विधातुमागता।"

पतिपदसंवाहनरता श्रीश्रीमाता एकदा श्रीरामकृष्णमपृच्छत् : "भवतोऽहं किंविधा प्रतिभामि ?" आत्मारामः श्रीरामकृष्ण ऋजूत्तरं प्रादात्—"या माता मन्दिरे वर्तते सैव शरीरस्यास्य जन्म प्रादात्, अधुनापि च सङ्गीतशालायां वसति ; पुनः सैवाधुना मे पदसेवां विदधाति। साक्षादानन्दमय्या रूपमिति त्वामञ्जसा पश्यामि।"

श्रीश्रीमाता सारदा श्रीरामकृष्णस्य सस्नेह-पर्यवेक्षणेन गृहीतशिक्षा सती गभीर-साधनायां निमग्नाभूत्। एतेन सा विचित्रा आध्यात्मिकीरनुभूतीर्लब्धवती। वर्षीयसीं श्वश्रूमातरं चन्द्रमणिदेवीं, स्वपतिं तस्य च भक्तान् निरन्तरं सेवमाना सा दाम्पत्यजीवनस्य अभिनवमेकमध्यायं रचितवती। तस्मिन्नेव काले श्रीरामकृष्णः १८७२-खृष्टाब्दस्य ५-जुन-दिवसे अमावस्यायां तिथौ स्वशयनकक्षे फलहारिण्याः कालिकादेव्याः पूजायोजनं विधाय श्रीश्रीसारदादेवीमालिम्पन-भूषिते आसने उपावेशयत्। तस्मिन्नेव निस्तब्धनिशीथे दिव्यभावेन भावितां सहधर्मचारिणीं स्वपत्नीं विश्वजननीति ज्ञानेन आराधयता

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीरामकृष्णेन आत्मसाधनयज्ञे तदा पूर्णाहुतिः प्रदत्ता। श्रीश्रीमाता हृदये परिपूर्णां शान्तिं विमलञ्च आनन्दं वहन्ती १८७३-खृष्टाब्दस्य सेप्टेम्बर-मासि श्रीधामकामारपुकुरमावर्तत।

दस्युवर-कथा

श्रीश्रीमातुः कामारपुकुरे प्रत्यागमनात् स्वल्पकालपरमेव श्रीरामकृष्णस्य मध्यमाग्रजो रामेश्वरः अष्टचत्वारिंशद्वर्षवयसि पञ्चत्वमवाप। तस्य तिरोधानात् परं तत्पुत्त्रो रामलाल-चट्टोपाध्यायो दक्षिणेश्वरे विग्रहपूजकपदं जग्राह। श्रीरामकृष्णस्य ज्येष्ठभ्रातुः श्रीरामकुमारस्य एक एव अक्षयनामा आत्मजः श्रीश्रीराधाकान्तस्य पूजां परमया भक्त्या सम्पादयन्नास्त। परन्तु विधेर्विधानमन्यदेवासीत्! परिणयात् स्वल्पकालात् परमसौ कठिनरोगाक्रान्तः सन् मृतिमगात्।

१८७४-खृष्टाब्दीये एप्रिलमासि श्रीश्रीमाता द्वितीयवारं दक्षिणेश्वरमाजगाम। दक्षिणेश्वरं प्रति प्रचलन्त्यास्तस्या महत्येका विपत् समापतत्। सङ्गिभिः सह सा पादचारमेव आगच्छन्त्यासीत्। सायं, सन्ध्यायाः किञ्चित् परं, भीषणाकारः कश्चित् दस्युस्तस्याः पुरतः समागच्छत्। श्रीश्रीमाता तदा नितान्तमसहाया आसीत्; तस्याः सङ्गिनां कोऽपि समीपे नातिष्ठत्। तस्यां घोरायां विपद्यपि सा कथमपि विचलिता नाभवत्। सा दस्युं पितृवत् तत्पत्नीञ्च मातृवत् सभाजयन्ती तावाश्रयं याचितवती। श्रीश्रीमातुरीदृशेन आर्जवेन दस्युदम्पत्योर्हृदयं विगलितं जातम्। तौ परेद्युस्तां दुहितरं मन्यमानौ तस्याः सङ्गिसन्निधौ नीतवन्तौ। दक्षिणेश्वरं समागता श्रीश्रीमाता पूर्ववदेव श्रीरामकृष्णजनन्या साकं सङ्गीतशालायां वसन्ती पतिसेवारता बभूव। कियत्कालात् परं श्रीरामकृष्णजननी चन्द्रमणिदेवी पञ्चाशीतिवर्षवयसि पाञ्चभौतिकं देहं तत्याज।

भक्त-समागमः

एकदा श्रीरामकृष्णो दिव्येन चक्षुषा दृष्टवान्—अचिरादेव बहवस्त्यागिनः अन्तरङ्गा भक्ताः, धर्मभावापन्ना गृहस्थाः, प्रतिभाशालिनः सुशिक्षिता जनाश्च धर्मलाभार्थं तत्समीपमागमिष्यन्तीति। तान् द्रष्टुं स नितरां व्याकुलान्तरात्मा जातः। सायं तस्य व्याकुलता ईदृशीं वृद्धिमवाप यदसौ मथुरानाथप्रभृतीनां 'कुठि'गृहस्य छदिषस्तान् सर्वानाहूतवान्। शनैः असंख्यभक्तजनानां समागमेन दक्षिणेश्वरमन्दिर-प्राङ्गणं मुखरमभूत्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१८७५-खृष्टाब्दस्य मार्च्‌मासि भारतवर्षीय-ब्राह्मसमाजनायकं महात्मानं केशवचन्द्रसेनं द्रष्टुमनाः श्रीरामकृष्णो हृदयरामसहायः वेलघरियासंज्ञक-स्थाने जयगोपालसेनस्य उद्यानवाटीमागच्छत्। श्रीरामकृष्णस्य भगवत्-प्रेमोन्मत्ततया मधुरव्यवहारेण च श्रीकेशवचन्द्रः समाकृष्टोऽभवत्। कदा कदासौ भगवन्नामकीर्तनं कुर्वन् दक्षिणेश्वरमागम्य श्रीरामकृष्णेन मिलितो बभूव। श्रीरामकृष्णोऽपि अन्तरान्तरा केशवस्य 'कमलकुटिरा'भिधानं गृहं समागच्छत्। कालक्रमेण तयोर्मध्ये प्रीतिसम्बन्धो नितरां घनीभूतो जातः। केशवोऽधुना श्रीरामकृष्णस्य अमृतोपमामुदारां वाणीं सर्वसमक्षं विघोषयामास। ब्राह्मनायकः प्रतापचन्द्र-मजुमदारश्च दक्षिणेश्वरं समागम्य श्रीरामकृष्णस्य पूत-सङ्गं लेभे। १८८४-खृष्टाब्दस्य जानुयारी-मासि केशवचन्द्रः पञ्चत्वमगात्। वार्तामिमामुपलभ्य श्रीरामकृष्णः दिवसत्रयं शय्यायाः उत्थातुं नाशकत्। मदीयमङ्गमेकं पक्षाघातग्रस्तं जातमित्यसौ अमन्यत।

एवं श्रीरामकृष्णः पण्डितप्रवरेण ईश्वरचन्द्र-विद्यासागरेण हिन्दुधर्मप्रचारकेण शशधरतर्कचूड़ामणिना, अन्यैश्च विद्वद्वरैः कदाचित् दक्षिणेश्वरे कदा वान्यत्र संगतोऽभवत्। एतान् मनीषिण ऋते रामचन्द्रदत्तः, मनोमोहनमित्रः, बलरामवसुः, महेन्द्रनाथगुप्तः (कथामृतप्रणेता श्रीमः माष्टारमहाशयो वा), दुर्गाचरणनागः, महाकवि-गिरिशचन्द्रघोषः, पूर्णचन्द्रघोषः, सुरेन्द्रनाथमित्रः—अन्ये च बहवो भक्ताः श्रीरामकृष्णपदप्रान्तं समागता अभवन्।

१८८१-खृष्टाब्दात् प्रभृति श्रीरामकृष्णस्य शुद्धसत्त्वा वैराग्यवन्तः त्यागिनो लीलासहचरा एकैकशः तत्सन्निधिमागन्तुं प्रारभन्त। ते नाम नरेन्द्र-राखाल-बाबुरामः-शशि-शरत्-प्रभृतयः। एतेषु विवेकवराग्यवत्सु त्यागसमुज्ज्वलेषु युवसु यः धरित्र्याः सर्वप्रान्तेषु श्रीरामकृष्णवाणीमुदात्तकण्ठेन प्रचारितवान् सोऽद्भुतकर्मा श्रीनरेन्द्रनाथदत्तः। कालेनासौ विश्वविश्रुत-स्वामिविवेकानन्दा-भिधानेन इन्दुमंडलं ह्रेपयन् यशःकोटिमगाहत।

श्रीनरेन्द्रनाथः पाश्चात्त्यज्ञाननिष्णातः सन् घोरामेकां सङ्कटमयीं दशामुप-नीतोऽभवत्। सत्यसन्धो नरेन्द्रनाथः पाश्चात्त्य-भावेन प्रभावान्वितोऽपि आत्म-विस्मृतिं नापन्नः। स्वाधीनमननशीलो नरेन्दनाथ एकदा श्रीरामकृष्ण-समीपमागतः। श्रीरामकृष्णं पश्यन्नसौ तं सपद्येव पृष्टवान्—"किं भवान् भगवन्तं प्रत्यक्षीकृतवान् ?" प्रशान्तदृढ़कण्ठेन श्रीरामकृष्णः प्रत्युत्तरं प्रादात्—"वाढ़म्, नूनमेवाहं तं दृष्टवान्। यथा त्वामहं पश्यामि, ततोऽपि सुस्पष्ट-तयाहं भगवन्तं प्रत्यक्षीकृतवान्।" निर्वाक् विस्मयाविष्टश्च नरेन्द्रनाथस्तामेव वाणीमाकर्णयामास। श्रद्धानतस्य शिष्यस्य शिरसि आत्मनो वरहस्तं स्थापयन् श्रीरामकृष्णस्तस्मै आशिषं प्रादात्। श्रीरामकृष्णस्य पुण्यस्पर्शेन नरेन्द्रनाथस्य

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सर्वसंशयास्तिरोहिता अभवन् ; समुज्ज्वलज्ञानालोकेनाधुना तस्य मानसं समुद्भासितं जातम् ।

एकदा नरेन्द्रनाथः श्रीरामकृष्णसकाशात् सेवाधर्मस्य निगूढं तात्पर्यमबुध्यत । १८८४-खृष्टाब्दस्य एकस्मिन् दिवसे श्रीरामकृष्णो भक्तैः साकं दक्षिणेश्वरे स्वकक्षे उपविशन्नासीत् । स वैष्णवधर्म-मर्मोद्धार-प्रसङ्गेनावादीत्—"मतेनानेन त्रिषु विषयेषु सयत्ना भवेयुः—नाम्नि रुचिः, जीवे दया, वैष्णव-सेवनञ्च ।" तद्-व्याख्या-प्रसङ्गेन—"जगदिदं कृष्णस्यैवेति बोधेन सर्वजीवान् प्रति दया कर्तव्या"—एतावद् वदन्नेव सहसासौ समाधिमापन्नः । अतःपरमर्धबाह्यदशां प्राप्तः सन् वक्तुं प्राक्रमत—"जीवान् प्रति दया ! जीवान् प्रति दया ! दूरमपसर—कीटानुकीटस्त्वम् ! कथं जीवान् प्रति दयां करिष्यसि ? दयां कर्तुं को नाम त्वम् ? नहि, नहि जीवान् प्रति दया—शिवज्ञानेन जीवानां सेवा !" केवलं नरेन्द्रनाथ एव श्रीरामकृष्णवचसो यथार्थं तात्पर्यमवगन्तुं शशाक । यः शिवज्ञानेन जीवान् सेवितुं प्रभविष्यति स एव कालेन शुद्ध-बुद्ध-मुक्त-स्वभावोऽहमिति ज्ञानमुपलब्धुं शक्नुयात् । तदा कर्ममात्रं तस्य भगवत उपासनैव भवितुमर्हति ।

जीवान् प्रति श्रीरामकृष्णस्य शिवबुद्धिर्नितरां स्वाभाविकी आसीत् । मथुरानाथेनासौ तीर्थदर्शनव्यपदेशेन प्रचलन् वैद्यनाथधाम-समीपे कस्मिंश्चिद् ग्रामे तत्रत्यजनानाम् आत्यन्तिकम् अन्नाभावं दृष्ट्वा करुणया विगलितहृदयः संवृत्तः । स मथुरानाथमवोचत्—"त्वं खलु मातुः कालिकाया विषयाध्यक्षः । एतेषां प्रतिजनाय एकमस्तकमितं तैलं वस्त्रमेकञ्च प्रयच्छ ; एकदा उदरपूरञ्च तान् भोजय ।" मथुरानाथस्तु आदौ अनिच्छां प्राकटयत् । उक्तवांश्च : "पितः, तीर्थ-दर्शनेन बहुलमर्थव्ययं भविष्यति ; अत्रापि बहवो जना दृश्यन्ते, एतांश्चेद् भोजयामि अर्थाभावः खलु समापतेत् । अस्यां दशायां भवता किं मन्यते ?" तत्कथां कः शृणोति ? श्रीरामकृष्णस्तदा ग्रामवासिनां दुःखं दृष्ट्वा भृशं करुणाविष्टोऽभवत् । स मथुरानाथमवदत् : "दूरमपसर, काशीमहं न गमिष्यामि । अहमेतेषां सकाशे स्थास्यामि । तेषां कोऽपि नास्ति । तान् विहाय नाहं गमिष्यामि ।" तस्य ईदृशीं करुणां दृष्ट्वा मथुरानाथस्तदा कलिकाताया वस्त्राण्यानीय श्रीरामकृष्णकथानुसारेण दरिद्रेभ्यस्तानि दत्तवान् । श्रीरामकृष्णोऽपि ग्रामवासिनामानन्दं दृष्ट्वा स्वयमपि आनन्दपरीतात्मा सन् तानामन्त्र्य सहास्यवदनो मथुरानाथेन साकं काशीं प्रस्थितः ।

एतेन श्रीरामकृष्णः तीर्थदर्शनादपि नरनारायणसेवां कथमपि न न्यूनाममन्यतेति सम्यक् प्रतीयते ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गोपालमाता अन्याश्च महिलाभक्ताः

पूर्वोक्तान् मनीषिणो गृहिणस्त्यागिनश्च भक्तान् ऋते या नाम महीयस्यो महिलाः श्रीरामकृष्ण-पदप्रान्ते समवेताः सत्य आत्मचरित्राणि निर्मितवत्यः, तासु गोपालमाता (श्रीअघोरमणि-देवी), योगीन्द्रमाता (श्रीयोगीन्द्रमोहिनी-विश्वास-देवी), गोलापमाता (श्रीगोलापसुन्दरी-देवी) च चरितमाहात्म्यहेतोश्चिरस्मरणीयाः सञ्जाताः। अत्र भक्तसाधिकायाः गोपाल-मातुः भक्तिरसनिषिक्तस्य जीवितस्य दिङ्मात्रं प्रदर्श्यते ।

अघोरमणिर्दरिद्रा ब्राह्मणकन्यासीत्। बाल्य एव वयसि तस्याः परिणयो बभूव । अचिरादेव सा वैधव्यं संप्राप्ता । सा गङ्गारोधसि किञ्चिद् देवायतनमाश्रित्य गभीरया ऐकान्तिकतया श्रीभगवतो गोपालमूर्तेरुपासनायाम् आत्मानं नियोजयामास । एवं कुर्वत्यास्तस्याः त्रिंशद्वर्षेभ्योऽपि अधिकः कालो व्यतीतः। दक्षिणेश्वर-कालिकायतने कश्चित् सिद्धः साधको निवसतीति श्रुत्वा सा एकदा तं द्रष्टुमागच्छत् । एवमेव तस्याः श्रीरामकृष्णदर्शनमघटत। एकदा रात्र्या अन्तिमयामे सा सविस्मयमपश्यत्—श्रीरामकृष्णस्तत्पार्श्वे उपविष्टः, तस्य दक्षिणहस्तो मुष्टिबद्धः, अधरे च मृदुस्मितम् ! साहसमाश्रित्य सा आत्मनो वामहस्तेन तस्य दक्षिणहस्तं स्पृष्टवती। सहसैव कश्चिदभावनीयो व्यापारः संवृत्तः । श्रीरामकृष्णमूर्तिः क्व विलीनाभवत् ! तत्र केवलं बालगोपाल-मूर्तिः समुद्भासिता जाता ; तं गोपालं तस्या उत्सङ्गमारोढ़ुकामं दृष्ट्वा सा महानन्देन तं स्ववक्षसि आसञ्जयामास । सा गोपालमुत्सङ्गे आरोप्य दक्षिणेश्वरं प्रस्थिता । तस्या मुखे केवलं 'गोपाल ! गोपाल !' इति ध्वनिः ! तदवस्था सा श्रीरामकृष्णगृहे समुपस्थिताभवत् । श्रीरामकृष्णोऽपि तां बहुश आद्रियत, स्वहस्तेन च भोजयामास । सन्ध्यायाः प्राक् पुन-र्गोपालं क्रोड़े संस्थाप्य सा स्वगृहं प्रत्यावृत्ता । तस्या ईदृश आध्यात्मिको भावो मासद्वयमप्रतिहतगत्या प्रचलति स्म । अतः परं साबुध्यत—आत्मन इष्टदेवः श्रीरामकृष्णश्चाभिन्नौ ; तदा क्रमेण तद्भावः प्रशान्तिमियाय । ततस्तया श्रीरामकृष्णो गोपाल इति अभिहितः। श्रीरामकृष्णेनापि सा गोपाल-मातेति आहूता बभूव । एवं तस्या गोपालमातेति नाम सार्थकं जातम् ।

श्यामपुकुरे

श्रीरामकृष्णमाश्रित्य दक्षिणेश्वरे क्रमेण एका महती भक्तगोष्ठी निर्मिता-भवत्। प्रतिदिनमसंख्याता मानवा शान्तिलाभार्थं तस्याभयपदप्रान्तमुप-नीताः। त्यागस्य सेवायाश्च उपरि श्रीरामकृष्णः समधिकं गुरुत्वमारोपित-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वान्। अतोऽसौ कौमार-विवेक-वैराग्यवतां यूनां धर्मजीवननिर्माणार्थं सातिशयं मनो निदधे।

अविराम-श्रमहेतोः श्रीरामकृष्णस्य सबलोऽपि देहः क्रमेण दौर्बल्यं प्राप। १८८५-खृष्टाब्दस्य ग्रीष्मकालतः स सहसा गलदेशे काञ्चिद् वेदनामनुभूतवान्। किन्तु सत्यपि तस्मिन् व्याधौ स भक्तानामाग्रहातिशयात् तैः सार्धं पानिहाटि-नामकस्य स्थानस्य महोत्सवदर्शनार्थं (रघुनाथदासस्य चिपिटक-महोत्सवः) नौकायोगेन गतः। तत्रोपनीतः कीर्तनानन्देन निर्बाध-नर्तनेन च मत्तोऽभवत्। एतेन तस्य गलवेदना भूयसा वृद्धिं गता। भिषग्भिः रोगं परीक्ष्य एवं सिद्धान्तितम्—धर्मदेशिकानां यो नाम कण्ठव्याधिर्भवति, श्रीरामकृष्णस्यापि स एव सम्भूत इति। क्रमेण गलदेशाद् रुधिरं निर्गतमभूत्। रोगवृद्धिहेतोः तच्चिकित्सार्थं १८८५-खृष्टाब्दस्य अक्टोवरमासि नरेन्द्रनाथ-गिरिशचन्द्र-महेन्द्रनाथप्रभृतयो भक्तास्तं कलिकातान्तर्गतां श्यामपुकुरनामक-पल्लीं समानीतवान्। भृतिगृहीतायां कस्याञ्चिद् वाटिकायां तस्य चिकित्सा प्रचलति स्म। तात्कालिको विख्यातो होमिओप्याथि-चिकित्सकः डाक्तार-महेन्द्रलाल-सरकारस्तस्य भैषज्यं विहितवान्। महानुभवोऽयं भिषक् तदर्थं किमपि पारिश्रमिकं नागृह्णात्। पथ्यादि-व्यवस्थापनभारं श्रीश्रीमाता साग्रहं गृहीतवती। नरेन्द्रनाथेन अनुप्राणिताः केचिद् युवानः सर्वप्रातिकूल्यमविचारयन्तो गुरुसेवायां नियुक्ता बभूवुः। डाक्तार-महेन्द्रलालसरकारोऽपि श्रीरामकृष्णस्य उदारधर्ममतेन गभीरया च आध्यात्मिकतया समाकृष्टः सन् श्यामपुकुरमागम्य दीर्घसमयं तस्यामृतोपममुपदेशं मन्त्रमुग्धवद् अशृणोत्, चिकित्सा सेवा च यथानियमं प्राचलताम्। श्रीरामकृष्णस्य श्यामपुकुरावस्थानं कलिकातावासिनाम् अविदितं नासीत्। उपदेशामृत-पिपासवो जनास्तत्रापि संघट्टं विधातुं प्रक्रान्ताः। सत्यपि चिकित्सकनिषेधवचसि अहेतुक-कृपासिन्धुः श्रीरामकृष्णः सानन्दं भक्तैः साकं धर्मप्रसङ्गेन कालं निन्ये। मानवकल्याणार्थमेव तस्य देहधारणम्; स तावद् देहात्मबुद्धिप्रयुक्तः सन् शरीर-चिन्तया स्वकर्तव्यसम्पादनाद् विरतो भवेदिति सर्वथैवाकल्पनीयम्। इतः पूर्वमेव चिकित्सकास्तस्य रोगमिमं दुरारोग्या रोहिणीति निर्णीतवन्तः। चिकित्सापि तदनुरूपमेव प्राचलत्।

तस्मिन्नेव समये कश्चिद् व्यापारोऽघटत। एतेन भक्तानां एवंरूपो विश्वासो जातो यत् श्रीरामकृष्णो न केवलमतिमानवः परन्त्वसौ आध्यात्मिकजगतः परमाश्रयः, जीवकुलस्य परमा गतिः—देवमानवः, महाशक्तेरवतारश्च। ईदृगेवासौ घटना—दुर्गापूजानन्तरं श्रीश्रीकालीपूजा समायातकल्पा। कस्यचिद् भक्तस्य प्रबलेच्छासीत्—प्रतिमानयनपूर्वकं श्यामपुकुरवाटिकायामेव श्रीश्रीकाली-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पूजा भवेत्। परन्तु श्रीरामकृष्ण-रोगविवृद्धिशङ्कया केचन भक्तास्तस्मिन् विषये सविशेषमुत्साहं न प्रादर्शयन्। पूजायाः पूर्वस्मिन्नहनि सहसा कांश्चिद् भक्तानाहूय श्रीरामकृष्ण आह, "पूजोपकरणानि संक्षेपत एव संग्राह्याणि—श्वः कालिकामातुः पूजा कर्तव्या।" तच्छ्रीमुखनिःसृतमादेशं श्रुत्वा भक्ताः सानन्दाः सोत्साहाश्च जाताः। निर्दिष्टेऽहनि ते यथाविधि गन्ध-पुष्प-धूप-दीप-फल-मूलादीनि पूजोपकरणानि संगृह्य श्रीरामकृष्ण-शय्यापार्श्वे सज्जीकृतवन्तः। पूजाक्षणः समुपस्थितः। धूपादिसुवासितं गृहं उज्ज्वलदीपालोकेन समुद्भासितम्। समग्रमेव तत्स्थानं तदाऽऽभूतपूर्वं भावगम्भीरं परिवेशमधारयत्। जगज्जननीचिन्तानिमग्ना भक्ता निर्निमेषलोचनाः सन्तः श्रीरामकृष्णस्य भावमण्डितं मुखं व्यलोकयन्। सहसा भक्तप्रवरस्य गिरिशचन्द्रस्य मनसि ईदृशी भावना समुदिताभवत्—श्रीरामकृष्णः स्वयमेव भक्तकृतां पूजां गृहीत्वा तान् कृतार्थान् विधास्यतीति एतदायोजनम्। समुदितायामेव तस्यां भावनायां स आनन्दाधीरः सन् हस्ताभ्यां पुष्पचन्दनादिकं विधृत्य उच्चैर्मातृनामोच्चारणपूर्वकं श्रीरामकृष्णस्य देवाराध्य-चरणयोरञ्जलिं प्रादात्। श्रीरामकृष्णदेहो रोमाञ्चितो जातः, तन्मुखकमलञ्च उज्ज्वलमभवत्। स गभीरभावाविष्टः सन् हस्तद्वयं प्रसार्य वराभयमुद्रां धृतवान्। भक्ताः श्रीरामकृष्णदेहे भवतारिण्या आविर्भावं प्रत्यक्षीकृत्य सोल्लासं 'जय मात'रिति ध्वनिं कुर्वाणाः जगज्जननीबुद्ध्या तत्पादपद्मयोः सचन्दनं पुष्पाञ्जलिं समर्पयामासुः। अतःपरं स्वाभाविकीमवस्थामापन्नः स भक्तजन-तृप्तिसाधनार्थं निवेदितं मिष्टान्नादिकं किञ्चित् स्वहस्तेनागृह्णात्, सर्वेभ्यश्च ज्ञान-भक्ति-विवेक-वैराग्यलाभार्थमाशिषं प्रायच्छत्।

श्यामपुकुर-वासकाले श्रीरामकृष्णेन एकदा ददृशे—विविधक्षतयुक्तस्तस्य सूक्ष्मदेहोऽन्नमयकोषाद् विनिष्क्रम्य बहिर्विचरतीति। ईदृशेनाद्भुतदर्शनेन श्रीरामकृष्णो विस्मयाविष्टः सन् तदेव स्वीयं सूक्ष्मशरीरं निरीक्षमाण आस्त। तदैव श्रीश्रीजगदम्बिका तं प्रादर्शयत्—ये नाम दुष्कृतस्तस्य स्पर्शेन पूताः सञ्जाताः, तेषामेव पापराशिस्तद्देहे ईदृशं दुरारोग्यं रोगं सृष्टवान्। श्रीरामकृष्णमुखादिमामत्याश्चर्यदर्शनवार्तां श्रुत्वा भक्ता सविशेषं सावधाना अभवन् यथा कोऽपि तदनन्तरं हठात् तस्य पादपद्मे न स्पृशेत्।

भक्तैः साकं श्रीरामकृष्णलीला निर्बाधं पूर्ववदेव प्रसरति स्म। सत्यामपि सुचिकित्सायां रोगोपशमः स्तोकेनापि लक्षितो नाभूत्। परन्तु भक्तैः सह अहर्निशं भगवत्प्रसङ्गहेतोस्तद्व्याधिः प्रतिदिनं प्रवृद्धिं गतः। डाक्तार-महेन्द्रलाल-सरकारस्य परामर्शतः श्रीरामकृष्णस्य अचिरेणैव कस्याञ्चित् विविक्तायाम् उद्यानवाट्यां नयनं सिद्धान्तितम्। अतस्तस्य गृहस्थभक्तेन

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सुरेन्द्रनाथ-मित्रेण गोपालचन्द्रघोषस्य काशीपुरस्थाया उद्यानवाटचाः ८०-रूप्यक-मासिकशुल्केन ग्रहणं स्थिरीकृतम्। स्वयमेव च तेन कृत्स्नतः तत्शुल्कप्रदानं स्वीकृतम्। तदनन्तरं १८८५-खृष्टाब्दस्य ११-डिसेम्बरदिवसे श्रीरामकृष्णः सभक्तः आत्मनोऽन्त्यलीलाभूमिं शमप्रधानां काशीपुरस्थामुद्यानवाटीं समाजगाम।

काशीपुरोद्यानवाटचाम्

काशीपुरस्थाया उद्यानवाटचा मनोरमनिसर्गशोभां दृष्ट्वा श्रीरामकृष्णोऽतितरां प्रीतिमगमत्। जनाकीर्ण-नागरिक-परिवेषाद् विजनप्रदेशं संप्राप्यासौ किञ्चित् स्वास्थ्यमवाप।

श्रीरामकृष्णोऽस्यामेव उद्यानवाटिकायां स्वीयकर्तव्यसाधनेऽधिकतरं मनो निदधे। नरेन्द्र-राखाल-बाबुराम-प्रभृतीन् युवभक्तान् त्यागसेवयोर्महादर्शेन संघबद्धान् विधातुम् अधिकारभेदेन च तेभ्यः शिक्षादीक्षादीनि प्रदातुं स कृतप्रयत्नो जातः। तेनेदं सम्यग् ज्ञातं यत् केवलं सर्वत्यागिनः सन्न्यासिनस्तस्य उदारधर्मभावं निगूढामाध्यात्मिकताम् उत्तुङ्गत्यागादर्शञ्चावधारयितुं जगति च तानि प्रचारयितुं क्षमाः। श्रीरामकृष्णो नरेन्द्रनाथमेकदावोचत्, "जगदम्बिका त्वामेव तत्कर्मकरणार्थं जगतीह आकृष्टवती। त्वयैव मत्पश्चात् चलितव्यम्। क्व त्वं यास्यसि?" श्रीरामकृष्णो नरेन्द्रनाथमेवात्मकल्पितसंघस्य नायकं स्थिरीकृत्य विशेषतस्तमेव स्वप्रतिनिधिरूपेण निर्मातुं यत्नशीलोऽभवत्। अपरे शुद्धसत्त्वा बालकभक्ता अपि कथं यथार्थपथेन प्रेरणीयाः काशीपुरं समागम्य तद्विषयेऽपि नरेन्द्रनाथाय समुचितशिक्षां प्रदातुमारभत। नरेन्द्रनाथेनापि श्रीगुरुसेवासमयवर्जमन्यावसरे तैः सार्धं शास्त्रानुशीलनं जपध्यानभजन-सदालापादीनि च समाचरता तेषां चेतःसु वैराग्यवह्निः प्रज्वालितः।

उद्यानवाटिकायामपि श्रीश्रीमाता सारदा श्रीरामकृष्णस्य पथ्यादीनि व्यदधात्। श्रीरामकृष्ण-भ्रातुष्पुत्री श्रीमती लक्ष्मीदेवी तस्याः सहायभूता जाता। नरेन्द्रनाथप्रमुखा युवभक्ताः श्रीरामकृष्णसेवाकृत्यानां सम्यक् परिचालनार्थं कालविभागं कुर्वन्तः आत्मकर्माणि साधयितुमुद्युक्ता अभवन्। रामचन्द्रदत्त-गिरिशचन्द्रघोष-प्रभृतयो गृहस्थभक्ता अपि एतैर्बालभक्तैर्मिलिताः सन्तो यथावसरं तामेव गुरुसेवां सम्पादयन्ति स्म। क्रमेण अस्यामुद्यानवाटिकायामपि भक्तसमागमो वर्धितुमारेभे। श्रीरामकृष्णोऽपि भावामृतधाराभिषेकेण सर्वान् प्रहर्षयामास। एवं निरन्तरपरिश्रमेण रोगविवृद्धया च श्रीरामकृष्णदेहो बहुलतया जीर्णतामवाप। स प्रायेण चलनसामर्थ्यविरहितो

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जातः। तदानीन्तनं किञ्चिद् वृत्तं श्रीरामकृष्णस्य अपाराया अहैतुक्याः करुणाया उज्ज्वलमालेख्यं सर्वसमक्षमुन्मोचयामास।

१८८६-खृष्टाब्दीय-जानुयारी-मासस्य प्रथमदिवसः। तस्मिन्नहनि अपराह्णे त्रिंशदधिका गृहस्थभक्ता उद्यानवाटिकायां समवेता अभवन्। श्रीरामकृष्णस्तदा किञ्चित् स्वास्थ्यमनुभूतवान्। त्रिघटिका-समये स उद्याने किञ्चित्-क्षणं भ्रमितुकामो द्वितलादवातरत्। उद्यानपथेनासौ शनैः शनैः दक्षिणबहिर्द्वारं प्रति प्रचलितुमारभत। गिरिशचन्द्रादयो भक्तास्तदवस्थं श्रीरामकृष्णं पुरत एव संदृश्य प्राणमन्। सहसा श्रीरामकृष्णो गिरिशचन्द्रमपृच्छत्—"भो गिरिश, त्वं खलु सर्वेभ्य एतावतीं कथां (मदवतारत्वसम्बन्धिनीम्) वदन्नेव प्रचलसि। (मत्सम्बन्धि) किं त्वया दृष्टं बुद्धं वा?" अचिन्तितपूर्वेण प्रश्नेनानेन अविचलितः पूर्णविश्वाससम्पत् नतजानुर्गिरिशः भक्तिविह्वल-चेतसा कृताञ्जलिः सन् दृढ़कण्ठमाह—"व्यासो वाल्मीकिश्च यस्येयत्तां कर्तुं नालमास्तां, तमधिकृत्याहं पुनरधिकं किं वक्तुमर्हामि?" आकस्मिकभावेन गिरिशस्य निरतिशय-भक्त्यावेशेन श्रीरामकृष्णः पुलकिताङ्गो जातः। स सुगभीरे समाधौ निमग्नोऽभवत्। महाभावस्य कियति लाघवे सति समवेतान् भक्तानुद्दिश्यावोचत्—"युष्मभ्यं मया तावत् किमाख्येयम्? आशिषं ददामि यथा युष्माकं चैतन्यं भवेत्!" विद्युद्धारावत् श्रीरामकृष्णस्याशीर्वाणी सर्वेषां हृदयेषु अमितानन्दमजनयत्। आध्यात्मिकानुभूतेर्गभीरं प्रदेशं प्रविशन्तस्ते सोल्लासं 'जय रामकृष्ण'-रवेण दिङ्मण्डलं मुखरीकृतवन्तः। एकैकशस्ते श्रीरामकृष्ण-पदप्रान्ते लुलुठुः। केचन भक्ता उद्यानात् पुष्पाण्यवचीय श्रीगुरुचरणयोः समर्पयामासुः। भावाविष्टः श्रीरामकृष्णोऽपि भक्तानां वक्षोदेशान् स्पृष्ट्वा तेभ्यो दिव्यानन्दं प्रादात्। मन्ये, अद्य तस्य देहव्याधिः क्व तिरोहितः! अद्य तस्य श्रीभगवतः प्रसन्नोज्ज्वले मुखमण्डले विमलं स्मितम्, चक्षुषोः दिव्य-करुणायाः प्रदीप्तप्रकाशः, देहे लावण्यस्य अनिर्वाच्य-घनीभावः! अद्य श्रीरामकृष्णस्य भावोद्दीप्तं प्रेमघनमूर्तिं दृष्ट्वा तस्यामोघामाशिषञ्च लब्ध्वा भक्तजनाः कृतार्था बभूवुः।

श्रीरामकृष्णस्य चिकित्सायां प्रचलन्त्यामपि आरोग्यलक्षणं किमपि दृष्टं नासीत्। चिन्ताकुलचित्ता भक्ता निरन्तरमहर्निशं तत्सेवानिरता आसन्। तस्य वाक्शक्तिरपि क्रमेण क्षीणत्वमापेदे। तथापि तस्य करुणाया अन्तो नासीत्—भक्तान् नानाभावरुपदेष्टुमसौ तदानीमपि उद्युक्तः। एकदा आत्म-स्वरूपमधिकृत्य श्रीरामकृष्णो नरेन्द्रादिभक्तान् स्तोकं हसन् साकूतमाह—"बाउलगणा अकस्मादागताः; ते अनृत्यन्, ते अगायन्; पुनरकस्मादेव ते

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रस्थिताः! कोऽपि तान् न ज्ञातवान्। अतः कदा कदा वदामि—पुनर्नागन्तव्यम्। .....पुनश्चेत् देहधारणं स्यात्—तत्तु केवलं भक्तानां कृते।"

वृद्ध-गोपालनामा श्रीरामकृष्णस्य कश्चिद् अन्तरङ्गो भक्तस्त्यागनिष्ठेभ्यः साधुभ्यः काषायवस्त्राणि च प्रदातुमैच्छत्। तज्ज्ञात्वा श्रीभगवान् नरेन्द्रादि-युवभक्तानभिलक्ष्याब्रवीत्—"त्वमेतेभ्यो महत्तरान् त्यागिनः सन्न्यासिनः क्व प्राप्स्यसि? काषायवस्त्राणि रुद्राक्षमाल्यानि च एतेभ्यः प्रदेहि।" वृद्ध-गोपालः श्रीरामकृष्णदिष्टेभ्यस्त्यागिसन्तानेभ्यो वस्त्रादीनि प्रदाय कृतार्थोऽभवत्। तदृते च श्रीरामकृष्ण एकस्मिन् शुभे सायाह्ने त्यागिभक्तानां कृते किञ्चित् विशेषक्रियानुष्ठानं विधाय तान् माधुकर-भिक्षाटनार्थमादिशत्। आनन्द-परिप्लुता नरेन्द्रराखालादयो युवभक्ता जनपदेभ्यो भिक्षान्नमानयन्। एवमेवासौ पुण्यतीर्थ-काशीपुरोद्यानवाटयां स्वहस्तेन श्रीरामकृष्णसंघस्य यथार्थभित्तिमूलं स्थापयामास।

नरेन्द्रनाथो निर्विकल्प-समाधिलाभार्थमधीरः सञ्जातः। तदर्थं श्रीराम-कृष्णोऽपि तेनाभ्यर्थितः। यथावसरं ते अखण्डज्ञानद्वारमुद्घाटितं भविष्यतीति स नरेन्द्रनाथमाश्वासयामास। कृच्छ्रं चरतो जपध्यानाभ्यासञ्च कुर्वतस्तस्य कालो व्यतीयाय। एकदा स सन्ध्यायां ध्यानमातिष्ठन्नासीत्। सहसा तस्य अन्तर्मुखं निर्मलं मनः शनैः शनैः स्थूल-सूक्ष्म-कारणात्मक-प्रदेशस्य सर्वाण्येव बन्धनानि छित्त्वा द्वैतविवर्जिते निर्विकल्पके समाधि-सागरे विलीन-मभूत्। कियत्कालात् परं स्वभावापन्नो नरेन्द्रनाथः श्रीरामकृष्णसमीप-मागच्छत्। स प्रसन्नदृष्टिपातं नरेन्द्रनाथमाह—"कीदृशमनुभूतम्? जगन्माता त्वामद्य सर्वं दर्शितवती। परन्तु ते उपलब्धिरियमधुना तालकबद्धा स्थास्यति; कुञ्चिका मत्समीपे स्थिता। त्वं जगन्मातुर्यदेव कर्म सम्पादयितुमागत-स्तस्मिन् अवसिते सति पुनस्तां लप्स्यसे।"

महाप्रस्थानम्

महाप्रयाणात् अष्टनवदिवसेभ्यः प्राक् श्रीरामकृष्णो बालभक्तं योगीन्दनाथं वङ्गपञ्जिकायाः २५-श्रावणाद् दिनतिथीनां पाठार्थमादिशत्। श्रावणस्य अन्तिमदिनाङ्के समुपस्थित एव स इङ्गितेन योगीन्द्रनाथं पठनान्न्यवारयत्। अतः चतुष्पञ्चदिवसेषु व्यतीतेषु स नरेन्द्रनाथं स्वकक्षमानीय पुरतश्चोपवेश्य तं निर्णिमेष-लोचनाभ्यां निरीक्षमाणो गभीरसमाधौ निमग्नोऽभूत्। नरेन्द्रनाथेन तदानुभूतम्—काचित् प्रचण्डा सूक्ष्मा अदृश्या शक्तिः प्रबलतड़ित्प्रवाहवत् तद्देहं प्रविशति स्म। तमेव विपुलं वेगं धारयितुमशक्नुवन् नरेन्द्रनाथः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अचिरादेव बाह्यज्ञानशून्यो जातः। कियन्तं कालमीदृशी अवस्थासीत् स बोद्धुं नाशकत्।

व्युत्थानदशायां तेन वीक्षितम्—श्रीरामकृष्णो गलदस्रलोचनस्तमवादीत्, "अद्य तुभ्यमहं सर्वं प्रदाय निष्किञ्चनो जातः। शक्त्यानया त्वं जगतोऽशेषं कल्याणं साधयितुं प्रभुर्भविष्यसि। अवसिते ते कर्मणि पुनः स्वधाम प्रत्यागच्छेः।" श्रीरामकृष्ण आत्मनोऽमोघां दिव्यशक्तिं नरेन्द्रनाथान्तरे सञ्चार्य ततः प्रभृति भावभूमौ तेन सहैकात्मतां प्रपेदे।

दिवसद्वयात् परमेव नरेन्द्रनाथचेतसि सहसा श्रीरामकृष्ण ईश्वरावतारो न वेति सन्देहः समजनि। स एवं चिन्तयन्नास्त—"श्रीगुरोर्देहावसानं प्रत्यासन्नम्; यदि अस्मिन्नेवावसरे स सकृद् वदेत्: 'अहं खल्वीश्वरावतार'स्तर्हि पुनः सन्देहावकाशो स्थातुं नार्हति।" एतादृश्यां भावनायां नरेन्द्रनाथस्वान्ते समुदितायामेव अन्तर्यामी श्रीरामकृष्णो दार्ढ्यमास्थाय समवोचत्: 'अधुनापि ते विश्वासाभावः? य एव रामः, य एव कृष्णः, स एवेदानीं देहेऽस्मिन् रामकृष्णः। परन्तु ते वेदान्तदृष्ट्या न।" उक्तिमिमां श्रुत्वा नरेन्द्रनाथः श्रीरामकृष्णस्य अवतारत्वमधिकृत्य निःशेषं गतसन्देहः संवृत्तः।

श्रीरामकृष्ण-जीवनप्रदीपोऽद्य निर्वाणोन्मुखः। अन्तिमशय्यामधिशयानस्य श्रीगुरोर्मुखकमलं निरीक्षमाणा भक्ता नितरामसहाया जाताः। "वयं खलु दुर्भागाः; कोऽधुना प्रात्यहिकसमस्यानां समाधानेन अस्मान् विगतभियो विधास्यती"ति ते केवलं चिन्तयामासुः।

अद्य १८८६-खृष्टाब्दस्य १५-आगष्टः, १२९३-वङ्गाब्दः, रविवासरः, श्रावण-संक्रान्तिः। पञ्जिकानिर्दिष्टं श्रीरामकृष्णस्य तदेव दिनं समागतम्। कश्चिद् भक्तः श्रीप्रभोर्नाड़ीं परीक्ष्याबुध्यत 'अस्माकं प्राणपुरुषोऽद्यास्मान् अकूलाम्बुधौ भासयित्वा संसृतिरङ्गान्निर्गन्तुं कृतोद्योगः!' शोकसंविग्नमानसाः श्रीरामकृष्ण-सन्तानाः शय्यायाः परितस्तिष्ठन्तो नैःशब्द्यमालम्ब्य अश्रूण्यवासृजन्। क्रमेण सन्ध्या घनीभूता जाता; श्रीरामकृष्णोऽपि अगाधे समाधौ ममज्ज। तद्देहः काष्ठपुत्तलिकावन्निश्चलो बभूव। यामिन्या द्वितीये यामे समतीते श्रीरामकृष्णः प्राप्तसंज्ञोऽभवत्। वारत्रयं विस्पष्टं कालीति नाम समुदचारयत्। कियत्-कालानन्तरं सहसा समग्रमेव तस्य शरीरं विपुलपुलकेन रोमाञ्चितं संवृत्तम्। तदीयमास्यमण्डलं स्वर्भासा उद्भासितम्, देहे च अलौकिकी कान्तिः! सर्वै-रेवावबुद्धं—दिव्यप्रकाशोऽयं निर्वाणोन्मुखदीपस्य अन्तिमरश्मिविजृम्भनम्! परेद्युः १६-आगष्ट-सोमवासरे यामिनीविभातेः प्रागेव युगावतारो भगवान् श्रीरामकृष्णो महासमाधिमाश्रित्य आत्मस्वरूपे निलीनोऽभूत्।

पुण्यसलिलायां भागीरथ्यां रोधसि काशीपुर-श्मशानभूमौ श्रीरामकृष्ण-

540

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पूतदेहः प्रदीप्तार्चिषि होमकृशानौ आहुतिरूपेण निक्षिप्तोऽभवत्। विगतपितृका अनाथा भक्ताः श्रीरामकृष्णस्य अस्थीनि देहभस्मावशेषांश्च संगृह्य काशीपुरस्थामुद्यानवाटीं प्रत्यागताः। अतः अस्थ्नां भस्मनाञ्च समधिकभागो बाग्-बाजारपल्लीस्थ-बलरामवसु-महोदयस्य वाटिकायां सामयिकभावेन रक्षित आसीत्। शिष्टांशस्तु गृहस्थैर्युवभिश्च भक्तैः श्रीरामचन्द्र-दत्त-महोदयस्य काँकुड़गाछि-पल्लीस्थायामुद्यान-वाटिकायां संरक्षितः। तदनन्तरम् एकस्यां पुण्यायां जन्माष्टमीतिथौ तान्येव तत्र यथाशास्त्रं संस्थापितानि बभूवुः। एवम् अलोकलीलापन्नस्य भगवतः श्रीरामकृष्णस्य नित्यार्चनादीनि तत्र प्रवृत्तान्यभवन्।

श्रीप्रभोर्लीलासंवरणाद् भक्ता विशेषतो नरेन्द्रनाथादयस्त्यागिनः सन्ताना नितरां विमूढ़चेतसो जाताः। परन्तु युगप्रयोजनस्य ययैव ऐकान्तिकतया श्रीरामकृष्णाविर्भावो घटितः, सा कथं व्यर्थतां यास्यति? नूनं कर्णधारस्याकस्मिकादर्शनेन आरोहिणो भयविह्वला भवन्ति। श्रीरामकृष्णादर्शनादपि त्यागिनो युवभक्ता विह्वलतां याताः; किन्तु सा खलु नितान्तं सामयिकी आसीत्। दक्षिणेश्वर-श्यामपुकुर-काशीपुरेषु शरीरधृक् श्रीभगवान् त्यागिभ्यः सन्तानेभ्यः आत्मनः पूतसन्निधिं सेवाधिकारञ्च प्रदाय तान् अपूर्वसम्भावनागर्भं-भविष्यदर्थमशिक्षयत्। स एवाद्य विनश्वरजीवनस्य नेपथ्यभूमावस्थाय तानेव लीलासहचरान् किञ्चित् निश्चितं लक्ष्यमुद्दिश्यानुप्रेरितुमारभत!

भक्तवरस्य बलरामवसु-महोदयस्य वाटिकायां संरक्षिते श्रीरामकृष्णदेहावशेष एव त्यागिभक्ता अनन्तभावमयस्य श्रीरामकृष्णस्य जाग्रत्सत्तामनुभूतवन्तः। अनतिकालात् परं ते वराहनगरस्य कस्याञ्चित् जीर्णायां वासभूमौ श्रीरामकृष्णव्यवहृतानि सासनद्रव्याणि संस्थाप्य तमेव यथाविधि प्रतिष्ठापयामासुः। तत्रैव ते वैदिकरीत्या विरजाहोमं सम्पाद्य सन्न्यासोचितानि नामानि काषायवासांसि च धारयन्त इहामुत्रफलभोगविरागात्मकं सन्न्याकव्रतं जगृहुः।

विधातुरिङ्गितं प्रायश एव अज्ञातं सुगुढ़ञ्चास्ते। अत्रापि तस्य व्यभिचारो नासीत्। लोकदृष्टेर्बहिर्भागीरथीतीरस्थस्य वराहनगरस्य निभृतायामस्यां जीर्णायां वासभूमौ श्रीरामकृष्णगतप्राणा नवीनाः सन्न्यासिनोऽचिरादेव अलोकसामान्यस्य त्यागस्य तपसश्च एकं ज्योतिर्वलयं सृष्टवन्तः। तदा कोऽपि कल्पितुं नालमासीद् यद् अदूरवर्तिनि भविष्यति ज्योतिर्वलयस्यास्य तरङ्गा एकदा भागीरथीसीमारेखामतिक्रम्य सुदूरस्थामतलान्तिकतटभूमिं स्प्रक्ष्यन्ति सममेव च श्रीरामकृष्ण-समन्वयसिद्धेरपूर्वां वार्तां सर्वदिक्षु सोल्लासं प्रचारयिष्यन्ति!*

---

*श्रीमत्-स्वामि-तेजसानन्द-कृतं 'युगावतार श्रीरामकृष्ण' इति वङ्गभाषया लिखितं ग्रन्थमवलम्ब्य लिखितमिदं चरितम्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीम-चरितम्

श्रीमहेन्द्रनाथ-गुप्तः स्वप्रणीते 'श्रीश्रीरामकृष्ण-कथामृत'-ग्रन्थे श्रीम-माष्टार-मणि-मोहिनीमोहन-प्रभृतिभिश्छद्मनामभिः 'कश्चिद् भक्त' इति वाऽसम्पूर्ण-परिचितेरावरणेन स्वात्मानं गूहितुं कृतप्रयत्नोऽपि व्यर्थाशयः संवृत्तः। तस्यानुपम-कीर्तिसौरभ्यं स्वत एव सर्वत्र प्रसृतमास्ते। १८८२-खृष्टाब्देऽसौ भगवतः श्रीरामकृष्णस्य प्रथममेव दर्शनं लेभे ; तदा स कलिकाताया मेट्रोपलिटानाभिधस्य विद्यालयस्य श्यामबाजारस्थायाः शाखायाः प्रधानशिक्षकपदे नियुक्त आसीत्। श्रीरामकृष्णभक्तमण्डले सुपरिचिता राखाल-बाबुराम-सुबोध-पूर्णतेजचन्द्र-पल्टु-क्षीरोद-नारायणप्रमुखा विभिन्नेषु कालभागेषु तद्विद्यालयस्यान्तेवासिन आसन्। अतोऽसौ माष्टार्-महाशयेति नाम्ना परिचित आस्त। श्रीरामकृष्णोऽपि तं कदा कदा माष्टारेति अभिहितवान्।

श्रीश्रीरामकृष्णकथामृते (अतः प्रभृति केवलं कथामृतमिति) श्रीमद्भागवतस्य कश्चित् श्लोकः समुद्धृतो वर्तते—

"तव कथामृतं तप्तजीवनं कविभिरीड़ितं कल्मषापहम्।
श्रवणमङ्गलं श्रीमदाततं भुवि गृणन्ति ये भूरिदा जनाः॥"

श्रीरामकृष्णकथामृत-प्रचारणेन माष्टारमहाशयस्तत्त्वत एव असंख्येयानां धर्मपिपासूनां गृहप्राश्वेषु अमृतधाराः प्रवाह्य सर्वोत्तमदानफलस्याधिकारी बभूव। खण्डपञ्चकैः विभक्तोऽयं ग्रन्थः सहजस्वारस्यस्य, भावगाम्भीर्यस्य, स्वल्पोक्त्या सतेजस्क-चित्राङ्कनस्य, सर्वविसारि-सहानुभूतेः, असीमौदार्यस्य, निर्बाधान्तर्दृष्ट्याश्च स्वच्छदर्पणरूपेण विश्वस्य श्रेष्ठसाहित्येषु उच्चासनमधिकुर्वाणो ग्रन्थकृतमिममरत्वं प्रापितवान्। जीवनस्यैकस्यैव कृते एतत् खलु प्रचुरम्; तथापि माष्टारमहाशय एतेनैव सन्तोषमनाप्नुवन् स्वकीयेन चित्तहारिणा प्राज्येन मोखिकोपदेशेन शतसहस्रदुर्बलधर्मपथचारिणां पुरतः श्रीरामकृष्णजीवनस्य प्रज्वलदालोकं संस्थापयन् काञ्चित् नूतनदृष्टिभङ्गिम् अनाविलसस्पृहत्वञ्च प्रबोधितवान्। तस्मिन् श्रीरामकृष्णप्रसङ्गं कृतवति अतुल्यमेधया परिपुष्टस्य कवित्वस्वरसवर्णनस्य गुणेन श्रीरामकृष्णस्यान्तिमानां कतिवत्सराणामालेख्यानि सोत्साह-श्रोतॄणां पुरतः सचलत्वं प्रापद्यन्त। श्रीरामकृष्णस्य पावनसन्निधिलाभेन धन्यानां दिवसानामभिज्ञानभासा तान्येव चित्राणि समुज्ज्वलानि सन्ति कञ्चिदलौकिकं परिवेषमरचयन्, समागतांश्च धर्मजिज्ञासून् सलीलं तस्मिन्नेव पुरातनलीलाक्षेत्र उपस्थाप्य शान्तिविश्वासयोरवदातज्योतिषि अवागाहयन्। मन्ये,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

माष्टारमहाशयः खल्वनारतं दक्षिणेश्वरकामारपुकुरयोः स्मृतिप्रदेशमुपवसति स्म। बहिर्यः कोऽपि शब्द उच्चारितो भवतु नाम, स तस्यैव श्रीरामकृष्ण-लीलाक्षेत्रस्य कस्यचिद् वृत्तस्यालेख्यमुद्बोध्य तमेव भक्तप्रवरं तेनैव चित्रेण साकं सम्पृक्तस्य जीवितविशेषस्य पुनरावृत्तौ न्ययुङ्क्त। शुश्रूषुर्यं कञ्चन विषयमधिकृत्य प्रश्नयतु नाम, अहो! सपद्येव उत्तरदानमिषेणासौ तेजःपरि-पूरितभाषया श्रीरामकृष्णचरित्रस्य कियन्तं भागं तत्समक्षमेवोपास्थापयत्। १९३२-खृष्टाब्दस्य जुनमासश्चतुर्थेऽहनि आदेहत्यागं माष्टारमहाशयः प्रत्यहमेव स्वेच्छाधृतं व्रतमेतदुदयापयत्।

१८५४-खृष्टाब्दस्य १४-जुलायिदिनाङ्कगते (१२६१-वङ्गाब्दस्य ३१-आषाढ़-दिवसे) शुक्रवासरे नागपञ्चम्यां तिथौ महेन्द्रनाथः कलिकातायाः शिवनारायण-दासवर्त्मनि पितृगृहे जननमगृह्णात्। कियत्कालानन्तरं तत्पिता श्रीमधुसूदन-गुप्तः १३/२-गुरुप्रसाद-चौधुरीवर्त्मनि गृहमेकं क्रीणन् तत्रैव सपरिवारश्चलितः। गृहमेतदद्यापि वर्तते; तस्मिन्नेव पल्लीविभागे 'ठाकुरबाड़ी'ति अभिधीयते। पिता मधुसूदनो माता स्वर्णमयी चोभौ आर्जव-व्यवहारमाधुर्य-धर्मनिष्ठाहेतोः परिचितावास्ताम्। तयोश्चतुर्ष तनयेषु समसंख्यकासु तनयासु च महेन्द्रनाथ-स्तृतीयः सन्तान आसीत्। मातुः स्नेहातिशयो गुणराशयश्च महेन्द्रनाथं चिरेण मातृभक्तपदवीमारोहितवन्तः। जनन्या साकं तस्य ये नाम बह्व्योऽपूर्वाः शैशवस्मृतयः सम्पृक्ता आसन्, तासु काचित् सविशेषमुल्लेख्या। एकदा चतुर्वार्षिको बालको महेन्द्रनाथो मातृसहायो नावा माहेशस्य रथयात्रां द्रष्टुं गतः। गृहावृत्तिकाले सर्वेषु दक्षिणेश्वरे भवतारिणीदर्शनलाभार्थं चाँदनीघट्टम-वतीर्य नवनिर्मित उद्याने मन्दिरे चेतस्ततो भ्रमत्सु, श्रीकालिकामन्दिरस्य पुरतस्तिष्ठन् बालकोऽकस्मादेवात्मानं जननीविरहितमवेक्ष्य क्रन्दितुमारभत। तन्मुहूर्तादेव श्रीमन्दिरतो निर्गतः कश्चित् सौम्यमूर्तिर्ब्राह्मणो बालकशिरसि स्वहस्तं निधाय तमसान्त्वयत्। ततः स्वस्थः सन्नसौ बालको निर्निमेषलोचनाभ्यां तमेव भास्वरं पुरुषं पश्यति स्म। परवर्तिनि काले माष्टार-महाशय एतं पुरुषप्रवरमधिकृत्य प्रावोचत्—"मन्ये स श्रीरामकृष्णो भवेद् वा; तद्धेतुस्ता-वत्—तस्मात् कियत्कालात् पूर्वमेव (वर्षचतुष्टयात्) राणी-रासमणिस्तावद् दक्षिणेश्वरे कालिकामन्दिरं प्रतिष्ठापितवती, श्रीरामकृष्णोऽपि तदा मातुः कालि-कायाः पूजकपदेऽतिष्ठत्।" अपरस्मिन्नवसरे पञ्चवर्षवया महेन्द्रनाथो मातृस-नाथ एकस्यां बृहत्यां छदिषि निःसीम-नीलाकाशमवलोकयन् स्वमनस्यनन्त-स्योद्दीपनम् अन्वभूत्। वर्षणकाले महेन्द्रनाथो निस्तब्धे पृथिवीवक्षसि तिष्ठन् निर्बाधवारिपतनमध्येऽसीमचिन्तानिमग्नो जातः। कालीघट्टसम्पादितेन छाग-बलिनासौ व्यथितात्मा संवृत्तः। समातृकस्तद्दृश्यं पश्यन्नसौ स्वमनसि प्रतिज्ञात-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वान्—भाविनि काले एषोऽवश्यमेव निवार्यः। किन्तु समायाते भविष्यति काले परिणतवयसो माष्टारमहाशयस्य चिन्तनधारायामामूलं परिवर्तनं समापतत्; अतः किमपि तद्विषये न कृतम्। स्नेहमयी जननी कैशोर एव तं विहाय स्वर्गताभूत्। मातृप्रयाणादनन्तरमश्रूणि विसृजन् निद्राभिभूतो जातः; स्वप्नेऽसौ दृष्टवान्—स्वजननी स्वस्नेहं वदति स्म, "वत्स, एतावन्तं कालमहं त्वां लालितवती; परतश्च तदेव करिष्यामि; परन्तु त्वं द्रष्टुं न पारयिष्यसि।" जगदम्बया सत्यमेव तल्लालनभारो गृहीतः।

महेन्द्रनाथजीवने निरन्तरधर्मभावना सदैव परिस्फुटासीत्। एकदा श्रीरामकृष्णस्तमपृच्छत्, "किं त्वया आश्विनझटिका (५-अक्टोबरः, १८५४-खृः) स्मर्यते?" तदा महेन्द्रनाथः प्रत्युत्तरं दत्तवान्, "वाढ़म्, भगवन्! तदाहं सातिशयमल्पवया आसम्—नव-दशवर्षवयाः भवेयम्—एकस्मिन् प्रकोष्ठे एकलेनैव देवताः मया प्रार्थिताः।" कस्यचित् देवायतनस्य पार्श्वेन गतागतं कुर्वन्नसौ ससम्भ्रमं तिष्ठन् देवविग्रहान् प्राणमत्। श्रीदुर्गापूजावसरे दीर्घसमयं भक्तिभरेण देवीप्रतिमायाः पुरत उपविशति स्म। अर्धोदयादियोगमुपलक्ष्य तीर्थयात्राव्यपदेशेन वा कलिकातायां साधुसमागमे जाते स तद्दर्शनस्पर्शनार्थं व्याकुलत्वं पेदे। परवर्तिनि काले स सानन्दं वदति स्म—"एषैव साधुसङ्गस्पृहा मामेकदा सर्वोत्तमसाधोः श्रीरामकृष्णस्य श्रीचरणयोः समाकृष्य मज्जीवितं कृतार्थीकृतवती। विद्यालय-महाविद्यालय-पाठकालेऽसौ रामायण-महाभारत-पुराण-श्रीचैतन्यचरितामृतादि-ग्रन्थैः परिचितोऽभवत्। विद्यालय-पाठ्यग्रन्थानामपि धर्मभावोद्दीपकान् अंशान् स मनसि धृतवान्। 'कुमारसम्भव'-काव्ये शिवनिदिध्यासनवर्णनमिषण एवमुक्तम्—गुहाभ्यन्तरे देवादिदेवो महादेवः समाधिमग्नः, गुहाद्वारे च नन्दी वेत्रपाणिस्तिष्ठन् कृत्स्नजीवान् समग्रामेव प्रकृतिञ्च अशेषचापलवर्जनार्थमपदिशति स्म, सममेव तेनालंघ्यनिदेशेन महीरुहा निष्कम्पाः, भ्रमरा निवृत्तगुञ्जनाः, विहगकुलानि मूकत्वमापन्नानि, पशवो निश्चलाः; किं बहुना? समग्र एव कालो निस्तब्ध एवावतिष्ठते! 'शाकुन्तले' महर्षेः काश्यपस्य कण्वस्याश्रमो वर्णित आस्ते; 'भट्टिकाव्ये' रामलक्ष्मणौ ताड़कावधार्थं विश्वामित्रयज्ञभूमिं समागम्य तत्रत्यानि वृक्षलतादीनि यज्ञधूमस्य कज्जलेन रक्तान्यपश्यताम्—एत एव सर्वे काव्यविशेषभागास्तेन कण्ठस्थीकृताः। 'श्रीचैतन्यचरित'-मधिकृत्यासौ उक्तवान्—"श्रीरामकृष्णसमीपगमनात् प्रागहमन्मत्तवत् तमेव ग्रन्थमपठम्।" खृष्टीय-धर्मपुस्तकस्य बाइबेलस्य नवीनसंहितया (New Testament) स ईदृक् जातपरिचयोऽभवद् यत् परतो धर्मप्रसङ्गकाले स्ववक्तव्यं परिस्फुटीकर्तुं बाइबेलवचांसि अनर्गलं समुद्धृतवान्। व्यवहाराध्ययनकाले (Law) तेन मनुयाज्ञवल्क्यादिस्मृतिभ्यो हिन्दूनां समाजनीतेर्मर्मकथा अधिगता।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अतः परस्मिन् काले स वदति स्म—"व्यवहाराजीवं गृह्णासि वा न वा, व्यवहार-शास्त्रं पाठ्यम्। तत ऋषिप्रणीतानाम् आचारव्यवहाराणां नियमा अनेकशो ज्ञातव्याः।"

विद्यालये बुद्धिप्राखर्यहेतोर्महेन्द्रनाथस्य विख्यातिरासीत्। स द्वितीयस्थान-मधिकृत्य हेयार-विद्यालयतः प्रवेशिकापरीक्षोत्तीर्णो बभूव। एफ्-ए-परीक्षायां तस्य पञ्चमस्थानमासीत्। १८७४-खृष्टाब्देऽसौ तृतीयस्थानमधिकृत्य प्रेसिडन्सि-महाविद्यालयाद् वि-ए-परीक्षायां कृतकार्यो जातः। छात्रावस्थायां स दर्शनेति-हास-इंरेजीसाहित्य-विज्ञानप्रभृतीनि मनःसंयोगपूर्वकमायत्तीकृतवान्। इंरेजी-साहित्याध्यापकस्य श्रीयुक्तटनि-महोदयस्यासौ नितरां प्रियान्तेवासी आसीत्।

महाविद्यालयपाठसमाप्तेः प्रागेवासौ १८७३-खृष्टाब्दे श्रीयुक्त-ठाकुर-चरणसेन-दुहितुः श्रीयुक्त-केशवचन्द्रसेन-सम्पर्कीयायाश्च स्वसुर्निकुञ्जदेव्याः पाणिमगृह्णात्। गार्हस्थ्यमालम्बमानस्यास्य अध्ययनं नाधिकतरमग्रसर-मासीत्। स व्यवहारपरीक्षार्थमुद्युक्तो जातः; किन्तु संसारपरिचालनार्थम् आयवृद्धेः सप्रयोजनत्वहेतोरसौ तमेव संकल्पं परिहाय वाणिज्यकृत्यशालायां कार्यमेकं स्वीकृतवान्। अतःपरमध्यापनव्रतः सन् बहुषु इंराजीविद्यालयेषु प्रधानशिक्षकत्वमकरोत्; विभिन्नमहाविद्यालयेषु चाध्यापनकर्मणि व्यापृतः सन् शिविकामेकामारुह्य गतागतं चक्र। अन्तेवासिषु तस्य गाम्भीर्येण धर्मभावेन अनायास-पाठन-पद्धत्या च समाकृष्टेषु सत्सु पाठनकालेऽनुशासनरक्षार्थं तस्य शक्तिक्षयो नावश्यक आसीत्। वस्तुतोऽध्यापनकर्मणि तेन विख्याति-रर्जिता।

श्रीरामकृष्ण-सन्दर्शनात् प्रागसौ ब्रह्मानन्द-केशवसेनस्य वाक्प्रबन्धेनाकृष्टः सन् ब्राह्मसमाज-मन्दिरं 'कमल-कुटिर'-प्रभृतीनि च स्थानान्यगमत्। श्रीराम-कृष्ण-घनिष्ठ-परिचितिलाभादनन्तरं स केशवस्य एतादृश्या आकर्षणशक्तेर्हेतु-निर्देशव्याजेनावोचत्, "अहो, तस्मिन् महाभागे केशवे मे सुतरां प्रीतिरासीत्; स च दैवतवन्मे प्रतिभाति स्म। तत्कारणं तावदसौ तदा बान्धवसहायः श्रीराम-कृष्णसमीपं गन्तुं प्रक्रममाण आसीत्, अमृतायमानांश्च श्रीप्रभोरुपदेशान् तन्ना-मानुल्लेखपूर्वकं प्रचारयति स्म।" श्रीरामकृष्ण-प्रथमपरिचयोऽनेन ब्राह्मसमाजे सुविदितनाम्नः स्वात्मीयान्नगेन्द्रनाथ-गुप्तात् १८८१-खृष्टाब्दे समासादितः। स्वविवाहात् स्वल्पकालात् परमेव सांसारिका घातप्रतिघाताः समारब्धा अभवन्। ततो निष्कृतिं लब्धुकामो महेन्द्रनाथः १८८२-खृष्टाब्दीय-फेब्रुयारी-मासस्य एक-स्मिन् दिवसे वराहनगरवास्तव्यस्य भगिनीपतेः श्री-ईशानचन्द्र-कविराजस्य गृहमा-श्रयत्। तद्वाटिकायामवस्थानकाले कस्मिंश्चित् सायाह्ने (२६-जानुयारी-दिनाङ्के) श्रीसिद्धेश्वर-मजुमदारेण साकमसौ दक्षिणेश्वर-कालिकामन्दिरं द्रष्टु-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मागच्छत् ; तत्रासावद्राक्षीत्—सन्ध्यायाः प्राक् श्रीरामकृष्णो भक्तपरिवेष्टितः सन् भगवत्-प्रसङ्गरतोऽभूत् । मनोहरस्य देवालयस्य विविक्तमावेष्टनम् ! मन्ये, पुरत एव श्रीरामकृष्णः शुकदेववत् श्रीभागवतं विवृणोति ; अथवा नीलाचल-जगन्नाथक्षेत्रे रामानन्द-स्वरूपादिभिर्भक्तैरासीनः श्रीगौराङ्गो श्रीभगवद्गुणकीर्तनं करोति । एतद्वर्जमन्यत्र गन्तुं न पार्यते । तथापि माष्टारमहाशयस्य कुतूहला-क्रान्तं कविजनोचितं चेतो देवालयस्य सामग्रिक-परिचयलाभार्थं तं बहिरचालयत् । उद्यानवीक्षणादनन्तरमसौ पुनः श्रीरामकृष्णप्रकोष्ठमासाद्योपविष्टवान् । अचिरादेव श्रीरामकृष्णो महेन्द्रनाथपरिचयं जिज्ञासमानो विमनस्कः सञ्जातः । तद्दृष्ट्वा तेनैवं विमृष्टम्—"तेन नियतमेव ईश्वरचिन्ता क्रियते ।" अतोऽसौ श्रीरामकृष्ण-मापृच्छत । गमनावसरे श्रीभगवान् निर्देशक्रमेणावदत्, "पुनरागच्छ ।"

पूर्वाह्णेऽष्टघटिकायां महेन्द्रनाथस्य द्वितीयं श्रीरामकृष्णदर्शनं संवृत्तम् । श्रीरामकृष्णः पुनस्तस्य परिचयमपृच्छत् ; प्रसङ्गतोऽविवाहितजीवनं प्रशंसन्नसौ ज्ञातुमियेष, "भोः, किं ते विवाहः सम्पन्नः ?" महेन्द्रनाथोऽवादीत् : "महाभाग, वाढ़म् ।" सपद्येव श्रीरामकृष्णः स्वभ्रातुष्पुत्रमाकार्य सविस्मयं जगाद "अयि रे रामलाल, सर्वं विनष्टम् ! अनेन विवाहः कृत एव !" अतः क्रमेणापृच्छया-सौ एवं ज्ञातवान्—महेन्द्रनाथस्य पुत्रोऽप्येको जात इति । क्षेत्र-द्वितये श्रीराम-कृष्ण-प्रतिक्रियादर्शनात् तस्य प्रतीतिर्भूता यत्—एतावन्तं कालं यद्यप्यसौ धर्म-चर्चाञ्चोपासनादिकं कृतवान्, तथापि यथार्थधार्मिकदृष्ट्या जागतिकस्तरा-दूर्ध्वं समधिकतया उत्थातुं न क्षमः । इत्थं तस्याभिमाने प्रतिपदं चूर्णीकृतेऽपि, मन्ये, सम्पूर्णतया तस्य निरुत्साहत्वमविधाय सान्त्वनमिषेण श्रीरामकृष्णो जगाद—"दृश्यतां भोः, त्वल्लक्षणानि तावदुत्तमान्यासन्—चक्षुर्ललाटादीनि दृष्ट्वैव मया बोद्धुं शक्यते ।" एतेन काञ्चिदाश्वस्तिं गतोऽपि महेन्द्रनाथोऽचिरादेव कैश्चिद-परैराघातैर्विनीतिं प्राप । कान्त-हेगेल-स्पेन्सारप्रमुखानां पाश्च्यात्त्यदार्शनिकानां मतवादैः सह सञ्जात-परिचयो महेन्द्रनाथो मनसीदृशमाशयमाधत्त—मानवजीवने बुद्धिरेव श्रेष्ठं वस्तु ; यस्तु बुद्धिपथमारूढः कृतविद्यतां गतः, स एव तत्त्वतो ज्ञानीति । परन्त्वद्य तादृशशिक्षाविहीनस्य श्रीरामकृष्णस्य सविधेऽसौ ज्ञात-वान्—ईश्वरोपलब्धिरेव ज्ञानम्, तदन्यत् सर्वमज्ञानमिति । सपद्येव श्रीराम-कृष्णेन पुनरेकः प्रश्नः कृतः—"किं त्वं साकारे विश्वसिषि, उत निराकारे ?" महेन्द्रनाथोऽवदत्—"निराकार एव मे रोचते ।" श्रीरामकृष्णोऽपि व्यज्ञापयत्—"निराकार-विश्वासः खलूत्तमः ; परन्तु साकारोऽपि सत्यः ।" एतत् परस्पर-विरुद्धं विश्वासद्वयं कथमवितथं स्यादिति निर्णयाक्षमस्य महेन्द्रनाथस्य अभिमानः पुनस्तृतीयवारं विचूर्णः संवृत्तः । तेन पुनरप्येतदाकर्णितं—"नहि मन्दिराधिष्ठिता देवी मृन्मयी, सा खलु चिन्मयी !" महेन्द्रनाथस्तन्मुहूर्तमेवोक्तवान्—"अस्य

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तावत् सत्यत्वे सति ये नाम प्रतिमोपासकास्ते खलु बोधयितव्याः—मृत्तिका-निर्मिता तु नेश्वरः, प्रतिमायामेव ईश्वरमुद्दिश्य केवलं पूजा क्रियते।" सपद्येव श्रीरामकृष्णेनोक्तम्—"कलिकाता-वासिनामीदृगेवाचरणम्! केवलं भाषणप्रदानम्, अन्येषामपि बोधनम्। यदि बोधनेन प्रयोजनं स्यात् तर्हि स एव भगवान् बोधयिष्यति। कथं ते शीर्षवेदना? यथा तवैव ज्ञानभक्ती भवेतां तच्चेष्टा क्रियताम्।" महेन्द्रनाथस्य अभिमानसौधः सर्वथैव भूमिसाद् भूतः। अनेनाधुना सम्यग् बुद्धम्—धर्मस्तावदनु-भूतेरेव पदार्थः—बुद्धिस्ततपर्यन्तमेव अग्रसरा भवितुं नार्हति। बुद्धिरूपेण दुर्बलेन यन्त्रेण निर्गुणं निराकारं ब्रह्मतत्त्वमाविष्कर्तुं न शक्यते। तादृक्तत्त्वलाभार्थं तत्त्वदृशां साधूनां सङ्गोऽत्यावश्यकः। तमृते सातिशय-परिमार्जितबुद्धिरपि अस्मान् भगवत्सकाशं नेतुं न प्रभुः। अतः परमसौ साकल्येनात्मानं श्रीरामकृष्ण-चरणयोः समर्प्य स्वगृहमावर्तत।

कियत्कालं वराहनगरावस्थानावसरे सति महेन्द्रनाथ उपर्युपरि कति वारान् दक्षिणेश्वरं संप्राप्याचिरादेव श्रीरामकृष्णान्तरङ्गसमाजस्याङ्गीभूतो जातः; श्रीरामकृष्ण-महेन्द्रनाथयोः सर्वकार्येषु सर्वकथासु च असावन्तरङ्गसहजभावः प्राकट्यं प्राप। तद्वर्षीय-५-मार्च-दिनांके—महेन्द्रनाथे श्रीरामकृष्णप्रकोष्ठं प्रविशत्येव श्रीरामकृष्णः सकौतुकं समवेतान् बालकभक्तानवोचत्—"स एव पुनरागतो रे!" सममेवाहिफेनवशीकृतस्य कस्यचिन्मयूरस्य कथां विवृतवान्—तस्मा एव मयूराय प्रत्यहमेवाहिफेनं यथाकालं प्रदत्तमासीत्; लोभाकृष्टोऽसौ प्रतिदिनं यथासमयं तस्मिन्नेव स्थाने समुपस्थितोऽभवत्। महेन्द्रनाथस्य तत्त्वत एव दक्षिणेश्वर-श्रीरामकृष्णस्याकृष्टिः समापतिता। स स्वगृहे समासीनो दक्षिणेश्वरचिन्तनमकार्षीत्। दीर्घविरहं सोढुमशक्नुवन् तूर्णमेव श्रीगुरुपदकमले समागच्छत्। एकदा वैशाखमासस्य प्रचण्डरौद्रे पादचारं घर्माक्तकलेवरं महेन्द्रनाथं कलिकातायां दक्षिणेश्वरं समागतं दृष्ट्वा श्रीरामकृष्णोऽशंसत्—"अस्याभ्यन्तरे (स्वदेहं निर्दिशन्) किमपि वर्तते येनाकृष्टा इंलिशम्याना (इंराजीशिक्षिताः) अपि उन्मत्तवदत्र धावन्त आगच्छन्ति।" एतमाकर्षणहेतुं निर्दिशन् श्रीरामकृष्ण एकदा महेन्द्रनाथमवदत्—"कथं तव तावत् अत्रत्यस्य जनस्योपरि (ममोपरि) आकर्षणम्? कलिकातायामसंख्यानां लोकानां वासः। तेषां कस्यापि प्रीतिर्न जाता। कथं ते प्रीतिर्भूता? अस्य हेतुस्तावत् ज मान्तरीणः संस्कारः।" पुनरन्यदावादीत्—"दृश्यताम्, तव गृहम्, कस्त्वम्, अन्तर्बहिश्च ते, पूर्वजन्मनां-ते कथा, अतःपरं ते किं भवेत्—सर्वाण्येतानि मयैव ज्ञायते।" (मूलकथामृतम्, ४।९।४) अन्यप्रसङ्गादाह—"स्वच्छचक्षुर्भ्यां गौराङ्गस्य साङ्गोपाङ्गान् अपश्यम्। तेषां मध्ये त्वमपि तावन्मन्ये दृष्ट आसीः। (तदेव, २।११।२) ततोऽपि सुस्पष्टतया अन्यस्मिन् समये प्राह, "त्वामहमभिज्ञातवान्—

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्वत्कृत-'चैतन्यभागवत'श्रवणात्। त्वं तावत् स्वकीयो जनः, आवयोरेकैव सत्ता—यथा पिता पुत्रश्च" (तदेव, ४।८।२)।

एतादृश-संस्कारवन्तम् उच्चाधिकारिणं महेन्द्रनाथं श्रीरामकृष्णो विविधैरुपदेशैः साधनैश्च क्रमेणानुभूतेरुत्तरस्तरेषु नयति स्म। त्रिकालज्ञो भगवान् श्रीरामकृष्णो महेन्द्रनाथस्य अन्तर्लोकं सम्यक् विदितवान्। अतस्तस्मै सद्गार्हस्थ्यस्योपदेशान् प्रादात्; कदा वा तस्य मनसि वैराग्ये समुदिते सति संसाराश्रमस्य बाहुगुण्यं प्रति तस्य दृष्टिमाकृष्य तं वैराग्यपथात् निवर्तयामास। अत एकदा जगदम्बासमीपे प्रार्थनां व्यज्ञापयत्, "अनेन सर्वं मा त्याजय, मातः!... यदि तं संसारे स्थापयेस्तर्हि कदा कदा तस्मै दर्शनं दद्याः; अन्यथासौ कथं स्थास्यति? यदि मातः, कदा कदा सकृत् दर्शनं न दद्यास्तर्हि कथमुत्साहो भवेत्? भवतु, तस्यान्तिमकाले यत् सम्भवेत् तत् क्रियताम्।" अपरेषु च दिवसेषु संसारे कथं स्थातव्यम् इत्यस्यापि तस्मै उपदेशो दत्तः। यथा—पुत्रस्ते जात इति त्वामुपालब्धवान्। अधुना गत्वा गृहे स्थीयताम्। तान् विज्ञापय—त्वं तेषां स्वजन इव। अन्तर्जानीयाः, त्वमपि तेषां न स्वजनः, तेऽपि तव न स्वंजनाः।" "पितरि प्रीतिमान् भवेः; अधुना त्वमुत्पतनक्षमः; पितरमष्टाङ्गैः प्रणमितुं न शक्नोषि? ...माता जननी च—या जगद्रूपेणास्ते सर्वव्यापिनी सती सैव जननी।" "या ईश्वरपथे विघ्नं ददाति, सा अविद्या स्त्री; ...तादृशीं स्त्रियं त्यक्ष्यसि।" पुनः कियत्कालात् परमेव ईदृशकठोरादेशश्रवणेन चिन्ताकुलं महेन्द्रनाथं निकषा गत्वा तत्त्वकथा अश्रावयत्, "परन्तु यस्येश्वरे भक्तिरस्ति, सर्व एव तस्य वशमागच्छन्ति। ...भक्त्यां सत्यां स्त्री अपि क्रमेण ईश्वरपथेन गन्तुमर्हति। सर्वाण्येव कर्माणि कुर्याः, परन्तु मन ईश्वर एव स्थापयेः।" पुनश्चोपदिष्टवान्, "ईश्वरस्य नामगुणकीर्तनं सदैव विधेयम्। सत्सङ्गश्च कर्तव्यः—ईश्वरभक्तानां साधूनां वा समीपमन्तरान्तरा गन्तव्यम्। संसाराभ्यन्तरे विषयकर्मसु च रात्रिन्दिवमवस्थानेन ईश्वरे मनःस्थापनं न सम्भवेत्। अन्तरान्तरा निर्जनप्रदेशो गन्तव्यः, तत्र तस्य (ईश्वरस्य) चिन्ता आवश्यकी। प्रथमावस्थायां कदा कदा निर्जनप्रदेशवासादृते ईश्वरे मनःस्थापनं नितरां दुष्करम्।" "ईश्वरे भक्तिमलभमानः संसारकर्माणि सम्पादयितुं प्रचलसि चेत्, अधिकतरमेव विलिप्तः भविष्यसि। हस्ते तैललेपनात् परं पनसभङ्गः कर्तव्यः ...ईश्वरभक्तिरूपं तैलं समासाद्य संसारकर्मणि हस्तामर्शः कार्यः।"

श्रीरामकृष्णो महेन्द्रनाथाय मुख्यत एव शुद्धाया भक्तेरेव उपदेशं ददाति स्म। एकदाभ्यधात्, "पश्य, त्वया यावान् विचारः कृतस्तस्य आधिक्यमेव संवृत्तम्—नातःपरम्। ब्रूहि, पुनर्न करिष्यसि। महेन्द्रनाथो युक्तकरः सन्न-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वादीत्, "भगवन्, नहि !" महेन्द्रनाथो निसर्गत एव व्रीड़ाप्रवण आसीत्। नृत्यसमये एकदा श्रीरामकृष्णो महेन्द्रनाथं निश्चेष्टं तिष्ठन्तं दृष्ट्वा प्रसह्य तमाकृष्यावदत्, "रे श्यालक, नृत्यताम् !" स सर्वदा तस्मै यूने भगवदालापञ्चाशिक्षयत्। एकदा महेन्द्रनाथ-नरेन्द्रनाथौ छात्राणां नैतिकावनतिमुद्दिश्यालोचयन्तावास्ताम्। तद्विज्ञाय श्रीरामकृष्णो महेन्द्रनाथमाह, "एतादृशमालोचनं नोचितम्—ईश्वरकथामृते अन्या कथा न शोभना।" एवं साधुसङ्ग-विविक्तदेशसेवित्व-भगवदालपनैः सह व्याकुलतायाः प्रयोजनवत्त्वं महेन्द्रनाथहृदये दृढ़मङ्कयन् श्रीरामकृष्ण आबभाषे, "नितान्तव्याकुलतया अश्रुविसर्जनेन स एव भगवान् अक्ष्णोर्गोचरो भवति।" ईदृशेषु स्थलेषु व्याकुलत्वोल्लेखं दृष्ट्वा, प्रागेव विचारविषयि च निषेधवाक्यं श्रुत्वा पाठको नैवं मन्यताम्—श्रीरामकृष्णो महेन्द्रनाथं भावुकतया निमज्जयितुमैच्छत्। पाश्चात्त्य-शिक्षा-हेतोरस्मद्मनःसु या वितथा तर्कप्रवणता समायाति भगवत्सम्बन्धहीनां च बुद्धिमत्तां प्रति श्रद्धाग्रहौ जायेते, महेन्द्रनाथस्य ततो निवर्तनमीश्वराभिमुखविचारे च प्रवर्तनम् श्रीरामकृष्णस्य यथार्थोद्देश्यमासीत्। अतोऽसौ एवमवादीदिति श्रूयते—"समेव विचारेण नितरां प्रयोजनम्—कामिनी-काञ्चने अनित्ये, ईश्वर एव एकमात्रं वस्तु। अथन किं स्यात् ? अन्नं भवति, वैदलो भवति.....एतावदेव ; भगवल्लाभो न सम्पद्यते। अतोऽर्थो जीवनस्योद्देश्यं भवितुं नार्हति। एतस्य नाम विचारः। किं त्वया बुद्धम् ?"

महेन्द्रनाथः श्रीरामकृष्णसमीपं गच्छति, तूष्णीम्भावमालम्ब्य सर्वं शृणोति, सर्वं पश्यति च। एवं समग्रव्यापारं परिवेषञ्च आत्मस्मृतौ मुद्रयन् स गृहे आवर्तनात् परम् पूर्वाभ्यासानुसारेण दिनलिपौ संक्षेपतो विस्तरतो वा लिखति स्म। एवमेव यथाकालं 'कथामृत'स्याविर्भावोऽभूत्।

महेन्द्रनाथः प्रथमतो निराकार एव आसक्त आसीत् ; श्रीरामकृष्णस्तस्मै तदनुरूपमुपदेशं प्रादात्। एकदा मतिशीलस्य जलाशये क्रीड़ारतान् मत्स्यान् प्रदर्श्यासौ उक्तवान्—निराकार-ब्रह्मणि एवमेव मनो निमग्नमास्ते इति चिन्तितव्यम्। महेन्द्रनाथस्तत्पथेनैव प्रचलति स्म। किन्त्ववशेषे एकदा (२२-अक्टोबरः, १८८२-खृः) तेन स्वीकृतमेवम् "अहं तावत् पश्यामि, आदावेव निराकारे मनसः स्थिरीकरणं न सुकरम्।" श्रीरामकृष्णः सपद्येव उत्तरमदात्, "किं दृष्टम् ? तर्हि साकारध्यानं कथं न क्रियते ?" महेन्द्रनाथस्तत् आनम्रमूर्तिः सन् स्वीकृत्य श्रीरामकृष्णनिर्देशानूसारेण ध्यानभजनादीनि कर्तुं प्राक्रमत। तस्य दक्षिणेश्वरगमने चोत्तरोत्तरम् आधिक्यं समापतितम्। सत्यवसरे द्विचतुर्दिनानि च तत्रावतिष्ठत। एवं १८८३-खृष्टाब्दस्य प्रायशः समग्रमेव डिसेम्बरमासं स श्रीगुरुपादपद्मयोः सकाशे यापितवान्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आध्यात्मिकप्रगतेः सममेव महेन्द्रनाथस्य श्रीरामकृष्णसम्बन्धिनी धारणा क्रमेण परिवर्तनं गता। १८८२-खृष्टाब्दस्य मार्चमासि यो महेन्द्रनाथः श्रीरामकृष्णमुद्दिश्यावोचत्, "ईदृशं ज्ञानम्, ईदृशं प्रेम, एतादृशी भक्तिः—विश्वासः, वैराग्यमुदारभावो वा कुत्रापि नापश्यम्" ; स एव १८८३-खृष्टाब्दस्य जुलायि-मासे उररीकृतवान्, "भवन्तमीश्वरः स्वयं स्वहस्तेन निर्मितवान्। अन्यान् लोकान् यन्त्रे निक्षिप्य अवासृजत्—यथा नियमानुसारतः सर्वा सृष्टिर्भूता" ; पुनः स एव १८८५-खृष्टाब्दस्य जुलायि-मासि व्यज्ञापयत्, "इयं मे मनसः प्रतीतिः—यीशुखृष्टः, चैतन्यः भवांश्च ऐक्यभाजः।" श्रीरामकृष्णस्य कस्यचिदुपदेशस्यावृत्तिं कुर्वाणो महेन्द्रनाथो यदाभाषत, 'अवतार एकं बृहत् छिद्रम्, तस्य छिद्रस्याभ्यन्तरे अनन्त ईश्वरो दृश्यते', तथा श्रीरामकृष्णोऽपृच्छत्, "उच्यताम् किं खलु तत् छिद्रम् ?" महेन्द्रनाथोऽवदत् "भवानेव तच्छिद्रम्।" सममेव श्रीरामकृष्णस्तद् गात्रं परामृशन् उक्तवान् "त्वया खलु तदेव अवधारितम्—मनोज्ञमेव संवृत्तम् !"

काशीपुरे श्रीरामकृष्णस्यास्वस्थतायां महेन्द्रनाथः कामारपुकुरदर्शनार्थं प्रस्थितः। सङ्गे गोशकटे सत्यप्यसौ वर्धमानादधिकांशपथं पदव्रजमव्रजत्। तस्मिन् पथि दस्यूनामुपद्रवो बभूव—पथिकैः सदा सशङ्कैर्भवितव्यमासीत्। तदा महेन्द्रनाथस्य चक्षुषोर्नवानुरागस्य अञ्जनम्—दूरतः कामारपुकुरं दृष्ट्वा साष्टाङ्गं प्राणमत् ; कामारपुकुरस्य पथि येनापि साक्षात्कारो जातः तस्मा अपि अभिवादनं विज्ञापितवान्। सर्वत्र सर्वाण्येव श्रीरामकृष्णस्मृतिसम्पृक्तानीति ज्ञात्वा सर्ववस्तूनामेव दर्शनस्पर्शनादीनि कर्तुमुपाक्रमत। रोगशय्यायां शायितः श्रीरामकृष्णः सर्वमेतद् विज्ञाय भक्तमेकमवादीत्, "दृश्यतां, तस्य नाम कीदृशं प्रेम ! कोऽपि तं किमपि नावदत्, भक्तेराधिक्यहेतोः स्वत एव एतावत् कष्टं सहित्वा तान्येव स्थानान्यगच्छत्—यतो मया तान्येव स्थानानि गतान्यासन् ! अस्य भक्तिर्विभीषणभक्तिवत्। मानुषं दृष्ट्वैव विभीषणस्तं स्वच्छन्दतः सज्जीकृत्य तस्यपूजामारात्रिकञ्च कृतवान् ; उक्तवांश्च, 'अयमेव मे प्रभो रामचन्द्रस्य एका मूर्तिः।' कामारपुकुरात् प्रत्यागतं महेन्द्रनाथं श्रीरामकृष्णः पप्रच्छ—"तस्मिन् दस्यूनां देशे कथं त्वया गतमासीत् ? स्वस्थः सन्नहं त्वया साकं गमिष्यामि।" सशरीरस्य श्रीरामकृष्णस्य महेन्द्रनाथेन सह गमनं सम्भावितं नासीत् ; किन्तु महेन्द्रनाथस्य हृदयमधिष्ठाय स एव कारुण्यमूर्त्तिः तमष्टनववारान् कामारपुकुरम् नीतवान्। कामारपुकुरं प्रति महेन्द्रमानसं तीव्रतया समाकृष्टमभवत् ; तत्रैवात्यन्तिकवासार्थं श्रीश्रीमातुरनुमतिं प्रार्थितवान्। परन्तु श्रीश्रीमातावदत्, "वत्स, स्थानमिदं म्यालेरियारोगस्य आवासः। तत्रावस्थातुं न पारयिष्यसि।" मातुरादेश एव प्रतिपालितोऽभूत्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यथा बाल्ये तथा यौवनेऽपि महेन्द्रनाथो निसर्गस्य सौन्दर्य-गाम्भीर्य-निःसीमत्वादिषु श्रीभगवतोऽलक्ष्यहस्तस्य आभासं प्राप्नोत्। श्रीरामकृष्णलीला-कालेऽसौ काञ्चनजङ्घाशिखरं दृष्ट्वा आनन्दाप्लुतो भक्त्या च सञ्जातपुलकोऽभूत्। प्रत्यावर्तनानन्तरं श्रीरामकृष्णस्तमपृच्छत्—"शोभा कीदृशी दृष्टा! किं हिमालयदर्शनं कुर्वतस्ते मनसि ईश्वरकथा समायाता?"

दक्षिणेश्वरे श्रीरामकृष्णो नरेन्द्रनाथेन महेन्द्रनाथस्य तर्कावसरं सृष्ट्वा कौतुकमनुभूतवान्। परन्तु स्वभावतो लज्जाप्रवणस्य महेन्द्रनाथस्य मुखे तदा वाक्-स्फूर्तिर्नाभवत्। अतः श्रीरामकृष्णेन् उक्तम्, "केवलं परीक्षोत्तरणे किं स्यात्? माष्टारस्यास्य तावत् स्त्रीभावः, किमपि वक्तुं न प्रभुः।" अन्यदा स सङ्गीतकरणे सङ्कुचितोऽभवत्। तदा श्रीरामकृष्ण उक्तवान्, "असौ विद्यालये दन्तान् आविष्करिष्यति, पुनरत्र सङ्गीतकरणे यावती लज्जा!" कदा कदा वाभ्यधात्, "अस्य तावत् सखीभावः।"

भवतु नाम, नम्रस्वभावेन अनेन मनुष्येण पुरुषसिंहस्य नरेन्द्रनाथस्य प्रीतेः सम्बन्धः स्थापितोऽभवत्; अस्मिन् काऽपि बाधा नागता। पितृवियोगानन्तरं नरेन्द्रनाथस्य गृहे अन्नकष्टं समापतत्। तदा महेन्द्रनाथो नरेन्द्रनाथस्य कृते मेट्रोपलिटान्-विद्यालये शिक्षकत्वकार्यस्य व्यवस्थापनं कृतवान्। एकदा-सौ मासत्रयस्य कृते नरेन्द्रनाथगृहव्ययनिर्वाहार्थं एकशतरूप्यकाणि दत्तवान्; एतदृते रहसि नरेन्द्रजनन्या हस्ते अर्थं समर्प्यावदत्: "नरेन्द्रनाथो मा विज्ञाप्यः, तर्हि स तं प्रत्यर्पयेत्।" श्रीरामकृष्णदेहत्यागानन्तरं यदा त्यागिनो युवभक्ताः सहायसम्पद्हीनाः, तदा विरला द्विचतुरा गृहस्थभक्तास्तेषां पार्श्वे समवेता बभूवुः। तेषु माष्टारमहाशयो महेन्द्रनाथोऽन्यतम आसीत्। तेषामेव सार्विकानुकूल्येन वराहनगरमठस्य संघटनं संरक्षणञ्च सम्भाविते अभवताम्। स विद्यालयस्य अवसरदिवसेषु प्रायशः मठं समागम्य रात्रियापनं कृतवान्। एताः कथाः स्मरन् स्वामी विवेकानन्दः परवर्तिनि काले एकस्मिन् पत्रे लिखितवान्, "भो राखाल, किं स्मर्यते—श्रीप्रभोर्देहत्यागादनन्तरम् एते दरिद्रा वटव इत्यवज्ञाय अस्मान् सर्वे परित्यक्तवन्तः? केवलं बलरामः, सुरेशः, माष्टारश्चुनीवाबुश्च—एते सर्वे विपदि अस्माकं बान्धवाः। अतो वयम् एतेषामृणं कदापि शोधयितुं न पारयिष्यामः।"

श्रीश्रीप्रभोरदर्शनात् परं पार्थिवदृष्ट्या विच्छिन्नो माष्टारमहाशयस्तीर्थाटनेषु साधुसङ्गेषु तपश्चर्यासु च मनो निर्विवेश। एतस्मिन्नवसरे स पुरी-काशी-वृन्दावन-प्रयागायोध्या-हरिद्वारप्रभृतीनि तीर्थानि पर्यटन् श्रीमत्-त्रैलङ्ग-स्वामिनो भास्करानन्दस्वामिनो, रघुनाथदास-बाबाजीमहाराजस्य च दर्शनलाभेन कृतकृत्यो जातः। माष्टारमहाशय-साधनेतिहासं नितान्तमेव चमत्कारि।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एकदासौ दक्षिणेश्वर-पञ्चवटी-कुटिरे तपस्यानिरतो बभूव। किन्तु आर्द्रगृहे दुश्चरतपश्चर्याहितोर्माष्टारमहाशयो भृशमस्वस्थः संवृत्तः, एतेन तस्य चलन-शक्तिराहित्यमपि समायात्। अतः स्वामी प्रेमानन्दस्तं शकटेन तद्गृहम-नयत्। तस्य वराहनगरमठे वासः पूर्वमेवोक्तः। एतदृते दक्षिणेश्वरस्थ-नहवतखानेति गृहेऽपि असौ अन्तरान्तरा रात्रियापनं कृतवान्। अपि च तस्याद्भुतैका स्वेच्छावृत्तिरासीत्; स्वगृहे अवस्थानकाले स गभीरायां रात्रौ निद्रोत्थितः सन् स्वशय्यासहायः कलिकाताविश्वविद्यालयस्य सेनेटहलेतिबृहत्-प्रासादस्यालिन्दमागच्छत्, तत्र च गृहहीनैरकिञ्चनैर्नरैः सह शयनपूर्वकं आत्म-न्यपि सहायसम्बलहीनस्य गृहहीनस्य जनस्यावस्थामारोपयितुं कृतयत्नो बभूव। यदि कश्चिद् गुप्तसन्न्यासिनमिमपृच्छत्, "कथमेतादृक् कठोरता भवता कृतासीत्?" तर्ह्ययमुत्तरं प्रादात्, "गृहस्य परिवारस्य च भावो मनसो निर्गन्तुं नेच्छति, संसक्तकरसवत् लग्नस्तिष्ठत्येव।" पर्वोपलक्ष्य माष्टार-महाशयो गङ्गारोधसि समवेतानां साधूनां समीपं गभीरात्रावागच्छत्। तत्रा-पश्यत—उन्मुक्ताकाशतले परमानन्देन ते प्रज्वलदनलपार्श्व ध्यानमग्ना जपरता वा वर्तन्ते। कदा वा हाओड़ा-ष्टेशनं समागम्य पुरीस्थ-जगन्नाथक्षेत्रात् प्रत्या-गतानां यात्रिणां वदनप्रसन्नतां निरीक्षितवान्; तेभ्योऽपि महाप्रसादं याचित्वाऽ भक्षयत्। एतेन महातीर्थगमनस्य किञ्चित् फलं तस्यैव च भवेदिति आशा! श्रीरामकृष्ण-चिरसामीप्यानुभवार्थमसौ दिवाभागेऽपि अवसरे सति स्वकक्षं प्रविश्य पुरातनदिनलिपिमुन्मुच्य श्रीरामकृष्ण-श्रीमुखनिःसृतं 'कथामृतं' पठन् ध्यातवान्।

१९१२-खृष्टाब्दे दुर्गापूजाया अनन्तरम् माष्टारमहाशयः श्रीश्रीमातृदेवी-सारदादेव्या सह काशीधामागमत्। तत्र कियद्दिवसान् यापयित्वा वत्सरकल्प-कालं तीर्थाटनादिकं कृतवान्। तस्मिन्नवसरेऽसौ एकमासाधिकालं कनखल-सेवाश्रमादारात् एकस्मिन् कुटिरे अवस्थाय तप आचरत्। तदा स्वामी तुरीयानन्दः कनखल-सेवाश्रमे समतिष्ठत। तेन सार्धं भ्रमणेन आलोचनादिना च माष्टारमहाशयो नितरानन्दमवाप। अतः परमसौ वृन्दावनं गत्वा हिन्दोल-यात्रामपश्यद् रासधारिभिश्चाभिनीतं 'कृष्णसुदामे'ति-'पाला'नाटकं दृष्ट्वा अतीवाह्लादितोऽभवत्।

प्रकाशम् एताः साधना ऋतेऽपि अनाड़म्बर-योगिनो माष्टारमहाशयस्य तपोनिष्ठा विभिन्नासु प्रच्छन्नधारासु प्रवहन्ती आस्त। ऋषीणां भावान् आत्मन्यारोपयितुकामोऽसौ कदा हविष्यान्नमभुङ्क्त पर्णकुट्यां वावसत्; कदा वा वृक्षमूले एकाकी उपविशन्नास्त। विशालं नभः, गगनचुम्बी पर्वतः, अपारो वारिधिः, भास्वती तारकाश्रेणी, दिगन्तविसारि प्रान्तरम्, मनोहारिणी

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सान्द्रवनानी, सुपेलव-सुगन्धीनि पुष्पाणि—सर्वाण्येतानि तच्चित्ते ईश्वरीयचिन्तां सञ्जीव्य मुहुर्मुहुस्तम् ऋषीणां तपोभूमिमनयत् । यथावसरं तस्यान्तर्निहितः साधनाभिलाष उद्दीपितोऽभवत् । एवं १९२७-खृष्टाब्दे मिहिजामाख्यस्थाने सत्यामपि इष्टकासुनिर्मितायां वाटिकायां माष्टार-महाशयः पर्णकुटीरे वासं चक्रे; १९२५-खृष्टाब्दादन्तिमे भागे जगन्नाथक्षेत्र-पुरीनगर्य्यां मासचतुष्टयं विविक्तं सेवमानः साधनां कृतवान् । तदीयं मानसं सदा उच्चध्वनिषु बद्धमासीत् । प्रभातसूर्यं पश्यत एव दिव्यभावग्रहणे सदोन्मुखस्य माष्टारमहाशयस्यास्ये गायत्रीमन्त्रः समुच्चारितोऽभवत् । सर्वदा प्राचीनचिन्ताधाराभिराप्लुतस्य माष्टारमहाशयस्य देहे मनसि च प्राचीनस्य सुस्पष्टः कश्चिदंको निपतितः । निविष्टमनसि तस्मिन् कस्याश्चिदुपनिषदः कमपि मन्त्रं व्याख्यातवति, श्वेतश्मश्रुः प्रशान्तललाटः सौम्यवपुः सप्ततिपरः कश्चिद् वैदिकर्षिः अस्मिन् मर्त्यधामन्यवतीर्ण इत्यनुभवो भवति स्म । बृहदारण्यकोपनिषदो ब्रह्मवादिन्या गार्ग्या द्वितीयां पृच्छामसौ सोच्छ्वासं प्राशंसत् । एकदा (१९२१-खृः) अंशस्यास्य व्याख्यानकाले स आवेगेनैतावद् अभिभूतोऽभवत् यत्, आत्मानं नियन्त्रितुमशक्नुवन् शय्याग्रहणमकार्षीत् । अनेकक्षणमुपव्यजनात् परं माष्टारमहाशयः स्वाभाविकीमवस्थामवाप्तवान् ।

सत्यपि गृहस्थत्वे तस्य साधूचिता अशेषसद्गुणाः स्वत एव जनानां दृष्टिमाकृष्टवन्तः । प्रातः, स्नानान्ते, मध्याह्ने सायंसन्ध्यायाञ्चासौ प्रतिदिनं नियमानुसारतो निदिध्यासनार्थमुपाविशत् । संसारोऽयमसारः, सर्वेषां वस्तूनामुपरि मृत्योः कराली छाया प्रसृतेति भावनां सर्वदैवासौ चित्तेऽजागरयत् । एतदपि उक्तञ्च तेन—सत्यामेव मृत्युचिन्तायाम् कदापि कस्यापि तालातिक्रमं पदक्षेपो न भवति, कस्मिंश्चिद् वस्तुन्यपि वा आसक्तिर्न तिष्ठतीति । सांसारिकप्रयोजनेऽप्यसौ कमपि जनं कठिनवचो वक्तुं न क्षम आसीत् । अपरस्य अन्यायं दृष्ट्वा-भणत्, "यस्मा एवेश्वरो यादृशं स्वभावं प्रदत्तवान्, स तदनुसारत एव कर्म करोति—मानुषस्य तावत् को नाम दोषः ?" माष्टारमहाशयः सर्वविषयेषु स्वनिर्भर आसीत् ; सन्निधावेव स्थितेऽपि भृत्ये स तत्सेवाग्रहणात् पराङ्मुखोऽभवत् । अष्टसप्ततिवर्षवयस्यपि स्नायुशूलेन हस्ते निदारुणं व्यथाग्रस्तेऽपि यन्त्रणोपशमार्थमसौ स्वहस्तेन औषधपुटकमुष्णीकृत्य सेकं प्रादात् । परमेतेषु सद्गुणेषु सत्स्वपि आत्मप्रशंसाश्रवणेन नितरां कुपितः सन्नवादीत्, "पारस्परिकी प्रशंसा (mutual admiration) तावत् त्यज्यताम् ।" निरभिमानो माष्टारमहाशयः 'अहम्' 'मम' चोच्चारयितुं नाशकत्, अतो बहुवचन-प्रयोगेन गौणभावेन वा कथा अकथयत् । तस्य वाटिकायाः 'ठाकुरवाड़ी'ति नाम । स कदा कदा भवानीपुरस्थ-गदाधराश्रमे अतिष्ठत् । वार एकस्मिन् तत्र ईदृश-दीर्घकालावस्थान-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

समये कार्योपलक्षेण स्वप्रतिष्ठापित-विद्यालयगमनस्य आवश्यकत्वे सति गदाधराश्रमस्थान् आश्रमिकान् एवं ज्ञापयित्वा प्रचलितः—"नाहमत्र भोक्ष्ये—कस्यचित् भक्तस्य गृहं गच्छामि ।' भक्तस्तावन्नापरः, महेन्द्रनाथः स्वयमेव !

१९०५-खृष्टाब्दपर्यन्तं नानाविद्यालयेषु अध्यापनादेः परमसौ उत्तरकलिकातास्थ-झामापुकुरेति-पल्ल्यां मर्टन्-इन्ष्टिटिउट्-इत्याख्यविद्यालयं क्रीतवान् । स एव विद्यालयः परतः ५०-आमहार्ष्ट्ष्ट्रीटि समानीतः । तस्या वाटिकायाश्चतुस्तलस्थे गृहे असावतिष्ठत् । तुलसीपुष्पवृक्षैः सज्जितायां गृहच्छदिषि आसीनो माष्टारमहाशयः प्रातः सायंसन्ध्यायाञ्च धर्मालापं कृतवान् । कक्षोऽयं तस्य वासस्थानमाश्रमो वासीत् । दिवसे सकृदेव गुरुप्रसादलेनाख्य-वर्त्मनि स्थितं स्वगृहं गत्वा तेन वैषयिकव्यापाराः अनुष्ठिताः । क्रमेणायं संसारसम्पर्कलवोऽपि तिरोहितः सन् तस्मै भगवत्प्रसङ्गार्थं सम्पूर्णतया मुक्तिं प्रादात् । 'कथामृत'-प्रकाशानन्तरं स्वदेशतो विदेशतश्च अगणिता भक्ता आध्यात्मिकपिपासानिवारणार्थं तत्सविधमागच्छन्ति स्म ; माष्टारमहाशयश्च स्वभाण्डं निःशेषीकृत्य तान् श्रीरामकृष्णकथाः श्रावयति स्म ।

शेषजीवने ये नाम भक्ता माष्टारमहाशयं दृष्टवन्तः, ते जानन्ति यत्, तदा तद्वासस्थानं प्राचीनर्षीणां तपोभूमौ परिणतमभूत् । संसारस्य प्रबलानि उद्वेलतरङ्गाणि स्रोतांसि निम्न एव प्रवहन्ति ; राजपथस्य कोलाहलस्योर्ध्वे हिमालयस्य नैःशब्द्यं विराजते ! यदा य एव तत्समीपं गच्छति, स एव पश्यति—माष्टारमहाशयो ज्ञानभक्त्योरालोचनायामेव निमग्नः ! भक्तसाधुसङ्गेषु तस्य असीम आनन्द ! अविरामं भगवदालपने दीर्घकालयापनं भक्तैः सहाधिकाधिक-मिलनाग्रहञ्च अदृष्ट्वैव कोऽपि तमानन्दम् उपलब्धुं न शक्नुयात् । तेन मधुरेणालपनेन प्रलुब्धा अगणिता जना नित्यमेव तस्मिन् अध्यात्मतीर्थे अवगाहितुं समागच्छन् । मन्ये तत्रोपस्थितास्ते अपश्यन्—कस्यचित् सद्ग्रन्थस्य पाठश्चलत्येव, माष्टारमहाशयश्च अन्तरान्तरा स्वमन्तव्यमुद्घाटच जटिलांशान् सरलान् विदधाति स्म ; अथवा रामकृष्णस्य जीवनं वाणीञ्चाधिकृत्य निरर्गलममृतधाराः प्रवाहयति स्म ; बाईबेल-पुराणोपनिषदादिभ्यश्च वचांस्युद्धृत्य यीशुचैतन्य-श्रीकृष्णप्रभृतीनां जीवनानामनुरूपघटनानि विवृत्य सकलान् मन्त्रमुग्धवत् उपावेशयति स्म । केनचनापि अवान्तरविषयस्य उल्लेख कृते स कौशलपूर्वकमालोचनाया धारां भगवन्मुखीं विदधाति स्म । दक्षिणेश्वरे एकदा माष्टारमहाशयं संसारत्यागचिन्तायां निमग्नं दृष्ट्वा श्रीरामकृष्णोऽवादीत्, "यावन्ति दिनानि त्वमत्र नागच्छस्तावन्ति दिनानि त्वम् विस्मृतात्मा आसीः । अधुना त्वमात्मानं ज्ञातुं शक्ष्यसि । ये नाम भगवतो वाणीं प्रचारयिष्यन्ति तेभ्योऽसौ स्तोकं बन्धनं दत्त्वा संसारे स्थापयति ; अन्यथा के नाम तत्कथां कथयति ?

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अतो माता त्वां संसारे स्थापितवती।" श्रीश्रीजगदम्बा-महिमप्रचारार्थं श्रीश्रीरामकृष्णो यानेव प्राप्ताधिकारान् अमन्यत, माष्टारमहाशयस्तेषामेवान्यतमः।

श्रीरामकृष्णस्य त्यागिनः सन्तानान् प्रति माष्टार-महाशयस्य प्रीतेः कश्चित् परिचयः प्रागेव प्रदत्तः। एतेषां केषाञ्चन प्रतिकृतीः स्वगृहे संस्थाप्य प्रातः सन्ध्यायाञ्च ताः अपूजयत्। स्वामिब्रह्मानन्दस्य अन्तिमरोगकालेऽसौ तच्छय्यापार्श्वे दीर्घकालमुपविश्यास्त, तद्देहत्यागात् परमपि निजशय्यायां पतित्वा अश्रूणि विसृष्टवान्।

१८९०-खृष्टाब्दे कालीकृष्ण (स्वामिविरजानन्द)-प्रभृतयो युवानो रिपन्-महाविद्यालये तस्यान्तेवासिरूपेण पठितवन्तः; परन्तु ते तस्य धर्मभावेन सह परिचिता नासन्। ते रामबाबु-महोदयस्य काँकुड़गाछिनामानमावासं गन्तुमारभन्त। एतेषां सर्वेषां मध्ये त्यागभाव आसीत्। रामबाबु-महोदयस्य च तदानीन्तनी धारणा अन्यविधासीत्। सोऽवदत्, "नरेन्द्रनाथः श्रीरामकृष्णं नैवामानयत्। केवलं तर्कितं तेन।" "श्रीरामकृष्ण एव भगवानिति विश्वासो यदि स्यात्, तर्हि तत्कथैव शास्त्रम्; अपरैः शास्त्रैः किम्? श्रीरामकृष्णस्योपरि ऐकान्तिको निर्भर एव तन्त्रम्। अन्येन साधनेन भजनेन च प्रयोजनं नास्ति। संसारमध्य एवावस्थाय केनचित् श्रीरामकृष्णस्मरणे कृते स कृपां करिष्यति" इत्यादीनि। अतस्तैः रामबाबुतो बराहनगरमठस्य मठवासिनां साधूनाञ्च कापि वार्ता नालभ्यत। परन्तु तेषामुत्सुकनयनानि द्रागेव एतद् आविष्कृतवन्ति यत्—तेषां गम्भीरप्रकृतिः वेषभूषयोश्च पारिपाट्यहीनो माष्टारमहाशयो महाविद्यालयस्य कर्मणोऽवसरे प्राप्ते वृथा कालहरणमकृत्वा गृहच्छदिषमारुह्य आत्मनो लिखनपत्रं ('कथामृतम्') निविष्टमनसा पठति। तस्य अन्येऽपि व्यवहाराः स्तोकेनासाधारणा उपलब्धाः। अतस्ते तेन सह घनिष्ठतया मिलिताः सन्तस्तस्य यथार्थ-परिचयमगृह्णन्। तदनन्तरं ते आमन्त्रिताः सन्तस्तद्गृहमपि गताः। माष्टारमहाशयो गृहप्रकोष्ठे कटमेकमास्तीर्य तानासयत्, स्वयमपि पार्श्वे उपाविशत्। छात्राध्यापकयोर्मध्ये सामान्यतो यः कृत्रिम-सौजन्यादिव्यवहारो दृश्यते, अत्र तस्य कियपि न दृष्टम्। एवं यूनां हृदयानि विजित्य माष्टारो बभाषे, "दृश्यताम्, श्रीरामकृष्ण आसीत् कामिनीकाञ्चनत्यागी; तं विज्ञातुं, तद्यथार्थवाणीं च लब्धुम्, तस्य ये नाम शिष्याः कामिनीकाञ्चनत्यागिनस्तैः सङ्गः करणीयः। गृहस्थानामन्ये गुणा नाम सहस्रशः सन्तु, किन्तु ते श्रीरामकृष्णभावं याथार्थ्येन प्रकाशयितुं न क्षमाः। अस्योपदेशहेतोस्ते युवानो वराहनगरं गन्तुमारेभिरे, प्राप्तकालञ्च सन्न्यासग्रहणपूर्वकं मठमिशनयोर्मुखमण्डलस्य औज्ज्वल्यं व्यदधुः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

माष्टारमहाशयो गृहस्थः सन्नपि ईदृङ्मुक्तकण्ठतया त्यागमहिमानम-घोषयत् यत् तस्यानुप्रेरणया अनेके युवानः सन्न्यासं गृहीतवन्तः। कञ्चन भक्तमसौ अवदत्, "साधुसङ्गकरणेन शास्त्रार्थो बुध्यते।" अन्यमपि उक्तवान् ; "भवतु नाम साधुसङ्गः, नोचेत् निःसङ्गः। विषयिणां सङ्गे कृत एव पतनम्।" पुनस्तेनोक्तम्—"यदा साधुसङ्गो न लभ्येत, तदा साधूनां प्रतिकृतीश्चित्राणि वा गृहे संस्थाप्य ध्यानं कुर्यात्।" इमान् सर्वानुपदेशान् प्रदाय स एतदप्युक्तवान्—श्रीरामकृष्णस्य उपदेशावल्याः मर्मकथासीत् त्याग एव। गृहस्थेभ्योऽपि स यमुपदेशं प्रादात्, तस्मिन्नपि त्यागबीजं गूढं तिष्ठति स्म। विशेषतोऽनुकूलक्षेत्रे जन्मनीह तत् अङ्कुरितं सत् पत्रपुष्पफलैः सुशोभितमभवत्। अपरस्मिन् स्थले भाविनि जनने ईदृशी परिणतिरवश्यम्भाविनी। एकदासौ कञ्चनभक्तमाह, "कथं न दृश्यते—स एव भगवान् प्रतिदिनं सूर्याचन्द्रमसौ आलोकोत्तापप्रदानार्थं प्रेरयति—वयञ्च तद्दर्शनेन निर्वाचः। लोकानां चैतन्यविधानार्थमसौ साधून् प्रेरयति। त एव श्रेष्ठमानवाः। साधव एव तमीश्वरमधिकतया धर्तुं क्षमाः। ऋजुपथेनारूढाः त एव भगवन्तं लब्धुमर्हन्ति।" भक्त आपत्तिमज्ञापयत्, "एते ये सर्वे साधव आगच्छन्ति, किमेते सर्व्वोच्चमादर्शमवलम्ब्य आसते?" माष्टारमहाशय ईषदपि सन्देहमप्रकाशयन्नाह, "एतेषां दर्शनेनोद्दीपनं भवति। कीदृक् महान् त्यागः! सर्वमेव त्यक्त्वा तिष्ठन्ति! चैतन्यदेवो गर्दभस्य पृष्ठे काषायवस्त्रं दृष्ट्वा साष्टाङ्गं प्रणतोऽभूत्। संसारिणः कलङ्कसागरे मग्नाः सन्तोऽपि पुनः कलंकमर्जयन्ति।....साधवश्चेदन्यायं कुर्युस्तथापि तं परिहर्तुं शक्ताः। सतां सङ्गतेर्यावान् भावः प्राप्येत तावानेव लाभः।" कस्मिंश्चित् साधौ समागते स तत्पार्श्वे उपविश्य सदालापेन दीर्घकालं निनाय। एतदपि उक्तवान्, "साधुरागतः ; भगवानेव साधुवेषं वसान आगतः। अस्य कृते मे स्नानाहारौ परिहर्तव्यौ। तत् कर्तुं चेन्न शक्नुयां तर्हि अधिकं किमपि आश्चर्यं न स्यात्।" साधूनसौ कदापि आहारवर्जं गमनाय नानुमेने· नूनमेव किञ्चित् तानभोजयत् ; एवञ्च तेनोक्तम्, "मया भगवते एव भोगो निवेद्यते—पूजैव मया क्रियते, सैव च दृश्यते।" तत्त्वतस्तत्संगं लब्ध्वा तन्मुखतश्च साधूच्चादर्शस्य सोच्छ्वासां प्रशंसामाकर्ण्य साधवोऽपि आत्मादर्शविषये समधिकतया अवहिता अभवन् स्वजीवने च तमेवादर्शं साकारीकर्तुम् समधिकतरं यत्नवन्तो भवन्ति स्म।

याः काश्चित् घटना आश्रित्य जना भगवत्-स्मरण-मननतत्परा भवेयुः, यांश्च कांश्चिद् विषयानधिकृत्यासौ ज्ञानवैराग्ये ईप्सन्ति, तेषां संस्पर्शेनागन्तुं स स्वयमेव यथा व्याकुलत्वं प्राप, तथा परिचितेभ्यः सर्वेभ्योऽपि तेष्वेव विषये उत्साहं प्रादात्। उत्सवादिषु गमनं यदा तस्य स्वतएव सम्भावितं

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नासीत्, तदानुरक्तान् भक्तांस्तत्र प्रेरयन् तन्मुखत एव सविशेषं वर्णनं सोत्साहं श्रुतवान्। माष्टारमहाशयो भक्तमेकमेकदा अभणत्, "दक्षिणेश्वरः अन्तरान्तरा गन्तव्यः। श्वो दशहरानुष्ठानम्—तत्र पूजा द्रष्टव्या। हनुमान् श्रीरामचन्द्रं पप्रच्छ, 'कथं सर्वदा भवत्स्मरणं तिष्ठत्येव?' रामचन्द्र उवाच, 'उत्सवदर्शन एव मत्कथा स्मृतावागमिष्यति।' अतो विभिन्नपर्वोत्सवेषु अवश्यमेव गन्तव्यम्।" माष्टारमहाशयस्य प्रसादे अमिता भक्तिरासीत्। तद्धारणात् प्राक् सभक्ति हस्तेन ग्रहणानन्तरं शिरोदेशेनास्पर्शयत्। प्रसादसंबद्धाया धारणायास्तस्य किञ्चिदभिनवत्वमासीत्। स वदति स्म, "गुरुजनेन यद्दीयते तदवश्यमेव ग्राह्यम्। प्रसन्नो भूत्वासौ यद्ददाति स एव प्रसादः।" तस्यासीच्च प्रबलदीनता। कस्यचन साधोः प्रणाममसौ ग्रहीतुं नाशकत्—सत्यपि तस्य यावतापि वयःकानिष्ठ्ये। एकदा कस्मिंश्चिद् वैष्णवे तं प्रणम्य कक्षभूमावुपवेष्टुं प्रक्रामत्येवासौ वक्तुं प्रारभत, "एतद् भवता न कर्तव्यम्। 'तृणादपि सुनीचेन'—मा तावत् भोः! श्रीरामकृष्णोऽवादीत्, 'अस्मिन्नेव देहे भगवानास्ते। अतः कश्चन आसने उपवेशनीयः।' एतादृशी भक्तिर्भवता प्रदर्श्यते, अतो मे कथावश्यमेव श्रोतव्या।"

स्वयं भगवत्कृपाधन्यः श्रीरामकृष्ण-स्वामि-विवेकानन्द-केशवचन्द्र-प्रभृतीनां च घनिष्ठसान्निध्येन तत्प्रीतिलाभेन च चरितार्थोऽपि माष्टार-महाशयोऽपरेषां सेवार्थं सदैवोन्मुख आस्त आत्मानं च सर्वेषां सेवकमन्यत। तेन कस्यापि गुरुत्वं नाङ्गीकृतम्, कस्मा अपि मन्त्रदीक्षा न प्रदत्ता। तत्प्रभावेण ये दीर्घकालं यावत् तन्निवासं गतवन्तस्तान् प्रत्यप्यसौ उपदेष्टृवन्नाचरत्; आत्ममतमपि किंचित् प्रकाशयितुमप्रयासः सन् विवक्षितं विषयं श्रीरामकृष्णोक्त्या विस्पष्टं कृतवान्। स कमपि न शास्ति स्म—तन्मुखे दैवं ज्योतिरासीत्, जिह्वायामासीदविमिश्रा आशीः। स भक्तसाहचर्येण आनन्दमवाप उक्तवांश्च, "भक्तैः सार्धमालापमालोचनञ्च ऋते जीवितं मे दुर्विषहमभविष्य"दिति। किन्तु वृथा स्नेहप्रकाशेनासौ शक्तिक्षयं न व्यदधात् आत्मानुरागिणाञ्च विहस्तताम् नानीतवान्। सर्वास्ववस्थास्वसौ शान्तोऽतिष्ठत्; सुखदुखे तमकस्मादेव ग्रसितुं नाशक्नुताम्। तज्जीवितमासीत् कृत्स्नश आड़म्बरविहीनम्। तस्यार्थिकावस्थायाममन्दायामपि माष्टारमहाशय आहारविहारेषु परिधेयपरिच्छदेषु च अतिसाधारणभावमालम्ब्याचलत्। तन्मतेन श्रीरामकृष्णोपदेश एवमासीत्—"अनाड़म्बमेव जीवनं यापनीयमि"ति। जीवननिर्वाहार्थं किञ्चिदुपयुक्तभोजनं लज्जानिवारणार्थञ्च साधारणपरिधेयञ्च तस्यास्ताम्। फलतस्तस्य अन्तर्निगूढा भगवत्भक्तिरुज्ज्वलतरा सती भक्तानां पुरतः प्राकाश्यं गताभवत्। श्रीरामकृष्णस्तमेकदा बभाषे, "मनसो त्याग एव तन्त्रम्; अन्तः-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सन्न्यास एव सन्न्यासः।" माष्टार-महाशयस्तस्यामेव साधनायां लब्धसिद्धिर्जातः।

'श्रीश्रीरामकृष्णकथामृत'-प्रणयनमेव माष्टारमहाशय-जीवनस्य महनीयतमा कीर्तिः। एतदधिकृत्यासौ अवदत्, "आ शैशवान्मे दिनलिपिलिखनाभ्यास आसीत्। यदाहं कुत्रापि उत्तमं भाषणमीश्वरीयं प्रसङ्गं वा श्रुतवान्, तदैव तत् सर्वं लिखितवान्। तदभ्यासहेतोः श्रीरामकृष्णेन सह यस्मिन्नहनि यैव कथाभवद् वार-तिथि-नक्षत्र-दिनाङ्कैः सह तां सर्वांशतोऽलिखम्।" तेन एतदपि उक्तमासीत्, "ससारकर्मव्यापृतिहेतोर्यदृच्छमहं तत्समीपं गन्तुं नाशक्नवम्। अतो दक्षिणेश्वरेऽहं यदवाप्नवं तस्योपरि संसारभारः पतित्वा तद् विनष्टिं प्रापयेदित्याशङ्क्याहं श्रीरामकृष्णभावराशीन् लिखित्वा पुनस्तत्र गमनात् पूर्व-पर्यन्तं सर्वं तदपठम् मनसा च चिन्तितवान्। एवमात्ममङ्गलार्थमादावेव लिखितुमारभे यथा तस्योपदेशान् अधिकतरसौष्ठवेन जीवने परिणमयितुं शक्नुयाम्।" एतद्दिनलिप्यवलम्बनाल्लिखिते 'Gospel of Sri Ramakrishna' (श्रीरामकृष्ण-उपदेश इति वङ्गभाषायाम्) इति १८९७-खृष्टाब्दे क्षुद्रपुस्तिकाकारेण प्रकाशिते स्वामि-विवेकानन्दप्रमुखाः सर्वे बहुलतया अस्तुवन्, अधिकतरोपदेश-प्रकाशार्थं च माष्टारमहाशयं प्रोत्साहितवन्तः। १९०७-खृष्टाब्दे ग्रन्थोऽयं बृहत्तराकारेण पुनः प्रकाशितोऽभवत्। रामचन्द्रदत्त-महोदयस्यानुरोधाच्च माष्टारमहाशयेन वङ्गभाषया 'कथामृत'-रचना समारब्धा; १९०२-खृष्टाब्दे स्वामि-त्रिगुणातीतानन्देनास्य प्रथमभागः प्राकाश्यं नीतः। क्रमेण १९०४-खृष्टाब्दे ग्रन्थस्यास्य द्वितीयो भागः, १९०८-खृष्टाब्दे तृतीयो भागः, १९१०-खृष्टाब्दे च चतुर्थभागः मुद्रिता अभवन्। १९३२-खृष्टाब्दे तस्य देहत्यागात् कतिमास्येभ्यः परं प्रकाश्यमानस्य पञ्चमभागस्य मुद्रणमंशत एव दृष्टम्।

श्रीरामकृष्णदर्शनलाभादनन्तरं पञ्चाशद्वत्सरान् सर्वाभीष्टप्रदं श्रीगुरोर्महिमानं वाणीञ्च प्रचार्य माष्टारमहाशयः फलहारिण्याः कालिकायाः पूजायाः परेद्यवि १९३२-खृष्टाब्दस्य ४-जुन-दिनाङ्के (१३३९-वङ्गाब्दस्य २०-ज्यैष्ठ-वासरे) प्रातः सार्धषड्घटिकायां श्रीगुरुपादपद्मयोर्मिलितोऽभवत्। पूर्वरात्रौ नवघटिकायां 'कथामृत'-पञ्चमभागस्य प्राथमिकमुद्रित-पत्राणि (Proof) पश्यत एव तस्य हस्तस्नायुशूलस्य असह्या वेदना समारब्धा। प्रातश्च "मातः, गुरुदेव, मां क्रोड़े नयतमिति वादं वादं स चिरनिद्रार्थं चक्षुर्द्वयं निमीलितवान्। श्रीगुरुवाणीप्रचारार्थम् उत्सृष्टप्राणो माष्टारमहाशयः शेषमुहूर्तपर्यन्तं तस्मिन्नेव परमपावने कर्मणि निरतः सन् आत्मव्रतमुद्यापितवान्।*

---

*स्वामि-गम्भीरानन्दकृत-'श्रीरामकृष्णभक्तमालिका'मवलम्ब्य लिखितोऽयं निबन्धः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ॐ नमो भगवते श्रीरामकृष्णाय

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

समाधिस्थः श्रीरामकृष्णः—ब्राह्मभक्तपरिवृतो हृदयराम-धृतश्च पृः ३१

दक्षिणेश्वर-देवतायतनम् पृः १

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.



दक्षिणेश्वर-मन्दिरस्था श्रीश्रीभवतारिणी पृः २

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दक्षिणेश्वरस्थितं श्रीरामकृष्ण-वासगृहम् पृः १

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीश्रीमाता सारदादेवी पृः ६६

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नरेन्द्रनाथः (परतः स्वामि-विवेकानन्दः) पृः १०

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.



राखालः (परतः स्वामि-ब्रह्मानन्दः) पृः २३

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.



बाबुरामः (परतः स्वामि-प्रेमानन्दः) पृः ७३

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लाटुः (परतः स्वामि-अद्भुतानन्दः) पृः ६५

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.



बलराम-वसुः पृः २२

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मथुर-महोदयः (मथुरानाथ-विश्वासः) पृः २७

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सुरेन्द्रनाथ-मित्रः पृः ११३

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

केशवचन्द्र-सेनः पृः ४

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.



विजयकृष्ण-गोस्वामी पृः १२२

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.



विद्यासागरः (ईश्वरचन्द्र-वन्द्योपाध्यायः) पृः ३७

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.



श्रीमः (महेन्द्रनाथ-गुप्तः) पृः १

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीश्रीरामकृष्णकथामृतम्



श्रीम-कृतं प्रथमं श्रीरामकृष्णदर्शनम्

२६ फेब्रुयारी, १८८२ खृः

अथ १८८२-मित-खृष्टाब्दीय-फेब्रुयारी-मासः। कालश्च वसन्तः। स्थानं हि गंगातीरे दक्षिणेश्वरकालिकायतनस्थितं भवतारिणीमन्दिरम्। व्यतीताश्च श्रीरामकृष्णस्य जन्ममहोत्सवात् कति दिवसाः। फेब्रुयारीमासस्य त्रयोविंशतितमदिवसे श्रीमता केशवचन्द्रसेनमहोदयेन तथा श्रीमता जोसेफ्-कुक्-महोदयेन सार्धं जलयानेन भ्रमति स्म श्रीरामकृष्णः, तद्व्यापारादेव कियद्दिनानन्तरमिति यावत्। अथासन्नायां सन्ध्यायां श्रीरामकृष्णस्य गृहे समागतो माष्टारः। अयमेव खलु श्रीरामकृष्णमाष्टारयोः प्रथमः साक्षात्कारः।

समायातेन माष्टारेण श्रीरामकृष्णकथामृतं पिवन्तस्तद्गृहपरिपूर्णतयाऽवस्थिता निस्तब्धाः खलु जनाः समवलोकिताः। स्वकीयां क्षुद्रां खट्वामधिरूढेन पूर्वास्येन श्रीरामकृष्णेन स्मिताननेन कथ्यमाना हरिकथाः शृण्वन्ति स्म कक्षभूमावुपविष्टा भक्ता इति।

विस्मयविमूढ़चेतसा सर्वमेतदवलोकयतो दण्डायमानस्य माष्टारस्य चेतसि तावदिदमेव प्रतिभातमभूद् यत्—सर्वतीर्थसमागमपवित्रीकृते तस्मिन् तीर्थवरे साक्षादेव शुकदेवः कथयति भागवतीं कथाम्; श्रीमच्चैतन्यदेवो वा रामानन्द-स्वरूपादिभिः भक्तप्रवरैः साकं पुरीधाम्नि समुपविष्टः श्रीभगवतो नामानि सङ्कीर्तयतीति। ब्रूते स्म तदा श्रीरामकृष्णः—"सकृदेव हरिनामसमुच्चारणेन रामनामकीर्तनेन वा यदि स्याद् रोमाञ्चितं कलेवरं साश्रुपातं, तदैव ज्ञातव्यं यत् सन्ध्यादिकं कर्म करणीयत्वेन तदानीं नावतिष्ठते। परिनिष्पन्नस्तावत्तथात्वे कर्मत्यागाधिकारः, ततः खलु स्वयमेव निवर्तते कर्म। एवम्भूतायामवस्थायां सकृदेव हरिनामोच्चारणं रामनामकीर्तनं वा किं बहुना केवलं प्रणवजपनमेव वा विधेयम्।" पुनरप्याह सः—"गायत्र्यां लीयते सन्ध्या, गायत्री च प्रणवे लीयते।"

सिंधुसहचरः माष्टारो वराहनगरे उद्यानादुद्यानान्तरं परिभ्रमन् अत्रागतः। अद्य खलु रविवारः। १८८२-मित-खृष्टाब्दीय-फेब्रुयारीमासस्य षड्विंशो दिवसः (फाल्गुनमासस्य पञ्चदशदिवसः)—कर्मावकाशाद् भ्रमितुमागतः सः;

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इतःपूर्वं श्रीयुक्तप्रसन्नवन्द्योपाध्यायस्योद्याने परिभ्रमति स्म। तदा सिधुनोक्तम्—"अस्ति भागीरथीतीरे मनोहरमेकमुद्यानम्। अपि तद्दर्शनाय गन्तुमिच्छति भवान्? निवसति च तत्र कश्चित् परमहंसः।"

प्रधानगोपुरेणैव तदुद्यानं प्रविश्य ससिधुर्माष्टारोऽन्यतो वर्जयित्वा श्रीरामकृष्णगृहमुपागतः। प्रवेशमात्रमेव परिदृष्टाखिलव्यापारो विस्मयान्वितो माष्टारो मनस्यचिन्तयत्—अहो, कीदृशं मनोरममेतत् स्थानम्! निरतिशयसुन्दरश्च तत्रभवानसौ महात्मा! कीदृशी वा मनोहारिणी कथ्यमानैषा भारती! न पुनरस्मात् पदान्तरमपि गन्तुं काङ्क्षति मे चेतः। कियदनन्तरं पुनरपि स मनसि चिन्तितवान्—प्रथमतो हि द्रष्टव्यं नाम कुत्रागतोऽस्मीति। ततः पश्चादत्रागम्य समुपविशामि च।

अथ सिधुना सह गृहान्निर्गमनकाले सान्ध्यारात्रिकमधुरध्वनिः आरब्धोऽभूत्। यगपदेव वादितानि कांस्य-घण्टा-मृदङ्ग-करतालिकामिश्राणि वाद्यानि। उद्यानदक्षिणप्रान्ताच्च पुनर्बृहद्वंश्यादिवाद्यसम्भारध्वनिः समागच्छन् भागीरथीवक्षसि भ्रमन्निव सुदूरदेशमुपेत्य क्वचिद् विलीयते स्म। मृदुमन्दः कुसुमसौरभवाही वसन्तानिलः। तत्क्षणमेवाऽऽविष्कृता कौमुदी। सर्वत्र देवतारात्रिकमिवायोजनं भवति! श्रीराधाकान्तमन्दिरे तथा द्वादशशिवमन्दिरेषु श्रीमद्भवतारिणीमन्दिरे च समालोकितारात्रिककर्मणा माष्टारेण परा प्रीतिरवाप्ता। प्रोक्तं च सिधुना—"रासमणिमहोदयाया देवतायतनमिदम्। अत्र नित्यसेवा प्रचलति। अनेके अतिथयो भिक्षुकाश्च आगच्छन्ति।"

एवमालपन्तौ तौ भवतारिणीमन्दिरात् सुविशालेन प्रस्तरावलीढ़ेन प्राङ्गणेन पादचारणक्रमेण पुनः श्रीरामकृष्णगृहद्वारमागत्य बद्धद्वारमेव तद्गृहं दृष्टवन्तौ।

तदानीमेव हि धूनकेन सुरभीकृतं गृहम्। इंराजीभाषायामेवाधीती माष्टारः सहसा गृहं प्रवेष्टुं नाशकत्। द्वारि वृन्दानामिका दासी दण्डायमानाऽऽसीत्। तामपृच्छत् सः—"अयि, अपि साम्प्रतं गृहाभ्यन्तरे समवतिष्ठते तत्रभवान् साधुर्नामि?"

वृन्दा—अथ किम्। अस्मिन्नेव गृहे वर्तते स महात्मा।

माष्टारः—कियन्तं कालं यावदवतिष्ठतेऽसौ?

वृन्दा—बहुदिवसान् यावत् इत्यनुमीयते।

माष्टारः—अये, किमनेन प्रभूतपुस्तकानि पठ्यन्ते?

वृन्दा—अहो वत तात! किं पुनः पुस्तकादिभिः? सर्वं खल्वस्य जिह्वाग्रे विद्यते।

सद्य एव माष्टारेण अध्ययनादिकं परिसाधितम्; श्रीरामकृष्णः पुस्तकादिकं न पठतीति श्रुत्वा समधिकतरं विस्मितोऽभूत्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

माष्टारः—अये, किमधुना सन्ध्याह्निकमनुष्ठास्यति तावदसौ देवः ? किं साम्प्रतं वयं गृहस्यास्य अभ्यन्तरे प्रवेष्टुमर्हामः ? किं त्वया तत्रभवते निवेद्येत अस्मदागमनवार्ता ?

वृन्दा—स्वच्छन्दं भोः गम्यताम् । गृहाभ्यन्तरमासाद्य तावदुपविश्यताम् ।

ततो गृहं प्रविश्य अनन्यसहायं निर्जने गृहे क्षुद्रां खट्वामधिरूढं श्रीरामकृष्णं तौ दृष्टवन्तौ । धूनकसुरभितं तद्गृहं बद्धाखिलद्वारमासीत् । प्रविष्टो माष्टारः खलु बद्धाञ्जलिः श्रीरामकृष्णं प्राणमत् । ततः श्रीरामकृष्णेन समुपवेशनार्थमुपदिष्टौ कक्षभूम्यां कृतासनपरिग्रहौ तौ पृष्टौ—"कुत्र वा निवासः ? किं वा कुरुथः ? वराहनगरं किमर्थमागता"वित्यादिकम् । सर्वं प्रत्युक्तं खलु माष्टारेण । परन्तु अन्तरान्तरा श्रीरामकृष्णस्य अन्यमनस्कभावस्तेन परिलक्षितः । पश्चात् श्रुतम्—भावो ह्ययम् । तथा हि मत्स्यबन्धनकाम्यया समासीनः कश्चिज्जन इव संविभाति । तत्र आगतैश्च मत्स्यैरम्भसामभ्यन्तरे प्रलोभनाहार्ये भक्ष्यमाणे सूत्रबद्धं जलोपरिस्थितं सूचकं यदा स्पन्दते, तदा यथा प्रणिहितमना दत्तावधानो मत्स्यबन्धनार्थी तत्रैव समुपबद्धदृष्टिरपरैः सह कामपि वाचमविसृजन् समुत्सुकचेताश्च यादृशं भावमाधत्ते तथैवायमपि भावः परिलक्ष्यते किल । पश्चाच्छ्रुतं दृष्टञ्च यत् सायं परं तस्येत्थं भावान्तरं भवति, कदाचिच्च नितरां बाह्यशून्यो भवति ।

माष्टारः—अधुना भवता सन्ध्यावन्दना कर्तव्या ; तद् आवां गच्छावः ।

श्रीरामकृष्णः (भावस्थ एव)—न हि—सन्ध्या—न खलु साऽऽत्यन्तिकी ।

ततो भूयः किंचित्कथोपकथनात् परं माष्टारः श्रीरामकृष्णं प्रणम्य आपृच्छते स्म । श्रीरामकृष्णः प्राह—"पुनरप्यागम्यताम् ।"

अथ प्रत्यावर्तमानेन माष्टारेण चिन्तितम्—कोऽयं नु सौम्यः ?—यस्य सविधे पुनरागमनाय इच्छा जायते—किमनधीतग्रन्थराशिरपि जनो महान् भवितुमर्हति? किमाश्चर्यमहो, पुनरागमनाय बलवदिच्छा मे सञ्जायते । अनेनाप्युक्तम्—पुनरागम्यतामिति । भवतु, श्वो वां परश्वो वा प्रातरागमिष्यामीति ।

२७ फेब्रुयारी, १८८२ खृः

प्रातरष्टघटिकावादनवेलायां संवृत्तो द्वितीयः साक्षात्कारः । क्षौरार्थं गच्छति तदा श्रीरामकृष्णः । तदानीमपि विद्यमानाल्पशीततया लोमविनिर्मितः प्रावारकः तस्य वपुषि संस्थितः । प्रावारकस्य प्रान्तभागास्तु क्षौमरक्तवाससा सन्नद्धाः । समागतं माष्टारमवेक्ष्य प्रावोचत्—"अये, त्वमागतोऽसि ? भवतु, इत आस्यताम् ।"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गृहस्य दक्षिणपूर्वभागीयेऽलिन्दे हि एष आलापो भवति स्म। समुपस्थितश्च क्षौरकारः। तस्मिन्नेवालिन्दे क्षौरकर्म सम्पादयितुमुपविष्टस्तत्रभवान् श्रीरामकृष्णः, अन्तरान्तरा माष्टारेण सार्धमालापरतोऽभूत्। गात्रे च तस्य तादृशः प्रावारकः, पदयुगले च चर्मपादुके, सहास्यवदनोऽपि सः। केवलमेव संलापकाले किंचित्स्खलद्वागसौ।

श्रीरामकृष्णः (माष्टारं प्रति)–अयि, भोः, कुत्र ते निवासः?

माष्टारः–कलिकातायाम्, देव।

श्रीरामकृष्णः–इह क्वागतोऽसि?

माष्टारः–अत्र वराहनगरे ज्येष्ठभगिनीगृहं समायातः; ईशानकविराजस्य वाटीम्।

श्रीरामकृष्णः–भोः, केशवः साम्प्रतं कथमास्ते? बलवदस्वास्थ्यं तस्यासीत्।

माष्टारः–श्रुतं मयापि, साम्प्रतं स्वस्थ इति तर्कयामि।

श्रीरामकृष्णः–मया पुनः केशवस्य कृते जनन्यै कालिकायै शर्करामिश्रं नारिकेलफलं प्रतिश्रुतम्। रजन्याः शेषयामे निद्राया व्युत्थितोऽहम्, देव्यम्बामुपारुदन्नुक्तवान्–'मातः, केशवं निरामयं कुरु। अवर्तमाने केशवे कलिकातां गत्वा केन सह आलपिष्यामि?' तस्मात् प्रतिश्रुतं मया सशर्करनारिकेलफलम्।

"अयि भोः, अपि कुक्-नामा कश्चित् साहेब आगतः, स नु भाषणानि ददाति? केशवो मां जलयानं नीतवान्; कुक् अपि तत्रासीत्।"

माष्टारः–अथ किम्, एवं मया श्रुतमेव, किन्तु तस्य भाषणं न मयाऽऽकर्णितम्। नाहं जानामि च तस्य विषयं सविशेषम्।

श्रीरामकृष्णः–समागमत् प्रतापस्य भ्राता। कति दिवसानत्र स स्थितः। न विद्यते तस्य कोऽपि आजीवः। तेनोच्यते, अत्रैवाहं स्थास्यामीति। पुत्रकलत्रादीनसौ श्वशुरालये विसृष्टवान् इत्यपि श्रुतवानहम्। बहूनि च तस्यापत्यानि। मया च स एवं तिरस्कृतः–'पश्य रे, सन्तानास्ते जाताः। किमपरपल्लीवासिनः समागत्य तान् भोजयिष्यन्ति, पालयिष्यन्ति च? अहो, स्त्रीपुत्रादयो ह्यन्येन प्रतिपाल्यन्ते, श्वशुरालये ते स्थापिता इति कथं न लज्जसे?' एवमेव बहुधा तिरस्कृत्य यत्किञ्चित् कृत्यजातं चेष्टया संग्राह्यमित्यप्युक्तः स खल्वस्माभिः। एतावदुक्तः स स्थानादस्माद् गतः।

श्रीरामकृष्णः (माष्टारं प्रति)–अपि ते विवाहः संवृत्तः?

माष्टारः–अथ किम्, देव।

श्रीरामकृष्णः (आतङ्कितः सन्)–अहो रे रामलाल! कृतोद्वाहः खल्वयम्!

कृतमहापराध इव विस्मितो माष्टारस्तावद् अवनतशिराः तूष्णीमेवास्त। अचिन्तयच्च सः–किमेतावदेव दोषावहो दारपरिग्रहो नामेति।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ततः पुनरपि पृष्टवान् श्रीरामकृष्णः–"किं सन्तानस्ते सञ्जातः?"

तदानीं द्रुतं कम्पते स्म माष्टारस्य वक्षः। सभयमब्रवीत् सः–"अथ किम्, महात्मन्, जातसन्तानोऽस्मि।" अनन्तरं पुनरपि साक्षेपमाह श्रीरामकृष्णः–"अहो वत अपत्यमपि जातम्!" एवं श्रीरामकृष्णेन तिरस्कृतो माष्टारः स्तब्धः सन्नवातिष्ठत।

तस्याहङ्कारः चूर्णतामगात्। कियत्क्षणात् परं श्रीरामकृष्णः भूयोऽपि कृपादृष्टिं निक्षिप्य सस्नेहमभाषत–"पश्य तावद् भोः, शुभानि ते लक्षणानि; भालेक्षणाद्यवलोकनेन सर्वमवगन्तुं शक्यते मया। भवतु, कीदृशी ते भार्या? विद्याशक्तिराहोस्विद् अविद्याशक्तिः?"

माष्टारः–भद्रा सा देव, परन्तु अज्ञाना।

श्रीरामकृष्णः (विरक्तो भूत्वा)–त्वं पुनर्ज्ञानवानसि?

किं तावद् ज्ञानम्, किं वाऽज्ञानमिति कालेनैतावतापि तेन न विदितम्। एवमेव परिज्ञातमनेन यत् पुस्तकादीनामध्ययनेन विद्याचर्चया च ज्ञानं भवतीति। कालान्तरे दूरीभूतोऽयं तस्य भ्रमः। एतत्तेन श्रुतं तदा यत्–ईश्वरज्ञानं हि ज्ञानम्, ईश्वराविज्ञानमेव अज्ञानमिति। यावत् श्रीरामकृष्णो भणति "किं नु ज्ञानी त्वमसि", तावन्माष्टारस्याहंकृतौ विशेषेण आघातः संवृत्तो ननु।

श्रीरामकृष्णः–भवतु तावत्, साकारे वा निराकारे वा विश्वासस्ते?

माष्टारः (विस्मितः सन् स्वगतं)–किं साकारे विश्वासे सति निराकारे विश्वासः सम्भवति? ईश्वरः खलु निराकार इति विश्वासे विद्यमाने किं पुनरीश्वरः साकार इति विश्वासः उत्पद्यते? किं परस्परविरुद्धमवस्थाद्वयमपि सत्यं भवितुमर्हति? धवलं द्रव्यं दुग्धं किं कार्ष्ण्यमियात्?

माष्टारः–देव, निराकार एवायं मह्यं रोचते।

श्रीरामकृष्णः–साधु। एकस्मिन्नेव विश्वासाय अलम्। निराकारे विश्वासः, सोऽपि अभ्यर्थनीय एव। परम्, एष एव परमार्थः, सर्वमन्यन्मिथ्या इति मतिं मा कार्षीः। अपि तु निराकारो हि सत्यः साकारश्चापि सत्य इत्येवं तावदवधारय। यस्मिंस्ते तु विश्वासः, स एव अवलम्बनीयोऽस्तु।

द्वयमपि सत्यमिति वाणीं वारं वारमाकर्ण्य माष्टारो विस्मयविमूढः सन्नास्त। न ह्येवं वचोऽस्ति वै तस्य पुस्तकस्थविद्यायाम्।

एतावता त्रिरहङ्कारचूर्णता यद्यपि सञ्जाता तावतापि न सम्पूर्णतां गता, तथापि पुनरपि तर्कजालं प्रसारयितुमुपाक्रमत स माष्टारः।

माष्टारः–भो महात्मन्, स साकार इति विश्वासस्तावदस्तु, किन्तु मृन्मयप्रतिमा नासौ।

श्रीरामकृष्णः–कथं मृत्तिका तावद्भोः! चिन्मयी प्रतिमा।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चिन्मयी प्रतिमेति तात्पर्यमस्य अवगन्तुं माष्टारो न क्षमः। तदुक्तवान् सः—भवतु, ये नाम मृन्मयीं प्रतिमां पूजयन्ति, ते पुनरेवं बोधयितव्या यत्, न हि प्रतिमा तावदीश्वरः, पुनस्तु प्रतिमापुरत एव ईश्वरमुद्दिश्य पूजयत, नोचितं वै मृत्तिकापूजनमिति।

श्रीरामकृष्णः (विरक्तः सन्)—अहो, कलिकातामधिवसतां वत युष्माकं पुनरियमेव रीतिः—केवलं भाषणदानं तथा बोधनञ्चापरेषाम्। अरे, आत्मानं को बोधयति नास्ति तत्र निश्चयः। अपि रे, को नामासि त्वं बोधयिता? यस्य जगदिदं स एव बोधयिता नाम। तथा हि—तेनेदं जगत् सृष्टम्, सूर्याचन्द्रमसौ ऋतवो मानवा जीवा जन्तवश्चेति निखिलमिदं परिनिर्मितम्। एवं जीवानां जन्तूनाञ्च आहारसंस्थानं तथा पालनार्थाय पितरौ, मातापितृस्नेहराशिश्चेति सर्वमेतदपि तेनैव सृष्टम्। अतः खलु स एव बोधयिता। ननु एतावदुपायान् सृजन्नपि स पुनरस्मिन् कञ्चनोपायं नैव कुर्यात्? बोधनप्रयोजनमस्ति चेत् तर्हि स एव स्वयमावेदयति नाम, नूनमसौ अन्तर्यामी। तद् यदि मृत्तिकामयप्रतिमापूजने कश्चित् प्रमादो जायेत, तथापि तेन स एवाहूयते इति किं न वेत्ति स परमेश्वरः? तेनैव पूजनेन तुष्यति सः। अस्य कृते किमिति ते शिरोवेदना? यथा ते निजं ज्ञानमाविर्भवेत् भक्तिश्च स्यात्, तथैव पुनश्चेष्टयताम्।

अथैतावता नाम माष्टारस्याहंकारो नु वा समूलमुच्छिन्नोऽभूत्। चिन्तितं हि तेन—यथा खल्वत्रभवान् व्याहरति तत्तु यथार्थमेव। किंवा पुनर्मे तद्बोधनेन प्रयोजनम्? ईश्वरः किं मया ज्ञातः, उत तस्मिन् मे भक्तिरुत्पन्ना?

"शयितुं न स्वयं स्थानं लभते यत्र नाम वै।
तत्रान्यां शङ्कराख्यां हा समाह्वयति वा कथम्॥"

स्वयमजानता अशृण्वता वा परं बोधयितुं पुनः प्रवर्त्यते इत्यहो लज्जाकरमिदं तथा निर्बोधकृत्यञ्च! किमिदं गणितशास्त्रं वेतिहासशास्त्रं तथा साहित्यशास्त्रं वा यदन्यस्मै प्रत्यावेदनं कार्यं स्यात्? परमेश्वरतत्त्वं नामैतत्। अनेन महात्मना पुनर्यदुच्यते तत्तु मे रोचते खलु।

श्रीरामकृष्णेन सह माष्टारस्य एष एव तर्काणामादिरन्तश्च।

श्रीरामकृष्णः—मृत्तिकामूर्तिपूजनमित्युक्तवानसि त्वम्। यद्यपि मृत्तिकाया एवेति, तथापि तेन पूजनेन प्रयोजनं विद्यते। ननु ईश्वरेणैव व्यवस्थापिता विविधाः पूजाः। यस्येदं जगन्नाम तेनैवाखिलमेतद् विहितम्—अधिकारिविभेदेन। यस्योदरे यत् सहनीयं भवति, माता तद्रूपस्यैव आहारस्य आयोजनं करोति।

"कस्याश्चिन्मातुः पञ्च पुत्राः। गृहे मत्स्याः समानीताः। माता मत्स्यैर्नानाविधानि व्यञ्जनानि पक्ववती—जठरे यस्य यादृशं सह्यते। कस्मै

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मत्स्यपलान्नं, कस्मैचित् पुनर्मत्स्याम्लमयं खाद्यं, मत्स्यभर्जनं तथा च कटु मत्स्यव्यञ्जनञ्चेति नानाविधानि पक्वानि। यस्मै यद्रोचते, तथा यदुदरञ्च यादृक्सहनक्षमं, तत्कृते तदनुरूपमिति। बुध्यते त्वया भोः?

माष्टारः—अथ किम्, देव! (सविनयम्) केनोपायेन तावदीश्वरे मनः संबध्यते?

श्रीरामकृष्णः—सर्वदैव परमेश्वरनामगुणगानं खलु कर्तव्यम्। किञ्च सत्सङ्गो नाम—ईश्वरभक्ताः साधवो वैतेषां सविधे अन्तराऽन्तरा गन्तव्यम्। अहर्निशं सांसारिककर्मसु तथा वैषयिकव्यापारेषु व्यापृतस्य नहीश्वराभिमुखं मनः स्यात्। अन्तराऽन्तरा च निर्जनं स्थानमुपेत्य तस्यैव चिन्तनेनातीव प्रयोजनम्। प्रथमावस्थायां क्वचित् क्वचित् निर्जनतां विना दुष्करं खलु ईश्वरे मनःस्थापनम्।

"यावद्धि तरोः शैशवावस्था तावत्तु चतुर्दिक्षु वृतिर्व्यवस्थाप्या। वृतिर्यदि न दीयते तर्हि छागैर्गोभिर्वा स निर्भक्ष्यते।

"ध्यानं तावत् करणीयं मानसे कोणे तथा वने च। अपि च सर्वदा सदसद्विचारो विधेयः। ईश्वर एव सन्, नित्यं वस्त्विति यावत्; सर्वमन्यदसत्, अर्थात् अनित्यमिति। विचारमिमं कुर्वता मनसो वर्जनीयमनित्यं वस्त्वि"ति।

माष्टारः (सविनयम्)—ननु केन भावेन संसारे स्थातव्यम्?

श्रीरामकृष्णः—सर्वं कर्म क्रियताम्। मनस्तु ईश्वरे स्थापनीयम्। पुत्र-कलत्र-पित्रादिभिः सार्धं स्थीयतां तेषां च सेवा विधेया, ते तावत् कीदृशाः, अहो आत्मनीना इतिवत्। किन्तु मनसि अवधार्यताम् यत् ते हि तव न केऽपि।

"धनिन आलयस्थिता दासी सर्वाण्येव कर्माणि करोति, तस्या मनस्तु स्वदेशावसतिं प्रति वर्तते। सा प्रभोः पुत्रान् पुत्रीयति, तान् प्रयत्नतः पालयति। ममायं हरिर्नाम, एष मे राम इति सा ब्रवीति च। परन्तु नैते खलु मदीया इति सा सदैव वेत्ति।

"कूर्मो जले चरति, तस्य मनस्तु कुत्र तिष्ठति—किं जानासि? विले, यत्र सन्ति तस्याण्डानि। संसारस्य सर्वाण्येव कर्माणि क्रियन्ताम्, परम् ईश्वरे एव मनः स्थाप्यताम्।

"ईश्वरे भक्तिमलभमानः संसारं कर्तुं प्रवृत्तश्चेत् तर्हि अतितरां बद्धो भवसि। विपदा शोकेन तापेन च तदा अधैर्यो भवेः। अपि च, यावद् विषयचिन्ता क्रियते, तावत्तु आसक्तिरेव वृद्धिमुपैति।

"तैलाभ्यक्तेन करेण खलु पनसफलविभजनं करणीयम्। नोचेत् संसक्तक-रसेन हस्तावलिप्येते। तद् ईश्वरे भक्तिरूपं तैलमासाद्य संसारकर्मणि हस्ताव-मर्शः क्रियताम्।

"किन्तु एवंविधाया भक्तेर्लाभश्च निर्जनतामपेक्षते। ननु नवनीतञ्चेत्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

समाहर्तव्यं तर्हि निर्जने हि दधि समुत्पाद्यम्। विचाल्यमानं वै दधि घनीभूतं न भवति। ततो निर्जनेऽवस्थाय हित्वा च सर्वाणि कर्माणि दधिमन्थनं कर्तव्यम्। तेनैव नवनीतं लभ्यते।

"अपरञ्च पुनर्दृश्यताम्–अनेनैव मनसा निर्जने परमेश्वरचिन्तनवशाद्धि ज्ञान-वैराग्यभक्तयो लभ्यन्ते। पुनस्तु एतदेव चित्तं संसारविषयावसक्तं चेत् नीचतामाधत्ते। संसारे हि केवलं कामिनीकाञ्चनचिन्ता।

"संसार एव जलं, मनश्च दुग्धमेव। दुग्धं जले स्थापितं चेत् तर्हि संमिश्रणात् दुग्धजलम् एकीभूतं भवति, न हि विशुद्धं दुग्धं तत्र अन्विष्यमाणमपि प्राप्यते। अपि तु दुग्धं दधि सम्पाद्य नवनीतञ्च तस्मादाहृत्य निपात्यते चेदम्बुनि, जलोपर्येव तद् भासमानं तिष्ठति। अतः खलु निर्जनसाधनेन तावदादौ ज्ञानभक्तिरूपं नवनीतमाहर्तव्यम्। ततश्च संसारनीरे स्थापितमपि तन्नवनीतं नैव वारिणा संमिश्रितं स्यात्, भासमानमेव स्थास्यति।

"समभेव विचारोऽपि भूयसा कर्तव्यः। कामिनीकाञ्चने खलु अनित्ये; ईश्वर एवैकं वस्तु। अर्थेन किं सिध्यति ? अन्नं भवति, सूपं भवति, वस्त्रं भवति, वासस्थानं भवति—एतावदेव। परन्तु एतेन भगवल्लाभो न जायते। तस्मादर्थो जीवनस्योद्देश्यं भवितुं नार्हति। एष एव विचारो नाम ; बुध्यते किम् ?

माष्टारः—अथ किम्, देव ! साम्प्रतमेव पठितं मया 'प्रबोधचन्द्रोदयं' नाम नाटकम्। तत्र तु वर्तते 'वस्तुविचार' इति।

श्रीरामकृष्णः—वाढ़म्, वस्तुविचारः। पश्य तावत्, किमस्ति अर्थेषु, सुन्दरे देहे वाऽपि किं वर्तते ? विचारः क्रियताम्—सुन्दरस्त्रीतनावपि मांसास्थि-मेदमलमूत्रादीनि विद्यन्ते। ननु परमेश्वरं विहाय एतेष्वपि कथं मनो निधीयते जनैः, कथं वा विस्मर्यते भगवानिति।

माष्टारः—किमीश्वरो दृश्यते ?

श्रीरामकृष्णः—वाढ़म्, अवश्यमेव दृश्यते। तथा हि अन्तरान्तरा निर्जन-वासः तन्नामगुणगानं तथा वस्तुविचारश्च—एते खलु उपायास्तत्र अवलम्बनीयाः।

माष्टारः—कस्यामवस्थायां तद्दर्शनं भवति ?

श्रीरामकृष्णः—निरतिशयव्याकुलेन सता तदर्थं रुद्यते चेत् स हि दृश्यते। अहो, पुत्रकलत्रादीनां कृते घटीमितमश्रु विसृज्यते जनेन, तथा हि अर्थनिमित्तं रुदता प्लाव्यते वक्षःप्रभृतिकम्। पुनस्तु केन तावदीश्वरार्थं क्रन्द्यते ? प्रकृतमेव समाह्वानं यथा स्यात्तथैव समाह्वयितव्यः खलु भगवान्।

इत्युक्त्वा श्रीरामकृष्णेन सङ्गीतकमारब्धम्—

"आह्वय मानस समुचितभावैः स्थातुं शक्या कथमिह श्यामा !
कथमिव शक्ता स्थातुं श्यामा काली कथमिह स्थातुं शक्ता ?

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तत्पदसङ्गतमथ चेच्चित्तं बिल्वदलान्वित-जवाचय-वित्तम्।
भक्तिसुचन्दनचर्चितमित्थं जननीचरणेऽर्पय नित्यम् ॥"

"व्याकुलतायां सत्यामरुणोदयः संवृत्त इति बोध्यम्। ततः परमेव समुदेष्यति सविता। व्याकुलतानन्तरमेव ईश्वरदर्शनम्।

"त्रिषु तावदाकर्षणेषु सम्मिलितेषु तस्य साक्षात्कारो भवति; यथा—विषयिणां विषयं प्रति यदाकर्षणं, सन्तानं प्रति जनन्याश्च यदाकर्षणं, तथा पतिं प्रति साध्व्याः स्त्रियश्च यदाकर्षणम्; त्रिविधान्येतानि आकर्षणानि यदि कस्यचिद् युगपदेव प्रजायन्ते, तर्हि तदाकर्षणबलादेव लब्धुं शक्यत ईश्वरः।

"अयमत्र तावद् वचसो निष्कर्षो यद् भगवति प्रीतिः कर्तव्या; यथा—माता स्वापत्ये स्निह्यति, यथा च सती नारी पतिं प्रति प्रेम सन्धत्ते, यथा वा विषयासक्तो विषयेषु अनुरज्यते च। एतेषां त्रयाणां प्रेम, त्रिविधाकर्षणं सम्मिलितं चेद् यादृशं सम्पद्यते, तावन्मात्रं प्रेम यदि ईश्वरे प्रदीयते, तदैव तस्य दर्शनं लभ्यते।

"व्याकुलेन सता प्रार्थयितव्योऽसौ। तथा हि—विड़ालशिशुः केवलं 'मिउ मिउ' इति विक्रोशन् मातरमाह्वयितुं जानाति। मात्रा हि यत्र स्थापितः स तत्रैव तिष्ठति। कदाचिद् रन्धनशालायां कदा वा मृत्तिकायां क्वचिद्वा शय्यायामपि मात्रा स्थाप्यते सः। तस्य कष्टे जाते स केवलं 'मिउ मिउ' इति शब्दायते नाम, नान्यत् किमपि वेत्ति। मार्जारमाताऽपि 'मिउ मिउ' इति शब्दमाकर्ण्य यत्रैव स्थिता स्यात् तस्मादेव द्रुतं तमभ्येति।"

५ मार्च्, १८८२ खृः

तदानीं वराहनगराख्यपल्ल्यां निजभगिनीगृहे समवस्थित आसीन्माष्टारः। श्रीरामकृष्णसाक्षात्कारादारभ्य माष्टारस्य सततमेव तच्चिन्ता प्रचलति। सर्वदैव तदानन्दमयीं मूर्तिं पश्यन्तमिव तथाऽमृतमयीं वाणीं शृण्वन्तमिवात्मानं मन्यते स्म सः। चिन्तितवांश्चासौ—कथमनेन दरिद्रब्राह्मणेन परमगम्भीर-मेतावत्तत्त्वमन्विष्टं विदितं वा? अपरञ्च नैतावतापि कालेन एवम्भूतया सरलया गिरा तत्त्वान्येतानि बोधयन्तं कमपि दृष्टवान् स माष्टारः। कदा पुनस्तत्रभवन्तं गत्वा तमवलोकयितुं शक्नुयामित्येवासौ दिवानिशं चिन्तयन्नास्त।

एवं गच्छति काले मार्च्मासस्य पञ्चमदिवसः समायातः। आसीच्च तदा रविवासरः। वराहनगरवासिना नेपालाख्येन केनचिद् भद्रमुखेन

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सार्धमपराह्णकाले दक्षिणेश्वरस्योद्यानं समुपेतो माष्टारः। तत्र च तस्मिन्नेव पूर्वपरिचिते कक्षे क्षुद्रखट्वायां समुपविष्टः श्रीरामकृष्ण इति स दृष्टवान्। कक्षाभ्यन्तरं जनसमाकीर्णमासीत्। रविवासरे प्राप्तावसरा भक्ताः, अतस्ते तं द्रष्टुकामा आगताः। नैतावतापि केनचित् परिनिष्पन्नपरिचय इति तस्मिन् सदसि पार्श्वैकदेशे कृतासनपरिग्रहोऽभून्माष्टारः। अपश्यच्च स्मिताननं भक्तैः सह सम्भाषमाणं श्रीरामकृष्णम्।

तत्र तावदेकोनविंशतिवयस्कं कञ्चिद् युवानमुद्दिश्य तस्मिन्नेव निहितदृष्टिः श्रीरामकृष्णः परमानन्दातिशयमनुभवन्निव कथाजातं प्रपञ्चयति स्म। नाम्ना चासौ युवा नरेन्द्रनाथः। महाविद्यालये समधीयानश्चायं साधारणब्राह्म-समाजगामी। तेजःपरिपूर्णानि तावदस्य वचांसि। तथासौ उज्ज्वलनयनो भक्ताकृतिश्च। विषयासक्तं संसारिणं जनमधिकृत्य प्रवृत्तैषा कथेति अनुमानेन अवगतवान् माष्टारः। एवंविधा खलु सा कथासीत्—ये नाम भृशमेवेश्वर-मुद्घोषयन्ति, धर्मः, धर्म इति व्याहरन्ति—तान् निन्दन्ति खलु ते जनाः। अपि तु संसारे च विद्यमानैर्बहुभिः दुरात्मभिः कथं व्यवहर्तव्यमित्येताः कथाः प्रचलन्ति स्म।

श्रीरामकृष्णः (नरेन्द्रं प्रति)—नरेन्द्र ! किमुच्यते त्वया वा ? कति तावदामनन्ति संसारिणो जनाः। अपि तु पुनर्दृश्यतां भोः, गच्छन्तं गजेन्द्रमनुगच्छन्तः कति नाम जन्तवः कतिशश्चीत्कारं कुर्वन्ति। न पुनस्तत्र नागेन्द्रः प्रतिवीक्षते नाम। अथ त्वामपि निन्दति चेत् कश्चित्, त्वं किं मन्येथाः ?

नरेन्द्रः—श्वानो विक्रोशन्तीत्येवं मया तत्र मन्तव्यं नाम।

श्रीरामकृष्णः (सहास्यम्)—न हि रे, नैतावद्धि विधेयम्। (सर्वेषां हास्यम्)। सर्वभूतेषु ईश्वरो विराजते। तथापि सज्जनेन सह सङ्गच्छते निरतिशयमेलनम्, दुष्टात् पुनर्दूरत एव स्थातव्यम्। व्याघ्राभ्यन्तरेऽपि नारायणोऽस्तीति न शार्दूलानां पुनरालिङ्गनं कर्तव्यम्। (सर्वेषां हास्यम्)। यदि भणसि, व्याघ्रोऽपि नारायणः, तत् कथं पलायनं कर्तव्य-मस्माभिः ? तस्योत्तरं यथा—ये हि तत्र पलायितुमादिशन्ति तेऽपि नारायण एव, अतस्तेषां वचनमपि कथं न श्रोतव्यं वा ?

"श्रूयतां तावत् काचित् कथा। अस्ति कस्मिंश्चिद् वने कश्चित् साधुः। तस्य च बहवः शिष्या आसन्। अथैकदा स शिष्यानुपदिदेश—सर्वेषु भूतेषु नारायणस्तिष्ठति इति विज्ञाय सर्वे नमस्कार्याः। कदाचिद् होमार्थं काष्ठानि समाहर्तुं वनं गते कस्मिंश्चित् शिष्ये 'कः कुत्र तिष्ठति, द्रुतं पलायताम्, गच्छति कश्चिदुन्मत्तो हस्ती'ति महान् रवः समुत्थितः। अथ

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पलायितेष्वपि सर्वेषु स शिष्यः पुनर्नैव पलायमासे। हस्ती नामापि नारायण एवेति जानन् स 'कथं तर्हि पलायनं करोमी'ति चिन्तयित्वा तत्रैव स्थितः। नमस्कृत्य च स्तवादिकमारेभे सः। इतस्तु 'दूरमपस्रियतामपस्रियतामिति' हस्तिपकेन पुनः पुनरुच्यमानोऽपि स तत्रैव प्रशान्तचेष्ट आसीत्। शेषे हस्ती हि करेणाकृष्य तमेकपार्श्वतो दूरं निक्षिप्य प्रचलितः। शिष्यस्तु क्षतविक्षतो विलुप्तचेतनश्च सन् पतितोऽतिष्ठत्।

"अथैतद् वृत्तजातं विदित्वा अपरैः शिष्यैः सह गुरुस्तत्रागत्य कथञ्चित् तं वहन् स्वाश्रमं नीत्वा भेषजानि तस्मै अकल्पयत्। कियत्क्षणात् परं लब्धचैतन्यं तं पृष्टवानपरः—'अरे, आयाति गज इति आकर्ण्यापि कथं न पलायितस्त्वमसि?' सोऽभ्यधात्—'ननु नारायण एव मानवजीवजन्तुरूपेण प्रकटितस्तिष्ठतीत्यादिष्टं तत्रभवता गुरुदेवेन। अतः खलु हस्तिरूपं नारायणमेवागच्छन्तं विलोक्यापि नैवाहं पलायित' इति। तदाह गुरुदेवः—'अये, तात! हस्ति-नारायण एवायातीति यद्यपि सत्यमेतत्, तथापि रे, पुनर्हस्तिपकनारायणस्तु त्वां वारितवान्। तत् कथं सर्वो नारायण इति जानता तन्निषेधवाक्येऽपि विश्वासो न कृतः? हस्तिपकरूपस्य नारायणस्यापि निर्देशः पालनीयः खलु।' (सर्वेषां हास्यम्)।

"शास्त्रे विद्यते—'आपो नारायणः'—अर्थात् जलं नारायण इति। किन्तु किञ्चिज्जलं देवपूजनार्हं; पुनरन्यज्जलमाचमनं पात्रादिप्रक्षालनं, वस्त्र-परिष्करणमेव वा केवलं निर्वाहयितुं योग्यम्। न हि तज्जलं पानाय वा पूजनाय वा कल्पते। तथैव साधूनामसाधूनां भक्तानामभक्तानाञ्च सर्वेषामेवान्तर्नारायणो विराजमानस्तिष्ठति। अपि तु न पुनरसाधुभिरभक्तै-र्दुष्टैश्च व्यवहारादिकं सङ्गच्छते, सौहार्द्यातिशय्यं वा शोभते। तेषु केनापि पुनः केवलं मौखिको वाग्व्यवहार एव प्रवर्तयितव्यः स्यात्, अथ केन पुनः सोऽपि न युज्यते। दूरत एवावस्थातव्यं तथाविधेभ्यो जनेभ्यः।"

कश्चिद् भक्तः—महात्मन्, यदि नाम अनिष्टमाचरितुमुद्यता दुष्टा जनाः अनिष्टं सम्पादयन्ति वा, किं तर्हि तत्रापि तूष्णीं स्थातव्यम्?

श्रीरामकृष्णः—लोकैः सह वासः करणीयश्चेद् दुष्टेभ्यः आत्म-परित्राणार्थं किञ्चिन्नाम तमोगुणप्रदर्शनं समुपयोगि स्यात्, अपि तु स मेऽनिष्टं कर्तुं प्रभवतीति कृत्वा तदनिष्टकारिणं प्रत्यपि नानिष्टमाचरणीयम्।

"कस्मिंश्चित् प्रान्तरे कश्चिद् गोपालदारको गाश्चारयन्नतिष्ठत्। निवसति स्म तत्र कश्चित् तीव्रविषो भीषणः सर्पः। तद्भुजङ्गभिया सर्वे जनास्तत्र सावधाना बभूवुः। अथ कदाचित् तस्मिन् प्रान्तरे मार्गेण गच्छन् कश्चिदे ब्रह्मचारी धावितागतैर्गोपबालकैरुक्तः—'भो भो देव! नैतेन पथा गन्तव्यं

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भवता, वर्तते चास्मिन् मार्गे कश्चिदाशीविषस्तीव्ररोषः।' उक्तं तेन यतिवरेण—'भवत्वेवम्। तथापि वत्साः, नास्ति मे भयम्, मन्त्रं खलु वेद्मि।' इत्युक्त्वा तामेव दिशं प्रति स साधुर्गतः। भीतभीताश्च ते गोपालदारकाः पुनस्तेन सार्धं नैव जग्मुः। अथ समुद्यतफणं तं भुजङ्गं समीपागतं दृष्ट्वा यावन्मन्त्रमेकं पठितवान् स यतिवरः, तावदेव स नागः साधुचरणसान्निध्यं किञ्चिलुकवन्निपतित आस्त। उक्तं तेन यतिना—'कथमरे, परान् प्रति हिंसामाचरंस्त्वं कालं नयसि? एहि तावन्मन्त्रं ते प्रयच्छामि। अस्य मन्त्रस्य प्रजपेन सम्पत्स्यते ते भगवति भक्तिः, लप्स्यसे च भगवन्तम्, हिंसाप्रवृत्तिश्च ते दूरीभविष्यति।' एवमुक्त्वा स साधुः मन्त्रेण तं फणिनं दीक्षितमकरोत्। ततो लब्धमन्त्रः खल्वसौ सर्पो गुरुं प्रणम्यापृच्छत्—'देव, कथं तावत् साधना कर्तव्या तदादिशतु भवान्।' पुनराह गुरुः—'मन्त्रोऽयं जप्यताम्, कमपि मा हिंस्याः।' गमनावसरे प्रावोचद् ब्रह्मचारी—'पुनरप्यागमिष्यते मया।'

"अथ प्रवहति स्म कालः। गोपालकाश्च सर्पोऽसौ दष्टुं नायाति, लोष्ट्रनिक्षेपणादपि रोषं न गच्छति, किञ्चिलुकवन्निर्जीवतामिव गत इति वीक्षितवन्तः। अथ कदाचित् कश्चन गोपालदारकः सर्पसान्निध्यमेत्य पुच्छाग्रे धृत्वा विषमं घूर्णयन् तं भुजङ्गमं भूमौ न्यक्षिपत्। तद्वशाद् वमद्रुधिराननः स सर्पश्च विलुप्तचेतनो विरहितस्पन्दनादिरतिष्ठत्। तथाविधं समवस्थितं तं विगतप्राणं मत्वा प्रस्थितास्ते सर्वे बालकाः।

"ततो गभीरायां रजन्यां प्राप्तचेतनः स भुजङ्गः कथमपि क्लेशेन शनैः शनैः स्वीयविवराभ्यन्तरं प्रविष्टो विचूर्णितकलेवरतया गमनादिशक्तिरहितः स्थितः। एवं गतेषु दिवसेषु अनशनत्वेन अस्थिचर्ममात्रावशेषः स आहारं ग्रहीतुं रजन्यामेव वारमेकं बहिर्गामी बभूव, भीतभीतस्तु न कदाचिदपि दिवा बहिरागतः। आ मन्त्रग्रहणाच्च हिंसामपि नाचरत्। मृत्तिकायाः पत्रस्य तथा वृक्षात् स्वयंनिपतितस्य फलस्य च भक्षणेनैव प्राणान् विधत्ते स्म।

"अथ प्रायेणैकवर्षानन्तरं स ब्रह्मचारी तेनैव पथा गच्छन् तत्प्रदेशमापन्नः प्रथममेव तस्य सर्पस्य तावदन्वेषणं कुर्वन् 'मृतः स सर्प' इति गोपालदारकैरभिहितः। ब्रह्मचारी पुनस्तेषां वचःसु नैव विश्वासमकरोत्। गृहीतमन्त्रस्यामुष्य मन्त्रसाधनसमापनं विना देहावसानं नैव सम्भवेदिति वेत्ति स्म स सन्न्यासी। ततस्तमन्विष्यन् ब्रह्मचारी स्वप्रदत्तनामग्रहणेन सर्पमाजुहाव। गुरुकण्ठध्वनिमाकर्ण्य विवराद् विनिर्गतः सर्पः परमभक्तिभावेन गुरुचरणयोः कृतप्रणामः स्थितः। ब्रह्मचारिणा तदा पृष्टः सः—'अपि कुशली त्वम्?' उक्तञ्च सर्पेण—'अथ किम्, कुशलमेव मे।' पुनरपृच्छत् स ब्रह्मचारी—

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यद्येवं कथं तर्हि एतावती कृशता ते वपुषः ?' व्याहरत् स भुजङ्गः—'अयि देव, कमपि न हिंस्या इत्यादिष्टं भवता। ततः पत्रफलादिद्रव्याशी स्थितोऽहमिति वा स्यान्मम कृशता तनोः।' ननु समुत्पन्नसत्त्वोत्कर्षतया नास्य कमुद्दिश्यापि वर्तते स्म लेशतोऽपि रोषः। अतः खलु गोपालैः सम्पादितां तत्प्राणविनाशनप्रचेष्टामपि विस्मृतवान् सः। पुनरुवाच स ब्रह्मचारी—'न केवलमशनं विनैव तावदेतादृशी अवस्था सम्भाव्यते। अतो निश्चितमेव विद्यते चात्र कारणमन्यदपि, स्मर्यतां त्वया।' अनन्तरं मनसि गोपालकृतमुत्पीड़नं स्मृत्वा सोऽवादीत्—'अयि देव, स्मराम्यहमधुना कदाचिद् गोपालबालकैः कृतं भूमौ निक्षेपणम्। अपि तु अज्ञाः खलु ते बाला नैव जानन्ति स्म मदीयां चित्तवृत्तिम्। मया न कोऽपि दष्टव्यो न वा कस्यापि अनिष्टं कर्तव्यमिति कथं वा तैर्ज्ञेयम् ?' अभिहितं ब्रह्मचारिणा—'अहो, कष्टं नाम! अरे, एतावान् खलु निर्बोधस्त्वं यदात्मानमपि रक्षितुं नैव जानासि ? मया तु केवलं दंशनमेव प्रतिषिद्धम्, न पुनः फणोद्यमपूर्वकं श्वसनम्। अतः कथं श्वसता त्वया तेषां भीतिर्नोत्पादिता ?'

"तथा हि यद्यनिष्टं वा कुर्युरिति श्वसनेन दुर्जनास्तावद् भेषयितव्याः। न पुनस्तेषु विषोद्गारः करणीयः, न वाऽनिष्टं किञ्चित्तेषां विधातव्यमिति।

"विद्यन्ते हि विविधा जीवा जन्तवो वृक्षादयश्च ईश्वरसृष्टेऽस्मिन् जगति। जन्तवोऽपि पुनः साध्वसाधुभावापन्नाः किल। व्याघ्रवद् हिंस्रजन्तवोऽपि सन्ति। वृक्षेषु केचिदमृतफलाः केचिच्च विषफला वर्तन्ते। तथा मनुष्येषु केचित् साधवः, केचिच्च असाधवः, तथा हि संसारिणो जीवाः, पुनर्भक्ता अपि केचिद् भवन्ति।

"बद्ध-मुमुक्षु-नित्य-मुक्त-भेदेन चतुर्धा जीवाः।

"तत्र केवलं जीवकल्याणसाधनार्थं जीवशिक्षणार्थञ्च संसारमधितिष्ठन्तो नित्यजीवा उच्यन्ते, यथा नारदादयः।

"विषयासक्तचेतसो बद्धजीवा नाम, विस्मृतपरमेश्वरा ह्येते पुनर्भ्रमेणापि नैव स्मरन्ति भगवन्तं नाम।

"मुक्तिमभिकाङ्क्षन्तो हि मुमुक्षवो जीवाः। अपि तु तेषां कश्चिदेव मुच्यते, न चापि कश्चन।

"संसारे कामिनीकाञ्चनादौ अनासक्ताः खलु मुक्तजीवाः। साधवो महात्मानश्च तत्र दृष्टान्ताः। न चामीषां चेतसि विषयबुद्धिलेशोऽपि वर्तते, तथा निरन्तरमेव भगवदच्युतचरणारविन्दध्यानपरायणाश्चैते।

"यथा हि मत्स्यबन्धनार्थं पुष्करिण्यां जालमेकं निपातितम्। तत्र द्विचतुराः केचिन्मत्स्याश्चातुर्यहेतोः कथमपि जालबन्धं नायान्तीति नित्यजीवोपमाभाजनता-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मापद्यन्ते। अपि च तत्र बहवश्चान्ये मत्स्या जालबद्धा भवन्ति। बद्धानामपि मत्स्यानां केचन पुनः पलायितुं चेष्टमाना मुमुक्षुजीवोपमां भजन्ते। तत्रापि च न सर्वे खलु पलायनसमर्थाः। द्वौ वा चत्वारो वा तत्र महदुल्लम्फनादिप्रबन्धेन जालात् पलायन्ते। ततश्च पलायितान् तान् लक्ष्यीकृत्य धीवरैरेवमुच्यते—असौ तावदेको विशालो मत्स्यः पलायित इति। परन्तु जालबद्धानां बहव एव नैवं पलायनसमर्था भवेयुः, पलायनप्रयत्नमपि न कुर्वन्ति, किन्तु जालावृतमुखैर्हि तैः सरोवराभ्यन्तरपङ्केषु निःशब्दं पिहिताननभावेन एवावस्थीयते, मन्यते च नास्ति पुनरस्माकं भयम्, साधु वयं वर्तामह इति। परमेते न जानन्ति यद् धीवरास्तान् प्रसभमाकृष्य तीराभिमुखमुत्तोलयिष्यन्ति। एते खलु ब-जीवोदाहरणस्थानम्। बद्धजीवाः खलु संसारस्य कामिनीकाञ्चनाभ्यां बद्धाः, तेषां करचरणं निगड़ितम्। भूयस्ते तर्कयन्ति—संसारस्य कामिनीकाञ्चनाभ्यां ननु सौख्यं जायेत, निर्भयं च ते स्थास्यन्तीति। ते हि न विदन्ति—एतेनैव तेषां मृत्युर्भविष्यतीति। बद्धजीवो यदा मरणापन्नस्तदा तत्-कान्तयाऽऽक्रोश्यते—'अये गतवानसि त्वम्, मम तु पुनः कां नाम व्यवस्थां कृतवानसि' इति। अहोवत! एतावती पुनर्माया नाम यत् प्रदीपवर्तिकामपि जाज्वल्यमानामालक्ष्य बद्धजीवैरेवमाभाष्यते—तैलं निःशेषतां यास्यति; वर्तिकाग्रं किञ्चिल्लघु क्रियतामिति। अहो, इतश्चायं मृत्युशय्यामधिशयानः!

"न हि बद्धजीवा ईश्वरचिन्तां कुर्वन्ति; ते किल सत्यवसरे निरर्थकवाग्-जातं प्रपञ्चयन्ति अलीककर्माण्युत साधयन्ति। अथ कथमेतदिति केनचित् पृष्टास्ते पुनरेवमाभणन्ति—'नाहं जातु क्षणमपि तिष्ठाम्यकर्मकृत्, तदेव वृति-बन्धनं करोमी'ति। क्वचित् पुनस्ते कालक्षयाभावमवेक्ष्य क्रीड़ापत्राण्यादाय क्रीड़ायां प्रवर्तन्ते चे"ति। (सर्वे स्तब्धाः)।

कश्चिद् भक्तः—महात्मन्, किमेतादृशानां संसारिणां जीवानां नास्ति कोऽप्युपायः?

श्रीरामकृष्णः—अवश्यमेवास्ति तावदुपायः। अन्तराऽन्तरा साधुसङ्गः, तथा रहस्यवस्थितेन ईश्वरचिन्तनं च क्रियेत। किञ्च विचारोऽपि कर्तव्यः। दीयतां मे भक्तिस्तथा विश्वासश्चेति तस्य सकाशे प्रार्थना करणीया।

"सञ्जाते हि विश्वासे सर्वं सिद्धं स्यात्। न हि विश्वासादूर्ध्वं वर्तते किञ्चिद् वस्तु।

(केदारं प्रति) "अपि श्रुता तावद् विश्वासस्य कीदृशी शक्तिः? पुराणे विद्यते, पूर्णब्रह्मणो साक्षान्नारायणस्यापि रामचन्द्रस्य लङ्कागमनार्थं सेतुबन्धनं कार्यमासीत्। पुनस्तु हनुमान् रामनामविश्वासाद् उल्लम्फनद्वारा समुद्रस्य पारं गतः। न हि तस्य सेतुना प्रयोजनमभूत्। (सर्वेषां हास्यम्)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"विभीषण एकस्मिन् पर्णे रामनाम विलिख्य कस्यचिज्जनस्य वस्त्राञ्चलेऽबध्नात्। पारेसमुद्रं स गमिष्यति। विभीषणस्तस्मै शशंस—'मा भैषीः। कृतविश्वासस्त्वं खलु जलोपरि पादन्यासं कृत्वा गच्छ। अपि चेदं पुनः स्मर्तव्यम्—अथाविश्वासस्ते मनसि समुदियात् तर्हि जलनिमज्जनं ते भविष्यती'ति। अथ सुखेन समुद्रसलिलेषु पादचारं चरतस्तस्य सहसा मनसि वस्त्राञ्चलबद्धं किमस्ति वस्तु इति सुतरां दर्शनेच्छा सञ्जाता। ततश्च ग्रन्थिविमोचनपूर्वकं केवलं रामेति नामाङ्कितं पत्रमेकमवलोक्य यावत् स 'किमिदं तावत् केवलं रामनामाक्षराङ्कितं पर्णमेकमि'ति चिन्तयति तावदेव वारिष्वपि निमज्जति।

"यस्यास्ति ईश्वरे विश्वासः, स यदि महापातकान्याचरति—गोब्राह्मणस्त्री-हत्यादिकं विदधाति, तथापि एवं भगवद्विश्वासबलाद् महापापेभ्योऽपि उद्धारः स्यात्। स यदि ब्रवीति—न पुनरेवं मयाऽनुष्ठातव्यमिति तर्हि न तस्यास्ति कुतोऽपि भयम्।"

इत्युक्त्वा श्रीरामकृष्णेन सङ्गीतकमारब्धम्—

"दुर्गा दुर्गेति मन्त्रं यदि मम जपतो मृत्युरेवेश्वरि स्यात्।
दीनं मां शङ्करि त्वं तदिह ननु कथं भाविन्युद्धारयेर्वा ?
गो-विप्र-भ्रूण-नारी-निधनजमपि वा मद्यपानोत्थितञ्च।
पापं किञ्चिन्न मन्येऽमृतपदमपि तन्नामतो लब्धुमर्हः॥"

"दृश्यमानस्तावदसौ युवा अत्र हि एकरूपः। दुरन्तोऽपि पितरं निकषा समुपविष्टः पुत्रः शान्तस्तथा भीतभीत इव प्रतीयते। स च पुनश्चत्वरे क्रीड़न् भिन्नां मूर्तिमाधत्ते। इमे हि नित्यसिद्धश्रेणीभाजः। नैते कदापि संसारे बद्धा भवेयुः। किञ्चिद् वयोविवृद्धावेव चैतन्यमाविर्भवति, भगवन्तं चैवाश्रयन्ति। जीवशिक्षायै केवलमेषां संसारावतरणम्। किमपि सांसारिकं वस्तु नैतेभ्यो रोचते, न वा कदापि कामिनीकाञ्चनासक्ता भवन्ति।

"वेदे विद्यते 'होमा' इति पक्षिणः कथा। निरतिशयोन्नते नभसि निवसन्तस्ते तत्रैवाण्डं प्रसुवते। प्रसूतं हि तदण्डं निपतदपि पुनरत्युच्चैः स्थिततया बहूनि दिनानि यावत् पतनक्रियासंयुतं सत् तदवस्थमेव विदीर्णं भवेत्। ततस्तस्य शावकस्यापि तथैव निपततश्चक्षुरुन्मीलनं पक्षसमुद्गमश्च भवेताम्। अथोन्मीलितनेत्रतया स्वपतनमालक्ष्य भूमितलनिपतनाघातेन स्वकीयशरीरविचूर्णनं निश्चित्य च स पक्षिशावकः पुनर्मातरमुद्दिश्य उच्चैर्नभः प्रत्यावर्तमानो द्रुतं धावेत्।"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ नरेन्द्रनाथस्तस्मादुत्थितोऽगात्। तत्र सदसि केदार-प्राणकृष्ण-माष्टार-प्रमुखा आसन्।

श्रीरामकृष्णः—दृश्यतां तावत्—अयं हि नरेन्द्रः सङ्गीते वाद्ये तथाऽध्ययनादौ चोत्कर्षमाधत्ते। कति दिनेभ्यः प्राक् केदारेण सह वितर्कयन्नसौ हि दृढतरयुक्त्या केदारवचांसि लीलया खण्डितवान्। (श्रीरामकृष्णस्य तथाऽन्येषाञ्च हास्यम्)। (माष्टारं प्रति) "अपि इंराजीभाषायां किमपि तर्कशास्त्रीयपुस्तकं विद्यते ?"

माष्टारः—अथ किम्, देव, इंराजीभाषायां विद्यते न्यायशास्त्रं (Logic) नाम।

श्रीरामकृष्णः—भवतु, कीदृशं तदुच्यतां तावद्भोः।

माष्टार इदानीं समस्याकवलितोऽभूत्; अकथयच्च—"साधारणसिद्धान्तमनुसृत्य विशेषसिद्धान्तस्थापनमिति वर्तते कश्चित् प्रकारः। तद् यथा—

सर्वे मानुषाः मरणशीलाः,
पण्डिताश्च मानुषाः,
अतएव पण्डिता अपि मरणशीला इति।

अथापरा पद्धतिरपि दृष्टान्त-विशेषं वृत्तान्तविशेषं वा समाश्रित्य साधारणसिद्धान्तस्थापनमिति। तद् यथा—

अयं काकः कृष्णः,
असौ काकः कृष्णः,
(अपि च) अस्माभिर्दृश्यमानाः सर्वे काकाः कृष्णाः,
अतएव सर्वे काकाः कृष्णा एवेति।

अपि तु विशेषेण सामान्यव्यवस्थापने क्वचिद् भ्रमसम्भावनाऽपि वर्तते। यतः काकं सर्वथैवान्विष्यतां कदाचिद् देशान्तरे वा कालान्तरे वा श्वेतोऽपि काकः प्रत्यक्षगोचरः सम्भाव्यते नाम। वर्तते चात्रान्योऽपि दृष्टान्तः—यत्र यत्र वर्षणं तत्र तत्रैव मेघः, तस्मात् मेघाद् वृष्टिर्जायते इत्येष साधारणः सिद्धान्तः। अपरश्चात्र सिद्धान्तः—द्वात्रिंशद्दशनवानयं नरः, असावपि जनस्तथैव द्वात्रिंशद्दशनयुक्तः, एवं दृश्यमानाः सर्वे खलु मानवा द्वात्रिंशद्दशनवन्त इति समाधानम्। वर्तते तावदिंराजी-भाषामये तर्कशास्त्रे एवंविधानां विशेषनियमेन सामान्यसिद्धान्तस्थिरीकरणवार्ता।"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तत्रभवान् श्रीरामकृष्णः सर्वाश्चैताः कथाः श्रुतवानेव केवलम्। शृण्वन्नैव चान्यत्रगतमना अभूत्। तस्मादेव विषयेऽस्मिन् नाधिकालोचना चलिता।

अथ समाप्तायां सभायां तत्रेतस्ततो हि पादचारं विचरत्सु भक्तेषु पञ्चवटीप्रभृतिस्थानेषु भ्रमति च माष्टारे प्रायः पञ्चघटिकाकालः समायातः। ततो व्यतीते कियत्क्षणसमूहे श्रीरामकृष्णभवनाभिमुखमागच्छता माष्टारेण गृहस्योत्तरदिग्भागीये स्वल्पप्रसरेऽलिन्दे संघटमानः कश्चिदद्भुतव्यापारो व्यलोकि। तथा हि निश्चलकलेवरं दण्डायमाने तत्रभवति श्रीरामकृष्णे तत्र कतिपयैः भक्तैः श्रूयमाणं नरेन्द्रेण गीयमानं सङ्गीतकं श्रुत्वा तत्रैव सङ्गीत-श्रवणलोभाकृष्टमानसः समागतो माष्टारः स्थिरकायः समवस्थितः। श्रीरामकृष्ण-कृतं सङ्गीतमृते नैतावता कदापि क्वचन तथाविधं मधुरं सङ्गीतकमाकर्णितं तेन। अथ सपदि श्रीरामकृष्णे विनिहितनेत्रपातः स खलु विस्मयविमूढचेताः सञ्जातः। तथा हि दण्डायमानस्य प्रशान्तचेष्टस्य तत्रभवतः श्रीरामकृष्णस्य पक्ष्माणि स्पन्दितानि नाभुवन्। तथा निःश्वासप्रश्वासादिकं वहति न वेति संशयः समजनि। तेन पृष्टः कश्चिद् भक्तः प्राह—अयमेव समाधिर्नामेति। नैवंविधं किञ्चिदितःपूर्वं दृष्टं श्रुतं वा तेन माष्टारेण। विस्मयाभिभूतेन तेन चिन्तितमित्थम्—किं नाम भगवच्चिन्तनेन मानवस्य तावदित्थम्भूता बाह्यज्ञानविलुप्तिः सम्भाव्येत? कीदृशो विश्वासः कियती वा भक्तिरेता-दृशीमवस्थां जनयेत् तन्नैव कल्पयितुमपि शक्यते। तत्र तदानीं गीयमानं सङ्गीतकं हि—

"चिन्तय मम मानस हरिं
चिद्घनमथ निरञ्जनम्।
अनुपमकान्तिं मोहनमूर्तिं
भक्तहृदयरञ्जनम्।
नवरुचिरञ्जित- कोटिविधुनिन्दित-
कान्तिविमण्डितकायम्।
अथ पुलकान्वित- जीवनवीक्षित-
कलेवरविधृतमायम्॥"

सङ्गीतस्य चरणेऽस्मिन् गीयमाने खलु श्रीरामकृष्णस्य रोमाञ्चितं वपुरपि विधुन्वदभूत्। निपतितञ्च नयनारविन्दविगलितम् आनन्दोत्थं सलिलम्। किमिव पश्यन्निवाऽन्तराऽन्तरा हसति स्म तत्रभवान्। अहो, कोटिशशि-विनिन्दितमनुपमं किमिह रूपं वा पश्यति स्म श्रीरामकृष्णः तदपि न ज्ञातुं

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शक्यतेऽपरैः ! किमिदं चिन्मयरूपदर्शनं नाम ? कतिसाधनसम्पत्त्या कीदृशेन वा तपसा कियता वा भक्तिसमुपबृंहितविश्वासबलेन च एवंविधं नाम ईश्वरदर्शनं सम्पद्यते पुंसां, तदपि चिन्तयितुं न पार्यते ।

अथ पुनरपि प्रचलति स्म सङ्गीतकम्—

"हृदयसरसिजान्तर्ध्यायितां तत्पदाब्जम्
अचपलमनसा च प्रेमयुक्तेक्षणेन ।
निरवधि बहुसुखं सर्वसौन्दर्यसार-
मतुलनमिह रूपं दृश्यतां दृश्यतां रे ॥"

ततो भूयोऽपि निष्पन्दकलेवरस्य स्विमितनेत्रपङ्कजस्य किमिव अपरूपावलोकनप्रभवे महानन्दमहोदधौ निमज्जतस्तत्रभवतः श्रीरामकृष्णस्य त्रिभुवन-विमोहनहास्यमपि परं विस्मयस्थानमभूत् ।

अथ सङ्गीतसमाप्तिं कुर्वता नरेन्द्रेण गीतमासीत्—

"चिदानन्दरसे पूर्णे भक्तियोगान्वितः सदा ।
चिन्मयाब्धौ परं प्रेम्ना निमग्नो भव रे मुदा ॥"

समाधेस्तथा प्रेमानन्दस्य अनन्यसाधारणं तथाऽदृष्टचरं चित्रमिदं हृदये निधाय गृहं प्रत्यावर्तत माष्टारः । अन्तराऽन्तरा च 'चिन्मयाब्धौ परं प्रेम्ना निमग्नो भव रे मुदे'ति हृदयोन्मादनः सङ्गीतध्वनिर्जाग्रदिव प्रतिभाति स्म तद्हृदये ।

६ मार्च्, १८८२ खृः

अथ परेद्यवि पूर्वोक्तखृष्टाब्दीयमार्च्मासस्य षष्ठदिवसे अवकाशदिवसस्य हेतोः अपराह्णकाले प्रायेण त्रिघटिकायां पुनरपि समागतो माष्टारः । तस्मिन्नेव पूर्वविदिते गृहे समुपविष्टः श्रीरामकृष्णः । कक्षभूमौ समुपन्यस्ते कटे समवस्थिताः खलु नरेन्द्र-भवनाथमिश्राः केचन भक्ताः । तेषु भवतेषु कति पुनर्युवान एकोनविंशति-विंशतिवयस्का आसन् ।

सुस्मिताननः खलु श्रीरामकृष्णः क्षुद्रां खट्वामधिरूढः भक्तैर्युवभिः सानन्द-मामन्त्रयमाणः व्यराजत । ततो गृहं प्रविशन्तं माष्टारमवेक्षमाण उच्चैर्हसन् श्रीरामकृष्णः युवकान् भक्तानाह—'अहो रे, पुनरपि खल्वसौ समागतः !' एवमुक्त्वा हसति तस्मिन् तथैव कृतस्मितेषु चान्येषु सर्वेषु, समागतः माष्टारः, साष्टाङ्गं च प्रणम्य तत्र उपाविशत् । इतःपूर्वमिंराजीभाषाम-धीयानैर्यथा क्रियते तथैवानेनापि माष्टारेण दण्डायमानेन बद्धाञ्जलिना प्रणामक्रिया सम्पाद्यते स्म । अधुना तु भूमौ शिरोऽवलुण्ठनं यथा स्यात् तथैव प्रणामः शिक्षितस्तेन । अथासनपरिग्रहे कृते तेन माष्टारेण स्मित-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कारणमुपवर्णयन् श्रीरामकृष्णो नरेन्द्रप्रमुखभक्तेभ्यो वाचमुत्सृजति स्म—"पश्यत रे, कदाचिद् अपराह्णकाले चतुर्वादनसमये कश्चिज्जनः केनचन मयूरेण किञ्चिदहिफेनमखादयत्। ततो मत्तताप्रभवानुरागवशात् परेद्यवि अपि तस्मिन्नेव काले तदशनार्थं समागतः स मयूरः!" (सर्वेषां हास्यम्)

एतदाकर्णयता माष्टारेण मनसि चिन्तितं नाम—यथार्थमेवाभाषते तत्रभवान् देवपादः। स्वावासं गतस्यापि दिवानिशमेतदुन्मुखं मे चेतः—कदा द्रक्ष्यामीति विभावयतः। केनचिद् बलादाकृष्ट इवास्मि स्थानेऽस्मिन्। न पुनः सङ्कल्पितमप्यन्यत् स्थानं गन्तुं शक्तोऽस्मि। अत्रैवागन्तव्यं यथा कथमपि। एवं चिन्तयति तस्मिन् श्रीरामकृष्णः युवभिर्भक्तैः हास्यपरिहासविजृम्भितं व्यापारमातिष्ठन् भक्तेषु तेषु समानवयस्त्वमिवोपकल्पयन् स्वाच्छन्द्यमुपस्थापितवान्। समुत्थिताऽभूद् हास्यलहरिका, आनन्दहट्टमिव संवृत्तं तत्स्थानम्।

विस्मयविमूढ़चेतसा सर्वमिदमद्भुतमालोकयता माष्टारेण पुनरेवमालोचितं मनसि—किमहो, पूर्वेद्युरेतस्यैव समाधिरदृष्टपूर्वप्रेमानन्दश्च दृष्टौ मया? किमहो सोऽयमेव साम्प्रतं प्राकृतजनवद् व्यवहरन् विराजते। किममुनैव प्रथमसन्दर्शनदिवसे उपालब्धोऽहम्? किमु ज्ञानी त्वमिति पृष्टोऽहं किमेतेनैव? किमयं साकारो निराकारश्च उभावपि यथार्थाविति प्रकाशितवान्? ईश्वर एव सत्यः, संसारस्य सर्वमन्यदनित्यमित्यपि किममुनैव व्याहृतम्? संसारे दासीवदवतिष्ठस्वेति किमेतेनैवाहमुपदिष्टः?

एवं तर्कयन् स सानन्दमासीनेन श्रीरामकृष्णेन स्तोकं स्तोकं दृष्टिपातपूर्वकं परिदृष्टः। विस्मयविमढ़चेतसा समुपविष्टं तमवलोक्य रामलालमाभाष्य श्रीरामकृष्णः वाचमवोचत्—"पश्य, अस्य तावत् किञ्चिद् वयस आधिक्यम्; अतोऽसौ स्वल्पतया गम्भीरः। एतावन्तमानन्दं कुर्वन्त्येते, असौ तु तूष्णीमेवास्त" इति। सप्तविंशतिवार्षिकस्तदानीं माष्टारः।

अथ कथाप्रसङ्गेन परमभक्तहनुमद्विषयिणी वार्ता प्रस्तुताऽभूत्। स्वकीयकक्षप्राचीरसमवस्थितं पटाङ्कितं हनुमन्तमालक्षयन्नाभाषत श्रीरामकृष्णः—"दृश्यतां तावत्, कीदृशः खलु महान् भावस्तत्रभवतो हनुमतः। धनं वा मानं वा दैहिकं सुखमपि वा अनिच्छताऽमुना केवलं प्रार्थ्यते भगवानेव। यदासौ स्फटिकस्तम्भात् ब्रह्मास्त्रमादाय पलायते स्म, तदा तं विविधैरनेकैः फलैर्मन्दोदरी प्रलोभितवती; साऽचिन्तयत्—फललोभाद् यद्यवतीर्य तदस्त्रं निक्षिपेत्। हनुमांस्तु प्रलोभनपात्रं नासीत्। उवाचासौ—

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(सङ्गीतम्)

"मम फलविरहः किं वर्तते विश्वमध्ये ?
यदिह फलममोघं जन्मसाफल्यहेतुः ।
दशरथतनयं तं मोक्षकल्पद्रुमं भोः
हृदयसरसिजान्तर्लब्धवान् पुण्ययोगात् ॥
श्रीरामकल्पद्रुमपाददेशे सदोपविष्टः सततं लभेय ।
यदीप्सितं तत् फलमेव दिव्यं नाहं फलार्थी शृणु भामिनि त्वम् ॥

गच्छाम्यहं रे ! विदधत् प्रतीपम्
युष्माकमस्मिन् दुरितानुरूपम् ॥"

गीतमिदमेव कृतवानास्त श्रीरामकृष्णः। पुनस्तस्य स समाधिरभूत्। भूयोऽपि निस्पन्दं कलेवरं, स्तिमिते च लोचने, स्थिरश्च देहः। यथैव प्रतिकृतिः पटेषु दृश्यते तथैवाभूत् समुपविष्टस्तदानीं तत्रभवान् श्रीरामकृष्णः। बहुधैव हास्यपरिहासादिभिः सानन्दं कलरवं कुर्वन्तोऽपि भक्ताः सपदि तस्मिन्नेकत्र निबद्धदृष्टयः श्रीरामकृष्णस्य तथाविधामवस्थामवलोकयन्तः स्थितवन्तः। द्विर्दर्शनमेतत् माष्टारेण कृतं समाध्यवस्थायाः। अथ व्यतीतेषु बहुषु क्षणेषु तस्याः समाध्यवस्थायाः परिवर्तनमारब्धम्। तथा हि देहः शिथिलो जातः, सस्मितञ्चाननम्, स्वविषयप्रवृत्तानि चाभवन् इन्द्रियाणि। चक्षुषोः कोणत आनन्दाश्रूणि वर्षन् राम रामेति व्याहृतवांस्तत्रभवान् श्रीरामकृष्णः।

अथ मनसि व्यचिन्तयन्माष्टारः—अहो, किमेष एव महात्मा युवभिर्भक्तैः सह नर्मालापादिक कृतवानासीत् ? तदैव स पुनः यथा पञ्चमे वयसि वर्तमानो बालकः !

ततः क्रमेण प्रकृतिमापन्नः श्रीरामकृष्णः साधारण इव जनः पूर्ववदेव व्यवहरन् माष्टारं नरेन्द्रञ्च सम्बोध्य आभाषत—"युवां हि तावद् इंराजी-भाषामाश्रित्य कथयन्तौ विचारयताम्, शृणोम्यहं तत् सर्वमि"ति।

इति निशम्य तावुभौ हसन्तौ परस्परं किमपि तावदालपितवन्तौ, अपि तु वङ्गभाषयैव। न हि पुनः सम्भवति श्रीरामकृष्णस्य पुरतो माष्टारस्य विचारः। श्रीरामकृष्णस्य कृपयैव हि वद्धार्गलमिवोपाजायत तस्य विचार-गृहम्। तत् कथङ्कारं विचारस्तेन क्रियेत वा ? पुनरपि निर्वन्धातिशये समावेदितेऽपि श्रीरामकृष्णेन इंराजीभाषामयस्तर्कः न प्रावर्तत।

अथापराह्णे पञ्चघटिकातिक्रमे स्वं स्वमावासं प्रातिष्ठन्त भक्ताः। माष्टारो नरेन्द्रश्च पुनस्तत्रैव स्थितौ। भृङ्गारमादाय नरेन्द्रः मुखप्रक्षालनार्थं

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हंसपुष्करिणीं प्रति 'झाउ' इति तरोस्तलाभिमुखं गतः। देवतायतनाभ्यन्तर एव माष्टार इतस्ततः पादचारमचरत्। कियत्क्षणानन्तरं कोष्ठिकापार्श्व-देशेन हंसपुष्करिणीं प्रत्येव चलितवानसौ। ततो गच्छन् स पुष्करिण्या दक्षिणतीरभागिसोपानचत्वरे दण्डायमानं श्रीरामकृष्णमपश्यत्। भृङ्गारहस्तो नरेन्द्रोऽपि प्रक्षालितमुखो दण्डायमानोऽतिष्ठत्। एवमुक्तं तदानीं श्रीरामकृष्णेन—"श्रूयतां भोः, बाहुल्येनात्र आगम्यताम्; इतस्ते प्रथमसमागमः खलु। प्रथमपरिचयानन्तरं नवास्वादहेतोः सर्वैरेव भृशमागम्यते नाम, नवीनैरिव पतिभिः। (नरेन्द्र माष्टारयोर्हास्यम्) अपि त्वं भृशमागमिष्यसि?" नरेन्द्रः किल ब्राह्मसमाजभुक्तः। असौ हसन्नाह—"बाढ़म्, यतिष्येऽहम्।"

अथ कोष्ठिकापार्श्ववर्तिना वर्त्मना श्रीरामकृष्णगृहं समागच्छत्सु सर्वेषु कोष्ठिकासन्निहितं माष्टारमवोचत् श्रीरामकृष्णः—"श्रूयतां भोः, हट्टेषु गाः क्रेतुं गच्छन्ति नाम कृषीबलाः। गवामुत्कर्षापकर्षादिकं सुष्ठु विदन्ति पुनस्ते। पुच्छे प्रदत्ते हस्ते यो गौः शेते, न तथाविधं गां ते क्रीण्वन्ति। यस्तु पुनः पुच्छे हस्तार्पणमात्रमेव सातिशयं चाञ्चल्यं प्रदर्शयन् उत्प्लवते तथाविध एव गौ रोचते तेभ्यः। तादृशानामेव गवां साधर्म्यमावहति नरेन्द्रः। अस्य तावदन्तर्वर्तते सुमहत्तेजः।" इत्युक्त्वा हसन्नतिष्ठत् श्रीरामकृष्णः। उक्तं पुनः—"केचन भूयः सिक्तचिपिटककल्पाः, नास्ति तेषां दार्ढ्यम्, न वा वर्तते सामर्थ्यञ्च, केवलं तु रिक्तं वचः सम्बलं तेषाम्।"

अथ सन्ध्या समागता। श्रीरामकृष्णः ईश्वरं चिन्तयन्नास्त। तदनन्तरं माष्टारमभ्यधात्—"नरेन्द्रेण सह आलप्यताम्, कीदृशः खल्वसौ युवेति मह्यं विज्ञापयेः।"

आरात्रिकमवसितम्। माष्टारो बहुक्षणात् परं चत्वरस्य पश्चिमभागे नरेन्द्रमालोकयत्। परस्परालापः प्रसरति स्म। "साधारणब्राह्मसमाजीयोऽहं, महाविद्यालये अध्ययनरतोऽहमि"त्यादिकमुक्तवान् नरेन्द्रः।

रात्रिः समायाता। ततो गमनानुमतिर्ग्रहीतव्या माष्टारेण। तथापि गमनावसरो नैव लब्धस्तेन। तत एव नरेन्द्रसान्निध्याद् विनिष्क्रान्तोऽसौ श्रीरामकृष्णमनुसन्धत्ते स्म। आदौ श्रीरामकृष्णकृतसङ्गीतश्रवणेन तस्य हृदयं तथा मनो विमुग्धं सञ्जातम्। पुनस्तच्छ्रीमुखतो गीतश्रवणं कुर्यामिति माष्टारस्याभिलाष आसीत्। अथान्वेषणक्रमेण जनन्याः कालिकाया मन्दिराग्रतो नाटमन्दिरे एकाकी पादचारं चरन् श्रीरामकृष्णो दृष्टस्तेन। मातृमन्दिरे मातरमुभयत आलोकः प्रज्वलन्नासीत्। बृहति नाटमन्दिरेऽपि कश्चिदालोको ज्वलति स्म; क्षीण एवासीदसौ। आलोकान्धकारयोर्मिश्रणेन यद्रूपं स्यात्तथैव नाटमन्दिरमदृश्यत।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीरामकृष्णकृतं सङ्गीतमाकर्ण्य माष्टारो विस्मृतात्मा संवृत्तः। मन्त्रमुग्धो भुजङ्ग इवासौ अभूत्। अतस्तदा ससंभ्रमं श्रीरामकृष्णमपृच्छत्—"अपि पुनः सङ्गीतमद्य भविष्यति?" विचिन्त्य प्रत्यवादीत् श्रीरामकृष्णः—"न हि, न पुनरद्य सङ्गीतं सम्पत्स्यते।" इत्येवमुदीरयता तेन किमपि स्मृतमासीत्; सपद्येवोक्तवान्—"तद् एकमेव कर्म क्रियताम्। कलिकातायां बलरामस्यावासमहं गमिष्यामि। त्वमपि गच्छेः, तत्रैव सङ्गीतं भविष्यति।"

माष्टारः—यथाज्ञापयति देवः।

श्रीरामकृष्णः—अपि ज्ञायते त्वया बलरामवसुनामा?

माष्टारः—नैव महात्मन्।

श्रीरामकृष्णः—बलरामवसुर्नाम। वसुपल्ल्यां तस्यावासः।

माष्टारः—अस्तु देव, पृच्छापूर्वकं लोकतो ज्ञास्ये।

श्रीरामकृष्णः (माष्टारेण सह नाटमन्दिरे भ्रमन्)—भवतु, किञ्चित् त्वां पृच्छामि। किंविधो मन्येऽहं त्वया?

माष्टारस्तदा तूष्णीमास्त। श्रीरामकृष्णेन पुनरुक्तम्—"किं ते प्रतिभाति? कियन्नाम ज्ञानं मे सम्पन्नम्?"

माष्टारः—'कियदिति नैव बोद्धुं शक्नोमि। परमेतादृशं ज्ञानं वा प्रेम वा ईदृशीं भक्तिं वा ईदृशं विश्वासं वा वैराग्यं वा उदारभावं वा न जातु क्वापि चाहं दृष्टवान्।

श्रीरामकृष्णः स्मयमान आस्त।

एवमालापनात् परं माष्टारः प्रणामं विधाय श्रीरामकृष्णमापृच्छत। यावदसौ प्रधानगोपुरमागतस्तावदेव किं पुनस्तन्मनसि समुदितम्; सममेव प्रत्यावृत्तः। पुनर्नाटमन्दिरे स श्रीरामकृष्णसमीपमागतः। श्रीरामकृष्णः तस्मिन्नेव क्षीणालोके एक एव पादचारं चरन्नासीत्। एकाकी—निःसंगश्चासौ। अरण्यमध्ये पशुराजवत् सात्ममना एकलो विचरति स्म। आत्मारामः; एकलावस्थानमेकलभ्रमणञ्चाहो सिंहाय रोचेते! अनपेक्षः!

विस्मयविमूढ़चेता माष्टारः पुनस्तमेव महापुरुषं पश्यन्नास्त।

श्रीरामकृष्णः—(माष्टारं प्रति)—अरे, कथं पुनः प्रत्यावृत्तोऽसि?

माष्टारः—देव, मन्ये तावद् धनिजनस्य भवनम्—प्रवेशानुमतिर्दीयेत न वा। अतो यास्यामि न वेति तर्कयामि। अत्रैव समागम्य भवद्दर्शनं करिष्यामि।

श्रीरामकृष्णः—न हि, भोः, किमिति तत्? त्वया मदीयं नाम वक्तव्यम्। तत्सकाशं गन्तव्यं मयेति कथनीयम्। तथा सति यः कश्चिन्मां प्रापयिष्यति।

यथाज्ञेति उक्त्वा माष्टारः पुनरपि कृतप्रणामो विरगात्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

२

भक्तमण्डले श्रीरामकृष्णः

११ मार्च्, १८८२ खृः

समयस्तु रात्रेः ८-९-घटिका। दोलयात्रोत्सवः। [राम-मनोमोहन-राखाल-नित्यगोपालप्रमुखैः भक्तैः श्रीरामकृष्णः परिवृतः। सर्व एव हरिनाम संकीर्तयन्तो मत्ता जाताः। केषाञ्चिद् भक्तानामाविर्भूता भावावस्था। भावावस्थायां रक्तिमानमापन्नं नित्यगोपालस्य वक्षःस्थलम्। उपविष्टेषु सर्वेषु माष्टारः श्रीरामकृष्णं प्राणमत्। अपश्यच्च—राखालः शयानः अस्ति—भावाविष्टो बाह्यज्ञानशून्यश्च; श्रीरामकृष्णः तस्य वक्षसि हस्तं संस्थाप्य 'शान्तो भव, शान्तो भव' इति व्याहरतीति। इयमेव हि प्रथमा भावावस्था राखालस्य। स कलिकातास्थे पित्रालये निवसति, अन्तराऽन्तरा श्रीरामकृष्णं द्रष्टुमागच्छति। अस्मिन् काले श्यामपुकुरस्थिते विद्यासागरमहोदयप्रतिष्ठापिते विद्यालये स कति दिनानि पठितवान्।

श्रीरामकृष्णो दक्षिणेश्वरे माष्टारमभाषत—"अहं कलिकातायां बलरामस्यालयं यास्यामि, एहि त्वमपि।" अतः खलु स तं द्रष्टुमायातः। फाल्गुनमासस्य शुक्लपक्षः; १८८२ खृष्टाब्दः, ११ मार्च्, शनिवासरः। श्रीयुवतो बलरामो श्रीरामकृष्णं निमन्त्रणपूर्वकमानीतवान्।

अथालिन्दे समासीना भक्ताः प्रसादं गृह्णाना आसन्। दास इव बलरामो दण्डायमानोऽतिष्ठत्; स एव गृहस्यास्य कर्तेति दर्शनेन न बोधो जायते।

नवागतः खलु माष्टारः। नैतावताऽपि कालेन भक्तैः सहालापः सम्पन्नः। केवलं दक्षिणेश्वरे नरेन्द्रेणालापोऽभवत्।

अथ व्यतीतेषु दिवसेषु दक्षिणेश्वरे श्रीरामकृष्णः कस्यचित् शिवमन्दिरस्य सोपानोपरि भावाविष्टः समुपविशन्नासीत्। कालस्तावद् अपराह्णीया ४-५-घटिका भवेत्। माष्टारस्तत्सन्निधौ समुपविष्ट आसीत्। स्वगृहभूम्यां शय्या सुविन्यस्ताऽसीत्।

कियत्क्षणपूर्वं श्रीरामकृष्णस्तस्यां विश्राम्यन्नास्त। तदानीमपि श्रीरामकृष्णसेवार्थं न हि कश्चिदपि समवर्तत तत्समीपे। हृदयस्य गमनादारभ्य श्रीरामकृष्णस्य क्लेश एव भवति। कलिकातातः समागते माष्टारे

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तेनैव सार्धं कथाः कथयन् श्रीरामकृष्णः श्रीश्रीराधाकान्तमन्दिरसम्मुखस्थस्य शिवमन्दिरस्य सोपानमासाद्य तत्रोपविष्टः। परं तु मन्दिरावलोकनमात्रमेव अकस्माद् भावाविष्टः संवृत्तः।

जगन्मात्रा सह वाचमाभाषमाणः श्रीरामकृष्ण आह—"मातः, मदीया घटिका यथार्थमेव प्रचलतीति सर्वे तावद् वदन्ति। खृष्टीया ब्राह्मसमाजीया हिन्दवो मुसलमाना वा—अस्माकं धर्मो यथार्थ इति सर्व एव निगदन्ति। अपि तु जननि, न कस्यापि घटिका तावत् प्रकृतमेव प्रसर्पति। को नाम त्वामिह परमार्थतो बोद्धुं शक्नुयात्? परन्तु व्याकुलतया प्रार्थ्यसे चेत्तर्हि त्वत्कृपया प्रार्थ्यमाना सर्वैरेव पथिभिस्त्वं खलु प्राप्तव्या। अम्ब, खृष्टीयास्तेषामुपासनामन्दिरे कथं त्वां प्रार्थयन्तीति वारमेकं मे प्रदर्शय। किन्तु मातः, यद्यहं तदुपासनामन्दिरान्तर्गच्छामि, तर्हि किं वाऽभिलपिष्यन्ति लोकाः? अपि नाम संघटेत कश्चिदुपरोधः? ननु कालिकायतनप्रवेशनाद् निवारितोऽहं स्यामिति चेत्, तर्हि गिर्जाद्वारप्रान्ततः प्रदर्शयेति।

अथान्येद्युः श्रीरामकृष्णः स्वकीयकक्षायां क्षुद्रायाः खट्वाया उपरि उपविष्टोऽभूत्। आनन्दमयमूर्तिरसौ—हास्यवदनः। श्रीयुक्तकालीकृष्णेन सहागत्य माष्टारः समुपस्थितः। स्वबन्धुना कुत्र नीयत इत्यविदितः खलु कालीकृष्ण आसीत्। सोऽभिहितस्तावद् बन्धुना—त्वं शौण्डिकालयं जिगमिषुश्चेन्मया सार्धमागम्यताम्। विद्यते हि तत्र उदंजनपरिमाणं मद्यमिति। माष्टारस्तत्र समागम्य बन्धवे यदुक्तवान् प्रणामानन्तरं तत् सर्वं श्रीरामकृष्णाय न्यवेदयत्। तदाकर्ण्य सोऽपि हसितुमारभत।

अथाब्रवीत् श्रीरामकृष्णः—"भजनानन्दस्तथा ब्रह्मानन्दश्च—एष एव आनन्दः सुरा, प्रेमसुरेयं नाम। मानवजीवनस्योद्देश्यं तावदीश्वरं प्रति प्रेम, तस्मिन्ननुरागः। भक्तिरेव सारभूता। ज्ञानविचारपूर्वकमीश्वरज्ञानं सुकठिनम्। इत्येवमुक्त्वा श्रीरामकृष्णो गातुं प्रवृत्तः—

"काली सा किंस्वरूपा तद् हि जगति को वेत्ति तावद् यथार्थम्?
तत्तत् षड्दर्शनं वा यदिह न लभते दर्शनं नाम यस्याः।
मूलाधारे च दिव्ये शिरसि शतदले योगिनः सन्ति मग्नाः।
काली हंसीस्वरूपा कमलदलवने सङ्गता हंसकेन॥

आत्मारामस्य काली चिदतिपरारुचिस्तावदात्मैव नान्या;
नूनं तस्य प्रमाणं प्रणवविलसितं धत्ते तत्त्वप्रकर्षात्।
कृत्स्नं व्याप्य स्थिता सा विलसति परमा स्वेच्छयेच्छामयीह
तस्यास्तत्त्वं व्यजानदिह परमधिया तन्महाकाल एकः॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तर्तुं सन्तरणैरिहोद्यमयुतो रामप्रसादः पुनः
सिन्धुं तैरुपहस्यते खलु जनैर्विश्वासशून्यैरहो।
चित्तं वेत्ति तथा विदन्ति च मम प्राणाश्च भक्तेर्बलात्
सिद्धिः स्यादिव वामनस्य च शशिप्राप्तिः प्रसादस्य हि॥"

पुनरप्याह श्रीरामकृष्णः--इदमेव हि जीवनैकलक्ष्यं यत् परमेश्वरे प्रेम। वृन्दावने गोपाः गोप्यो गोपालाश्च श्रीकृष्णे प्रीतिमादधत। मथुरां समागते श्रीकृष्णे गोपालास्तद्विरहात् क्रन्दनसारा अभ्रमन्। इत्यभिधाय श्रीरामकृष्णः ऊर्ध्वदृष्टिः सन् संगीतं कुर्वन्नास्त--

"अभिनवमिह कञ्चिद् धेनुपालप्रकीर्णम्
धृतनवतरुशाखं दृष्टवान् गोपबालम्।
क्व नु विलससि बन्धो 'कानु'संज्ञ, प्रसीद !
इति बहु कथयन्तं धेनुवत्सान्विताङ्कम्॥
अथ बहिरनुपेतं तं निरीक्ष्य पुनर्हा
कथमिह ननु बन्धो, दर्शनं दीयते न ?
इति करुणमवादीत् कुत्र वा स्थीयते रे ?
नयनसलिलधारामावहन् प्रेमभावात्॥"

श्रीरामकृष्णस्य प्रेममयं सङ्गीतमाकर्णयतो माष्टारस्य प्रादुरभूत् नयनयोरश्रु।

९ एप्रिल्, १८८२ खृः

अद्य श्रीरामकृष्णः कलिकातायां शुभागमनं कृतवान्। श्रीयुक्त-प्राणकृष्ण-मुखोपाध्यायस्य श्यामपुकुरस्थायां वाटयां द्वितलस्थिते संलापप्रकोष्ठे भक्तैः साकमुपाविशत्। तदानीमेव सभक्त आसीनोऽन्नप्रसादं प्राप्तवान्। अद्य एप्रिल्मासस्य नवमो दिवसः, रविवासरः, १८८२ खृष्टाब्दः, २१-चैत्रः, १२८८-वङ्गाब्दः, चैत्रः, शुक्ला चतुर्दशी। तदा १।२-घटिकावादनवेलासीत्।

काप्तेनस्तस्यामेव पल्ल्यां निवसति। एतस्मिन् वासभवने विश्रामग्रहणात् परं काप्तेनस्यापि वाटयां गमनपूर्वकं तमवलोक्य कमलकुटीराभिधाने वासभवने श्रीयुक्तकेशवसेनं संद्रष्टुं गमिष्यामीति श्रीरामकृष्णस्य वासनासीत्। स प्राणकृष्णस्य संलापप्रकोष्ठे आसीनोऽभूत्। राम-मनोमोहन-केदार-सुरेन्द्र-सुरेन्द्रभ्रातृगिरीन्द्र-राखाल-बलराम-माष्टारप्रभृतयो भक्ता उपस्थिताः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तत्पल्लीनिवासिनो भद्रमुखाश्चान्येऽपि निमन्त्रिता जनाः, श्रीरामकृष्णः किं कथयिष्यतीति श्रोतुमुत्सका आसन्।

श्रीरामकृष्णः—ईश्वरस्तदैश्वर्यं च तत्त्वद्वयम्। जगदेवेदं तस्यैश्वर्यम्।

सर्वे तु ऐश्वर्यं दृष्ट्वा विमुग्धा भवन्ति, यस्य तावदैश्वर्यं तं नान्विष्यन्ति। कामिनीकाञ्चनभोगार्थं सर्व एवाभिगच्छन्ति। एतेन तु दुःखमशान्तिश्च बहुतरं जायेते। संसारो नाम विशालाक्ष्या ह्रद इव; नौका चेत्तस्मिन् ह्रदे सकृत् पतेत्तर्हि रक्षा नास्ति। शृगालकोलिकण्टकवच्चायम्—एकस्मिन् कण्टके मुञ्चति अपरं तावदाविध्येत्। विभ्रमगोलकमेकदा प्रविशतो जनस्य निष्क्रमणं दुष्करम्। जीवोऽग्निदग्धवद् भवति।

कश्चिद् भक्तः—को नाम साम्प्रतमुपायः?

श्रीरामकृष्णः—उपायस्तावत्—साधुसङ्गः प्रार्थना च। ननु वैद्यसमीपमगच्छतो रोगोपशमो न स्यात्। सकृत् साधुसंगो न किमप्यावहेत्—सर्वदैव प्रयोजनम्—रोगो नित्यमेव यतः स्थितः। विना च वैद्यसन्निधौ अवस्थानं नाड़ीविज्ञानं न स्यात्; तेन सह गमनमावश्यकम्। तेनैव सह चरणेन का नाम कफनाड़ी, का वा पित्तनाड़ीति विज्ञायेत।

भक्तः—साधुसंगेन को नामोपकारो भवेत्?

श्रीरामकृष्णः—ईश्वरे अनुरागो जायते। प्रेम च तस्मिन् विलसति। विना व्याकुलतां न किमपि सिध्यति। भृशं साधुसंसर्गमातिष्ठतः प्राणा ईश्वरार्थं व्याकुलीभवन्ति। यथा—कस्यचन रोगसद्भावे सदैव कथं नाम रोगी निरामयः स्यादिति भावनया मनो व्याकुलं भवति। पुनर्यदि कस्यचित् कर्मविच्युतिः स्यात्तर्हि स विभिन्नेषु कार्यालयेषु व्याकुलः सन् परिभ्रमति तद्वत्। यदि वा कस्मिंश्चित् कार्यालये न किमपि कर्मपदं शून्यं वर्तते इत्युच्यते तर्हि परेद्यवि पुनस्तत्रागत्यापि पृच्छति—किमपि कर्मपदं नु शून्यं जातमिति।

"उपायान्तरमपि अस्ति—व्याकुलीभूय प्रार्थना कार्या। स्वकीयो हि परिजनः खलु स भगवानिति, वक्तव्यं पुनस्तमुद्दिश्य—कीदृशः खल्वसि त्वम्? देहि मे दर्शनम्। तेन अवश्यमेव दर्शनं देयम्। अन्यथा कथं त्वं मां सृष्टवानसीति। शिखमतावलम्बिनः केचिदाहुः—'ईश्वरो दयामयो नामे'ति। तानहमुक्तवान्—'कथं तं दयामय इति कथयामि? असावस्मान् सृष्टवान्; मङ्गलं येनास्माकं स्यादीश्वरश्चेत् तदेव करोति, तत् किं चित्रं नाम? पितरावपत्यानि पालयेतामिति पुनः का नाम दया? तत्तु अवश्यमेव कर्तव्यम्। अतोऽसौ स्वाधिकारत एव प्रार्थनीयः। स्वाधिकारो ह्यस्माकं पिता च माता च। पुत्रश्चेदाहारं त्यजेत् तर्हि पितरौ तावत् त्रिभ्यो वत्सरेभ्यः प्रागेव तदीयं

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh
M. S. T. Sharma

भागं तस्मै निक्षिपतः। पुर्नयदा पुत्रकः पणं याचमानोऽसकृदाकलयति—'मातः, अयमहं चरणयोस्ते निपतितः, देहि मे पणद्वयमिति तदा माता किञ्चिद् रुष्टेव तद्व्याकुलतामवेक्ष्य तस्मै तन्निक्षिपति।'

"अन्योऽपि कश्चिदुपकारः प्रभवति साधुसङ्गात्। स हि सदसद्विचारो नाम। सदिति नित्यं वस्तु, ईश्वर इति यावत्। असत्—अर्थादनित्यम्। असत्पथेन चलिते मनसि विचारः कर्तव्यः। तथा हि अन्येषां कदलीतरुमाहर्तुमायच्छमाने करं करिणि हस्तिपकस्ताड़यत्येनमङ्कुशेन।

प्रतिवेशी—महाभाग, कथं जायते पापबुद्धिः ?

श्रीरामकृष्णः—तस्य भगवतः प्रपञ्चे विद्यन्ते नाम सर्व एव प्रकाराः। तथा हि स साधुजनमपि सृष्टवान्, पुनर्दुष्टजनमपि। स एव सद्बुद्धिं ददाति, पुनरसद्बुद्धिमपि।

प्रतिवेशी—नन्वेवं चेत्तर्हि पापानुष्ठानेऽपि किं नास्त्यस्माकं कापि धूः ?

श्रीरामकृष्णः—कृतस्य पापस्य फलमवश्यमेव भोक्तव्यमिति परमेश्वरस्य नियमो वर्तते। ननु भक्षिते मरिचफले तस्य विदाहित्वं कथं नानुभूयते ? भद्रमुखो मथुरानाथः यदा प्राप्तवयस्क आसीत्, तदा नानाविधमेव अत्याचरत्। अतो मरणदशायां विविधाः खलु रोगास्तस्य समुपजाताः। स्वल्पे वयसि एतावन्नानुभूयते। तथा हि कालिकायतने भोगरन्धनार्थं समानीयन्ते बहव एव सुन्दरीति काष्ठविशेषाः। आर्द्राणि काष्ठानि प्रथमतः सुष्ठु ज्वलन्ति, न हि प्रज्वलतां तेषामन्तःस्थितो रसोऽवगम्येत। अथ ज्वलनेन शेषं गतेषु काष्ठेषु तदन्तःस्थितानि सर्वाण्येव पयांसि पश्चाद्भागेन बहिर्निःसृतानि चुल्लीस्थवह्निं निर्वापयन्ति। तत एव कामक्रोधलोभादिभ्यः सावधानैर्भवितव्यं नरैः। पश्य तावत्—हनुमान् क्रोधमास्थाय लङ्कां ददाह, ततोऽशोकवने सीता तिष्ठत्येवेति तस्य स्मरणमभूत्। तदा सीतायाः किञ्चिदनिष्टं स्यादिति भावनया अस्थिरतां गतः।

प्रतिवेशी—कथं तर्हि दुर्जनमीश्वरः सृष्टवान् ?

श्रीरामकृष्णः—तत्र तस्येच्छा, लीलैव च। विद्या चाविद्या च तन्मायायामवतिष्ठेते। अन्धकारेणापि प्रयोजनमस्त्येव ; अन्धकारसद्भावे आलोकस्य महिमा प्रकाशतेतराम्। काम-क्रोध-लोभा मन्दवस्तूनीति अभ्युपगम्यते खलु, तर्हि कथं तानीश्वरो जनेभ्यः प्रदत्तवान् ? महतो जनान् निर्मास्यतीति ते प्रदत्ता आसन्। इन्द्रियजयादेव लोको महान् भवति। जितेन्द्रियो जनः किं न कर्तुं प्रभवति ? ईश्वरकृपया तं लब्धुं क्षमः। पुनरन्यतः पश्य—कामात् तस्य सृष्टिलीला चलत्येवेति।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"दुष्टलोकेनापि प्रयोजनं विद्यते। भूस्वामिन एकस्य कस्यचिद् भूखण्डस्य प्रजाः निरतिशयं दुर्दान्ततामापन्ना बभूवुः। तदा गोलोकचतुर्धुरिनामा कर्माधिकारी तत्र प्रेषित आसीत्। तन्नामश्रवणात् प्रजाः कम्पितुमारभन्त—ईदृशमहो कठोरमासीत्तस्य शासनम्! अतः सर्वैरेव प्रयोजनं वर्तते। कदाचित् सीतोवाच रामम्—'आर्यपुत्र, अयोध्यायां सर्वाण्येव भवनानि अट्टालिका भवेयुश्चेत्तर्हि एतत् शोभनं स्यात्। अनेकान्येव गृहाणि भग्नानि पुरातनानि चेति पश्यामी'ति। रामो बभाषे—'सीते, यदि नाम सर्वाण्येव भवनानि मनोहराणि स्युस्तर्हि स्थपतयः किं करिष्यन्ति?' (सर्वेषां हास्यम्)। ईश्वरः सर्वप्रकारानेव पदार्थान् सृष्टवान्—उत्तमवृक्षान् विषवृक्षांश्च, पुनः कक्षानपि कृतवान्। विद्यन्ते जन्तुष्वपि उत्तमा अधमाश्च—तथा हि, व्याघ्राः सिंहास्तथा भुजङ्गाश्चापि—निखिलास्तु।"

प्रतिवेशी—महात्मन्, अपि संसारमधितिष्ठता जनेन भगवान् लब्धव्यो नाम?

श्रीरामकृष्णः—अवश्यमेव लभ्यते। परम्, यदहमुक्तवान्—साधुसङ्गः; सदा प्रार्थना च कर्तव्या इति। भगवत्समीपे क्रन्दनमावश्यकम्। मनसो मालिन्येषु प्रक्षाल्यमानेषु तद्दर्शनं भवति। मनस्तावल्लौहमयी मृत्तिकालिप्ता सूचिरिव—ईश्वरो नाम चुम्बकप्रस्तरः; मृत्तिकायां नापगतायां चुम्बकप्रस्तरेण योगो न भवति। निरन्तरं क्रन्दनेन मनोरूपायाः सूच्या मृत्तिकारूपा मलिनता विधौता स्यात्। सूचेर्मृत्तिका तावत् कामक्रोधलोभाः, पापबुद्धिर्विषयबुद्धिश्च। मृत्तिकायां विधौतायां चुम्बकप्रस्तरः सूचिमाकर्षेत्, अस्यार्थस्तावत् ईश्वरदर्शनं भविष्यति। चित्तशुद्धौ सम्पन्नायामीश्वरलाभो भविता। ज्वरः संवृत्तः, देहे बाहुल्येन रसो विद्यते; तथा सति कुइनिन्नाम्ना भेषजेन किं भवेत्? संसारमातिष्ठतो जनस्य ईश्वरलाभः कथं न स्यात्? असौ तावत् साधुसंसर्गः, भृशं क्रन्दनेन प्रार्थना, तथाऽन्तराऽन्तरा निर्जनवासश्च तत्रावश्यकाः। काञ्चिद् वृतिं विना चरणक्रमपातसन्निहिता वृक्षका हि गोच्छागैर्भक्ष्यन्ते नाम।

प्रतिवेशी—ये नाम संसारे तिष्ठन्ति, तेषामपि तर्हि स्यादेव?

श्रीरामकृष्णः—सर्वेषामेव मुक्तिः खलु भविष्यति। परम्, गुरोरुपदेशानुरूपम् आचरितव्यं नाम। कुटिलं पन्थानमाश्रित्य गम्येत चेत् प्रत्यावर्तनं तु क्लेशकरम्। तथा सति मुक्तिः नितरां चिरायते। नास्मिन् जन्मन्यपि मोक्षो नु वा सम्पद्यते, अथ पुनर्बहूनां जन्मनामन्ते वा मोक्षः स्यात्। ननु जनकादयोऽपि संसारधर्ममाचरितवन्तः। परमेश्वरं मूर्ध्नि विन्यस्य किल ते

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कर्माणि साधयामासुः। नर्तकी यथा भाजनशिरस्का नृत्यति। किं पुनर्न दृष्टाः पश्चिमाञ्चलस्य नार्यः? शिरसि च जलकुम्भः, हसन्त्यश्च तथा कथयन्त्यश्च अभिचलन्ति।

प्रतिवेशी—ननूक्तं भवता गुरोरुपदेश इति। अथ गुरुः कथं लभ्यते?

श्रीरामकृष्णः—न हि यः कोऽपि गुरुर्भवितुमलम्। बृहत्काष्ठं तु स्वयमपि प्लवते, तदुपरि बहवो जीवजन्तवोऽपि आरोहणपूर्वकं गन्तुं क्षमाः। अपि तु अनुत्तमकाष्ठस्योपरि आरोहणात् काष्ठमपि निमज्जति तथा चारोढ़ापि। अत ईश्वरो लोकशिक्षार्थं स्वयमेव गुरुरूपेण सम्भवति। सच्चिदानन्द एव गुरुर्नाम।

"किं नाम ज्ञानम्? को वाहम्? ईश्वर एव कर्ता, अन्यत् सर्वमकर्तृ—एतदेव ज्ञानम्। अहमकर्ता, तस्य हस्तस्थितं यन्त्रमहम्। अतो ब्रवीमि—मातः, त्वमेवासि यन्त्रिणी, अहं तु यन्त्रम्; त्वं खलु गृहकर्त्री, तथाहं गृहम्; रथ एवाहं, ननु सारथिस्त्वम्। यथा चालयसि तथैव प्रचलामि, यथा कारयसि तथैव करोमि, यथा वाचयसि तथैव वच्मि; नाहं नाहं, त्वमेव, त्वमेवासि सर्वथे"ति।

अथ श्रीरामकृष्णः काप्तेनस्यावासमुपेत्य तस्मात् श्रीयुक्तकेशवसेनस्य कमलकुटीराभिधेयं भवनं संप्राप्तः। राम-मनोमोहन-सुरेन्द्र-माष्टार-प्रमुखैरनेकैर्भक्तैः सह समायातस्तत्रभवान्। द्वितलस्थिते बृहत्कक्षे उपविष्टाः सर्वे। श्रीयुक्त-प्रतापमजुमदार-त्रैलोक्यप्रभृतयो ब्राह्मभक्ता अपि तत्र समुपस्थिता आसन्।

श्रीरामकृष्णः श्रीयुक्त-केशवे सुतरां स्नेहमाधत्ते। १८७५-खृष्टाब्दे मावोत्सवादनन्तरं कियद्दिनाभ्यन्तरे बेलघरियाख्यस्थानस्य कस्मिंश्चिदुद्याने शिष्यैः सह साधनभजनादिकमाचरता केशवेनैकदा मिलितवान् तत्रोपनीतः श्रीरामकृष्णः। सहचरः खलु भागिनेयः हृदयराम आसीत्। बेलघरियायास्तस्मिन्नुद्याने किल केशवमहोदयमाह श्रीरामकृष्णः—"अये, पुच्छं खलु ते स्खलितम्। अर्थात् सर्वाणि विहाय संसाराद् बहिरपि स्थातुं शक्नोषि त्वं, पुनस्तथैव संसारेऽपि अवस्थातुमर्हसी"ति। यथैव हि स्खलितपुच्छा भेकशिशवो जले वा स्थले वापि स्थातुमर्हन्ति, तथैव त्वमसीति भावः। एवमन्यत्र क्वचिद् दक्षिणेश्वरे, क्वचिद्वा कमलकुटीरे तथा ब्राह्मसमाजप्रभृतिस्थानेषु च श्रीरामकृष्णः कथाच्छलेन बहुशस्तमुपादिशत्। तद् यथा—विविधैः पथिभिर्विविधैर्धर्मैश्च ईश्वरलाभो भवितुमर्हति। अन्तरा निर्जनवासेन साधनभजनादिकं सम्पाद्य भक्तिं च लब्ध्वा संसारवासः कर्तुं शक्यते। जनकादयो ब्रह्मज्ञानमवाप्य संसार एव आसन्। व्याकुलमनसा सता

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ईश्वरः प्रार्थनीयः। तदैव भगवान् दर्शनं ददाति। अथ युष्माभिर्यदनुष्ठीयते निराकारसाधनमिति, तदप्युत्तममेव। ब्रह्मज्ञानाद् ईश्वर एव सत्यः सर्वमन्यच्चानित्यम्, ब्रह्म सत्यं जगन्मिथ्येति यथार्थतो बुध्येथाः। सनातन-हिन्दुधर्मः साकारनिराकारे द्वे एव तत्त्वे स्वीकरोति। असौ ईश्वरं भजते नानाभावैर्यथा—शान्त-दास्य-सख्य-वात्सल्य-मधुरैः। ननु विविधवाद्यसमारोहकारकाणां कश्चिदेक एव वेणोः सत्स्वपि सप्तसु छिद्रेषु तत्समाश्रितं रागमपरसाधारणमेकं वादयति। अपरश्च सप्तभिश्छिद्रैः नानारागाणामेव उपन्यासं कुरुते। "युष्माभिः साकारो नाङ्गीक्रियत इत्येतावता नैव काचन क्षतिः। पुनस्तु निराकारे निष्ठैव तन्त्रम्। तथापि साकारवादिनां भगवदाकर्षणं तावद् भवद्भिरुपादेयम्। 'मात'रिति सम्बोधनेन भगवति विवर्धेते नाम गरीयाननुरागस्तथा भक्तिप्रकर्षश्च। क्वचित्तु दास्यं, क्वचित् सख्यं, क्वचिद् वात्सल्यं, क्वचिद्वा मधुरभावः। नास्ति तत्र कामनालेशः, केवलं भगवत्येव स्निह्यामीत्यहो रम्यो भावः! एषः अहैतुकी भक्तिरित्यभिधीयते। अर्थो वा मानो वा—किमप्यन्यद् वा मया न प्रार्थ्यते, केवलं तव पादपद्मे मे भक्तिरास्ताम्। वेदेषु पुराणेषु तन्त्रेषु च एकस्य ईश्वरस्यैव कथाः वर्तन्ते, तस्य लीलापि तेषु वर्ण्यते। ज्ञानं भक्तिश्च तत्रोपदिश्येते। संसारे, भोः, दासीवदवस्थातव्यम्। तथा हि दासी प्रभुभवने सर्वाण्येव कर्माणि विदधाति, परन्तु तस्याश्चित्तं स्वदेशस्थावासं प्रति निबद्धं वर्तते। प्रभुपुत्रान् सा पालयति; ममैवायं हरिः, ममैवैष रामः इत्येवं गदति। परं नायं मे पुत्र इति सा विजानात्येव। यूयं निर्जने साधनं कुरुथेति नितराम् साधु; तस्य कृपा भवितैव। ननु राजर्षिर्जनको निर्जने कियदेव साधनं कृतवान्! साधने तु समनुष्ठिते तस्मादेव हि संसारे निर्लिप्तो भवितुमर्हति जनः।

"भवन्तो वक्तृतां प्रपञ्चयन्ति सर्वेषामुपकारार्थम्, किन्तु, ईश्वरमुपलभ्य, तञ्च साक्षात्कृत्य भाषणं प्रदीयते चेत्, तर्हि उपकारः स्यात्। तस्यादेशमलब्ध्वा यदि कश्चन लोकशिक्षां ददाति, तर्हि नोपकारो भवेत्। नूनमीश्वरलाभं विना न वा तस्यादेशो लभ्यते। केषाञ्चन ईश्वरलाभः संवृत्त इत्यस्य लक्षणानि विद्यन्ते। तेषां नाम बालकवत्, जड़वद्, उन्मादवत्, पिशाचवच्च दशा जायते, यथा शुकदेवादयः। चैतन्यदेवः क्वचिद् बालकवत् क्वचिद् वा पुनरुन्मादवच्च नृत्यति स्म। कदा हसति स्म, कदा क्रन्दति स्म, क्वचिद वा नृत्यति स्म, क्वचिद् वा गायति स्म। पुरीधाम्नि यदासीत्, कदा कदा वा जड़समाधौ अतिष्ठत्।"

इत्थमेव विभिन्नेषु स्थानेषु श्रीरामकृष्णः कथाच्छलेन विविधानुपदेशान् श्रीयुक्तकेशवचन्द्राय प्रायच्छत्। बेलघरियाख्यस्थानस्थे उद्याने प्रथम-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सन्दर्शनानन्तरमसौ १८७५-खृष्टाब्दस्य मार्च्मासस्य अष्टाविंशतितमदिवसस्य रविवासरस्य 'मिरार'-नामक-संवादपत्रे लिखितवान्—"कतिपयदिवसेभ्यः पूर्वं बेलघरियेति स्थानस्य उद्याने दक्षिणेश्वरे निवसन्तं परमहंसं रामकृष्णं वयं दृष्टवन्तः। तस्य गाम्भीर्यम्, अन्तर्दृष्टिं बालकस्वभावञ्च वीक्ष्य वयं मुग्धाः सञ्जाताः। शान्तस्वभावः कोमलप्रकृतिश्चासौ। सदैव योगे संतिष्ठत इत्यसौ दर्शकानां प्रतिभाति। हिन्दुधर्मस्य गभीरतमः प्रदेशोऽनुसन्धीयते चेत् कियन्नाम सौन्दर्यं सत्यं साधुत्वञ्च परिलभ्येरन्नित्येवं चिन्तनं चेतःसु नः स्थानमापन्नम्। कथमन्यथा परमहंसतुल्य ईश्वरीयभावभावितात्मा योगिपुरुषः संदृश्यते नाम ?" १८७६-खृष्टाब्दीय-जानुयारीमासस्य माघोत्सवः समायातः; नगरीस्थसाधारणभवने 'ब्राह्मधर्मस्तथास्माभिः किमधिगत'-मितिविषयकं भाषणं प्रादादसौ केशवचन्द्रमहोदयः। तस्मिन्नेव भाषणे हिन्दुधर्ममनोहारित्वकथां बहुधैव प्रपञ्चितवान्।

यथा श्रीरामकृष्णः केशवमहोदये स्निह्यति स्म तथैव केशवोऽपि तत्रभवति श्रीरामकृष्णे भक्तिमाधत्त। प्रायेण प्रतिवर्षं माघोत्सवकाले तथाऽन्येष्ववसरेषु चापि केशवो दक्षिणेश्वरं समागम्य श्रीरामकृष्णं कमलकुटिराभिधेये स्वीयावासे श्रीरामकृष्णं समानीतवान्। क्वचित् पुनः कमलकुटिरस्य एक एव द्वितलस्थ-मुपासनाकक्षं परमान्तरङ्गधिया भक्तिभरेण तत्रभवन्तं समानीय श्रीमत्केशव-महोदय एकान्तत ईश्वरपूजनमानन्दं च कृतवान्।

१८७९-खृष्टाब्दे पुनः भाद्रोत्सवावसरे केशवः श्रीरामकृष्णं निमन्त्रण-पूर्वकं बेलघरियायास्तपोवनं समानीतवान्। सेप्टेम्बरमासस्य पञ्चदशदिवस-स्तदानीम्। पुनरपि सेप्टेम्बरमासस्यैकविंशदिवसे कमलकुटिरोत्सवे तमानिनाय। अस्मिन्नेव काले समाधिमापन्नस्य श्रीरामकृष्णस्य प्रतिकृतिर्यन्त्रयोगात् ब्राह्म-भक्तैः सह गृहीताऽभूत्। तदानीं समाधिस्थः श्रीरामकृष्णो दण्डायमान एव समवतस्थे। हृदयरामस्तं विधृतवान्। अक्टोबरमासस्य द्वाविंशतितमदिवसे महाष्टमी-महानवमीयुक्ते दक्षिणेश्वरं समागम्य तद्दर्शनं कृतवान्।

एतस्मिन्नेव १८७९-खृष्टाब्दस्य अक्टोबरमासस्यैकोनत्रिंशद्दिवसे बुधवासरे 'कोजागरी'पूर्णिमायामेकघटिकावादनवेलायां सभक्तः केशवः भूयोऽपि श्रीरामकृष्णं दिदृक्षुः दक्षिणेश्वरं गतः। तस्य गमनं हि कयाचित् सुसज्जितगृहोपमनावा षड्भिश्च साधारणजलयानैर्द्वाभ्यां च क्षुद्रतरतरणीभ्यां समन्वितेन बाष्पीय-जलयानेन अशीतिप्रायभक्तसनाथेन सम्बभूव। तेषु च पताकाः पुष्पाणि, पल्लवाः करतालिका मृदङ्गा भेर्यश्चासन्। अथ हृदयरामेण—

"सुरधुनीतटे हरिनाम वदन्
क इह सुन्दरः किल समागतः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

किमु प्रेममयः स्वयमत्र पुनः
अयि गौरतनुः समुपेत इह ॥"

इति गायता अभ्यर्थ्य बाष्पीयजलयानाद् आनीतोऽसौ केशवः। ब्राह्मभक्ताः पञ्चवटीतः कीर्तनं कुर्वाणाः तेन सार्धमागन्तुमारब्धवन्तः। तेषां कीर्तनं हि—

"सच्चिदानन्दमूर्तिः रूपानन्दघन" इति।

भक्तानां मध्ये अन्तराऽन्तरा श्रीरामकृष्णः समाधिस्थोऽभूत्। अस्मिन्नेव वासरे सन्ध्यानन्तरं बांधाघाटनामकस्थले पूर्णचन्द्रालोके केशव उपासनामाचरत्।

उपासनान्ते ब्रवीति स्म श्रीरामकृष्णः—अये, 'ब्रह्म ह्यात्मा भगवानि'ति; 'ब्रह्म-माया-जीव-जगदि'ति तथा 'भागवतं भक्तो भगवानि'ति च उदीर्यतां युष्माभिः। केशवादयो ब्राह्मभक्ताः किल भागीरथीतीरे तस्मिन्नेव चन्द्रालोके श्रीरामकृष्णेन सहैव समस्वरं भक्तिभरेण तानेव मन्त्रानुच्चारितवन्तः। अथ पुनरपि 'गुरुः कृष्णो वैष्णव इत्युच्यताम्'इत्युक्तवति श्रीरामकृष्णे केशवः हसन्नवादीत्—"महाशय, अधुना एतावन्न युज्यते। यदि वयं 'गुरुः कृष्णो वैष्णव' इति वदेम, तर्हि एते ब्राह्मा रक्षणशीला इति लोकः समुद्घोषयेत्।" श्रीरामकृष्णोऽपि स्मयमानः प्राचष्ट—"अस्तु, यूयं (ब्राह्माः) हि यावत् शक्नुथ तावदेव वदत।"

अथ कियद्दिनानन्तरं १८७९-खृष्टाब्दे नभेम्बरमासस्य त्रयोदशदिवसे तथा कार्तिकमासस्य अष्टाविंशतितमदिने कालीपूजायाः परं राम-मनोमोहन-गोपालमित्राः दक्षिणेश्वरमासाद्य श्रीरामकृष्णं प्रथममेव दृष्टवन्तः।

अथ १८८०-खृष्टाब्दे एकदा ग्रीष्मकाले राममनोमोहनौ केशवेन सह साक्षात्कारार्थं कमलकुटीरमागतौ। केशवमहोदयः श्रीरामकृष्णं कीदृशं मन्यत इति तयोर्महती जिज्ञासाऽऽसीत्। उक्तं हि ताभ्याम्—"केशव-महोदयः पृष्टः सन् किलाब्रवीत्—'न ह्यसौ साधारणो नाम दक्षिणेश्वरस्य परमहंसः। साम्प्रतं पृथिवीमध्ये नैतादृशो महापुरुषः कश्चिदपरो विद्यते। एतावदेव सुन्दरः, एतावदेव असाधारणोऽयं जनः; सुतरां सावधानतया ससन्तर्पणं चासौ रक्षणीयः; अयत्नेनास्य शरीरं स्थातुं नार्हति; सुन्दरं महार्घं वस्तु यथा काचाधारे रक्षितव्यं नाम।"

इतः कियद्दिनानन्तरम् १८८१-खृष्टाब्दस्य जानुयारी-मासे माघोत्सवकाले केशवः श्रीरामकृष्णं द्रष्टुकामो दक्षिणेश्वरं गतः। तदा च राम-मनोमोहन-जयगोपालसेनप्रमुखा अनेके समुपस्थिता आसन्।

अथ १८०३-शकाब्दस्य श्रावणस्य प्रथमो दिवसः, शुक्रवासरः, १८८१-खष्टाब्दीय-जुलाइ-मासस्य पञ्चदशदिवसः; केशवो भूयोऽपि दक्षिणेश्वरात् श्रीरामकृष्णं बाष्पीयजलयानम् समारोहितवान्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१८८१-खृष्टाब्दे नभेम्बरमासे मनोमोहनस्य वाटिकायां शुभागमनं कुर्वंति श्रीरामकृष्णे तत्रानुष्ठिते महोत्सवे निमन्त्रितः सन् केशवोऽपि समागतोऽभूत्। श्रीयुक्तत्रैलोक्यप्रभृतयः सङ्गीतं कृतवन्तः।

१८८१-खृष्टाब्दस्य डिसेम्बरमासे राजेन्द्रमित्रस्य वाटिकायां निमन्त्रितः सन् श्रीरामकृष्णः गतः। श्रीयुक्तकेशवोऽपि तत्र ययौ। सा वाटिका ठनठनियाख्यपल्ल्यां बेचुराम-चट्टोपाध्यायनामकवर्त्मन्यतिष्ठत्। राम-मनोमोहनयोः मातृस्वसृपतिः किलासीद् राजेन्द्रः। राम-मनोमोहन-ब्राह्मभक्त-राजमोहन-राजेन्द्रा उत्सवसंवादं निवेद्य केशवं निमन्त्रितवन्तः।

केशवाय यदा सा वार्ता निवेदिताऽभूत् तदासौ शोकादशौचव्रतं गृहीतवानासीत्। प्रचारकः केशवभ्राता अघोरो मार्गशीर्षमासस्य चतुर्विंशतिदिवसे डिसेम्बरमासस्य च अष्टमदिवसे गुरुवासरे लक्ष्णौनगर्यां स्वदेहमत्यजत्। सर्वे तावदमन्यन्त—शंकामहे, केशव आगन्तुं न क्षमेत इति। केशवो वार्तां श्रुत्वा बभाषे—किमेतन्नाम? परमहंसमहोदय आगमिष्यति, पुनरहं न यास्यामि! अवश्यमेव यास्यामि। अशौचहेतोरहं पृथक्स्थाने भोक्ष्ये।

परमभक्तिमती मनोमोहनजननी स्वर्गता श्यामासुन्दरी-देवी किल श्रीरामकृष्णं भक्ष्यद्रव्याणि परिवेशितवती। भोजनकाले दण्डायमानश्चासीद् रामाभिधो भद्रमुखः। यस्सिन्नहनि राजेन्द्रस्य वाटिकायां श्रीरामकृष्णः शुभागमनमकार्षीत् तस्यैवापराह्णे सश्रीरामकृष्णः सुरेन्द्रः चीनाबाजारेति पल्ल्यां तत्रभवतो यान्त्रिकप्रतिकृतिं गृहीतवान्। श्रीरामकृष्णस्तदानीं दण्डायमानः समाधिस्थोऽभूत्। उत्सवदिवसे महेन्द्रगोस्वामी श्रीमद्भागवतं पठितवान्।

१८८२-खृष्टाब्दस्य जानुयारी-मासस्य माघोत्सवावसरे सिमुलियाख्यस्थानीयब्राह्मसमाजस्योत्सवोऽभवत्। ज्ञानचतुर्धुरिणो वाटीस्थे प्रासादे प्राङ्गणे चाभूदुपासना तथा कीर्तनमपि। श्रीरामकृष्णस्तथा केशवः तत्र निमन्त्रितौ समुपस्थितावास्ताम्। अत्रैव श्रीरामकृष्णो नरेन्द्रेण गीयमानं सङ्गीतं प्रथमत एव श्रुतवान्, दक्षिणेश्वरगमनार्थमपि तमुक्तवान्।

१८८२-खृष्टाब्दीय-फेब्रुयारीमासस्य त्रयोविंशतितमदिवसे फाल्गुनमासस्य च द्वादशदिवसे गुरुवासरे केशवः सभक्तः श्रीरामकृष्णं पुनर्द्रष्टुकामो दक्षिणेश्वरमागतः। तेन च सह जोसेफ्-कुक्-इत्यभिधेयः आमेरिकादेशीयधर्मयाजकस्तथा कुमारी-पिगट्-इति महिला च काचिदास्ताम्। ब्राह्मभक्ताः केशवचन्द्रश्च श्रीरामकृष्णं बाष्पीयजलयानमारोहितवन्तः। कुक्महोदयः श्रीरामकृष्णस्य समाध्यवस्थां व्यलोकयत्। तस्मिन्नेव जलयाने नरेन्द्रनाथ उपस्थित आसीत्। तन्मुखादेव सर्वं श्रुत्वा माष्टारः दशपञ्चदशदिवसानां मध्ये दक्षिणेश्वरे प्रथममेव श्रीरामकृष्णं दृष्टवान्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इताऽपि मासत्रयानन्तरं एप्रिलमासि श्रीरामकृष्णः केशवं द्रष्टुकामः कमल-कुटीरमागतः। तद् विवरणमेवात्र किञ्चिदस्मिन् प्रदत्तमिति।

अद्य खलु कमलकुटीरे तस्मिन्नेव संलाप-प्रकोष्ठे श्रीरामकृष्णः सभक्त उपविष्टः। १८८२-खृष्टाब्दस्य एप्रिलमासस्य द्वितीयदिवसः; समयस्तावत् पञ्चघटिका। केशवोऽन्तर्भवनस्थ आसीत्। तस्मै वार्ता न्यवेद्यत। स कञ्चकोत्तरीये परिदधानस्तत्रागत्य तं प्राणमत्। तद्भक्तबन्धुः कालीनाथ-वसुर्नाम पीड़ित आसीत्; तं द्रष्टुं गच्छति स्म। इदानीं श्रीरामकृष्णः समायातः, अतस्तस्य बहिर्गमनं सम्भावितं नासीत्। श्रीरामकृष्णः व्याहरति स्म—ननु बहून्येव ते कर्माणि विद्यन्ते। संवादपत्रेष्वपि ते लेखनमस्ति। तत्र दक्षिणेश्वरे गमनावसरस्ते नास्ति। अतोऽहमेव त्वां द्रष्टुं समागतोऽस्मि। तव रोगवृत्तान्तमाकर्ण्य मात्रे शर्करासहितम् आमनारिकेलं प्रतिश्रुतवान्। एवं जगज्जननीमुक्तवान्—मातः, अपि केशवस्य कोऽप्यनिष्टपातः स्यात्तर्हि कलिकातां प्राप्तः केन सार्धं पुनरालापं करिष्यामीति।

श्रीमत्प्रतापादिभिर्ब्राह्मभक्तैर्बहुधा कथाः कथयता श्रीरामकृष्णेन समीपे समुपविष्टं माष्टारमवेक्ष्य केशवचन्द्रस्तावदभिहितः—अये, कथं नामासौ दक्षिणेश्वरं न गच्छतीति प्रष्टव्यः खल्वयम्। न हि मे स्त्रीपुत्रादिष्वाबद्धं चेत इत्येवं तावद् वदति खल्वेषः। माष्टारो मासमात्रमेकं यावन्नवमेव श्रीरामकृष्णगमनादिकं करोति। शेषतस्तस्य कियद्दिनविलम्बहेतोः श्रीराम-कृष्णेन पुनरित्थमुच्यते। आदिष्टोऽसौ श्रीरामकृष्णेन—अपि चेदत्रागमने विलम्बः स्यात् तर्हि पत्रमेकं मह्यं विसृज्यताम्।

अथ श्रीयुक्तसामाध्यायिनं प्रदर्शयद्भिर्ब्राह्मभक्तैरभिहितः श्रीरामकृष्णः—असौ पण्डितः; वेदादिशास्त्राणि सुष्ठु पठितवांश्च। अब्रवीत् श्रीरामकृष्णः—अथ किम्, अस्य चक्षुषैव अस्यान्तर्लक्ष्यते। यथा द्वारस्थकाचावरणगृहाभ्यन्तर-स्थितानि वस्तूनि संदृश्यन्ते।

अथ श्रीयुतत्रैलोक्यमहोदयेन संगीतं गीयमानमभूत्। गीयमाने तावत् संगीते सायन्तन-प्रदीपः प्रज्वालितः, सङ्गीतन्तु प्रावर्तत। तत्रैव सङ्गीतमा-कर्णयन् सहसा दण्डायमानः श्रीरामकृष्णो मातृनाम समुच्चारयन् समाधिमापन्नः। अथ किञ्चिद्व्युत्थानदशामवाप्तः स्वयमेव भृशं नृत्यन् सङ्गीतमारभत—

"मद्यं नैव पिबामि रे, विजयतां कालीतिवादी पुनः
पीयूषं परमं पिबामि सततं चित्तप्रमाथि ध्रुवम्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दिव्योन्मादतां दधाति मनसः प्रोन्मादिनी सा सुधा
मद्यं हा कुरुते पुनस्तु हृदयभ्रंशोद्वहां मत्तताम् ॥

गुड़ं नाम गुरुप्रदत्तमिह भो मूलास्पदं कल्पितं
जातं तत्र गुणोदयोपकरणं चित्तप्रवृत्तिः किल ।
विज्ञानोत्तमशौण्डिकेन रचितं निष्यन्दकर्मादिभिः
मद्यं मातृसुधाढ्यनामपिहितं चेतो मुदा तत् पिबेत् ॥

बीजं यन्त्रमथेदं यन्त्रितमिदं तारेति नामग्रहैः
साक्षात् साधकसत्तमैरतिमुदा शश्वद् विशुद्धीकृतम्
तारा नाम वदन् पिबामि नियतं तन्मद्यमृद्धिप्रदं
सर्वेषां पुरुषार्थसाधनकरं रामप्रसादो वदेत् ॥"

निरतिशयस्नेहमयेन चक्षुषा परमात्मीयमिव केशवं दरीदृश्यमानोऽपि श्रीरामकृष्णः 'स पुनरन्यदीयो वा भवेद् अर्थात् सांसार' इति चिन्तया किञ्चिद् भीतिमिव समापन्नोऽभूत् । तमेवमालोकयता श्रीरामकृष्णेन पुनरारब्धमत्र सङ्गीतम्—

"वाचं वक्तुमितो बिभेमि च पुनर्भीतोऽस्म्यनुक्तौ तथा
रत्नं त्वां विसृजामि वा यदि पुनः सन्देह एष स्थितः ।
विज्ञातं हि तवान्तरं त्वयि पुनस्तच्चिन्तनमेवार्प्यते
तस्मात् साम्प्रतमस्ति ते खलु पुनः प्रत्यर्पितं तन्मनः ॥

येनापत्सु सदा भवामि नितरामुत्तीर्ण आनन्दभाक्
दुःखाब्धौ प्रतरामि जीवनतरीं श्रित्वा च मन्त्रेण भोः
तन्मन्त्रं मम चित्तकल्पकमिह प्रेम्ना प्रदत्तं त्वया
सर्वक्षेमकृते प्रसन्नमनसा भूमास्पदं गृह्यताम् ॥

जानीमो वयमत्र चित्तमधुना मन्त्रं प्रदद्मस्ततः
तन्मन्त्रं मनसादरेण रभसा संगृह्यतां रे त्वया ॥"

"ननु त्यक्तसर्वैषणेन सता प्रार्थ्यतां भगवानेव । स एव पारमार्थिकः. अथान्यत् सर्वमनित्यम् । असति तल्लाभे न किमपि सम्पन्नं नाम, अयमेव महामन्त्रः ।"

अथोपविष्टः श्रीरामकृष्णः भक्तैः सहालपन्नास्त । ततस्तत्रभवतः श्रीरामकृष्णस्य किञ्चिज्जलयोगेन भोजनार्थमुद्योगः प्रावर्तत । प्रशस्तकक्षस्य तस्यैकदेशे 'पियानो' इत्याख्यं वाद्ययन्त्रं वादयति स्म कश्चिद् ब्राह्मभक्तः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीरामकृष्णो हास्यवदनः; तद्यन्त्रमुपेत्य दण्डायमानोऽसौ बालक इव पश्यन्नासीत्। अथ कियत्क्षणात् परमन्तःपुरं नीतः स श्रीरामकृष्णः। तत्र तेन किञ्चिद् भोक्तव्यम्, अन्तःपुरिकाश्च तं प्रणमेयुः।

श्रीरामकृष्णस्य जलयोगः समाप्तिं गतः। ततः शकटारूढः श्रीरामकृष्णः। सर्वे च ब्राह्मभक्ताः शकटसन्निधावेव दण्डायमाना आसन्। कमलकुटीराद् दक्षिणेश्वरमन्दिराभिमुखं शकटं चलति स्म।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

३

विद्यासागरेण साक्षात्कारः

५-आगष्टः, १८८२-खृः

अद्य खलु शनिवासरः। तिथिश्च श्रावणस्य कृष्णा षष्ठी। १८८२-खृष्टाब्दस्य ५-आगष्ट-दिवसः। चतुर्वादनवेला भवेत्।

अथ श्रीरामकृष्णो भृत्या शकटं गृह्णानः कलिकाताया राजपथेन बादुड़-बागानाख्यपल्लीम् अभ्यागच्छति स्म। सहायाश्चासन् भवनाथ-हाजरा-माष्टाराः। विद्यासागरगृहं गन्तव्यमिति।

हुगलीमण्डलान्तर्गत-कामारपुकुरनामा ग्रामः श्रीरामकृष्णस्य जन्मभूमिः। स च ग्रामो विद्यासागरमहोदयस्य जन्मस्थानस्य वीरसिंहग्रामस्य समीपवर्ती। आ बाल्यादेव श्रीरामकृष्णो विद्यासागरमहोदयस्य दयावृत्तान्तमाकर्णयन्नासीत्। दक्षिणश्वरे कालिकायतनमधिवसतापि श्रीरामकृष्णेन तद्दयापाण्डित्ययोः कथा प्रायशः श्रुता। माष्टारो विद्यासागरस्य विद्यालयेऽध्यापयतीति निशम्यासौ तमवादीत्—"विद्यासागरसविधे किं मां नेष्यसि ? मम तावद् बलवती तद्-दर्शनेच्छा वर्तते।" माष्टारस्तथा विद्यासागराय न्यवेदयत्। विद्यासागरः आनन्दितः सन्नेकदा शनैश्चरदिवसे चतुर्वादनवेलायां नूनमेवासौ आनीयतामिति अभ्यधात्। अपि च सकृदुक्तवान् विद्यासागरः—"तत्रभवान् कथम्भूतस्तावत् परमहंसो नाम ? किमसौ काषायं परिधत्ते ?" प्रत्युक्तं माष्टारेण—"नहि, अद्भुतः खल्वसौ पुरुषः, रक्तदशं वसनं परिदधाति, गात्रे निचोलं धारयति, मार्जितां चर्मपादुकां परिधत्ते, निवसति चासौ रासमणेः कालिकायतनस्य कस्यचिद् गृहस्याभ्यन्तरे। तस्य वासकक्षे काचित् खट्वा समुपन्यस्ता, तस्या उपरि शय्यास्तीर्णा, मशारिश्चास्ति। तथाविधां शय्यामधिशेतेऽसौ। नास्ति तस्य किमपि बाह्यलिङ्गं, तथापि ईश्वरादन्यत् किमपि वै न जानाति ; अहर्निशमेव तच्चिन्तनं करोति।"

अथ दक्षिणेश्वरकालिकायतनात् शकटश्चलितः। सेतुमतिक्रम्य मध्येमार्गं श्यामबाजाराख्यस्थानमतीत्य च आम्हार्ष्ट्ष्ट्रीट्-इत्याख्यवर्त्मनि समुपस्थितः। ततः बादुड़बागानाख्यस्थानं निकषाऽसौ समुपेत इति भक्ता वक्तुमपाक्रमन्त। श्रीरामकृष्णो बालकवत् सानन्दं कथाप्रसङ्गं कुर्वन्नगच्छत्। आम्हार्ष्ट्ष्ट्रीटि

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

समुपस्थितः स सहसा भावान्तरं गतः। मन्ये तावत्तस्य तदा ईश्वरावेशोपक्रम आसीत् ।

शकटस्तावद् राममोहनराय-महोदयस्य उद्यानवाटिकासन्निधिमागच्छति स्म। माष्टारः श्रीरामकृष्णस्य भावान्तरं न लक्षितवान्। सहसैवासौ वदति स्म—"इयं तावद् राममोहनरायस्य वाटिका।" श्रीरामकृष्णो विरक्तः सन्नवोचत्—"नाधुना रोचन्ते मे ईदृग्वाचः।" भावाविष्टश्चाभूत् क्रमेण श्रीरामकृष्णः।

अथ विद्यासागरभवनद्वारि समुपस्थितः शकटः। द्वितलमासीद् गृहम्, इंल्याण्डीयरुचिसम्मतम्। भूमेर्मध्यभागे वाटिका, परितश्च प्राचीरम्। पश्चिमभागे गोपुरगृहद्वारम्, द्वारस्य दक्षिणेन गोपुरम्। पश्चिमदिग्भागीय-प्राचीरं द्वितलभवनञ्चान्तरा स्थाने स्थाने कुसुमतरवः शोभन्ते स्म। पश्चिम-प्रान्तीयनिम्नप्रकोष्ठेन सोपानमारुह्य उपर्यारोहणं भवेत्। द्वितलमधिवसति स्म तत्रभवान् विद्यासागरः। सोपानारोहणक्रमेण उत्तरतः एकः प्रकोष्ठः; तस्मात् पूर्वस्यां दिशि वर्तते प्रशस्त एकः कक्षः; कक्षादस्मात् दक्षिणपूर्ववर्तिनि प्रकोष्ठे शेरते विद्यासागर-महोदयाः। दक्षिणत एव वर्तते प्रकोष्ठश्चान्यः। सर्वे चैते कक्षा हि बहुमूल्यैर्ग्रन्थैः परिपूर्णाः। प्राचीरसमीपे स्थितेषु श्रेणीबद्धेषु पुस्तकाधारेषु अतिशोभनं पिनद्धावरणानि तानि। प्रशस्तकक्षस्य पूर्वसीमान्ते एको लेखनाधारः, कति आसन्द्यश्चासन्। विद्यासागरो यदा पाठादिकं करोति, तदा पश्चिमास्यः सन्नुपविशति। ये नाम दर्शनादिकं कर्तुमागच्छन्ति तेऽपि लेखनाधारं परितः आसन्दीषु आसते। लेखनाधारस्योपरि पत्रक-लेखनी-मस्याधार-शोषकपत्रादीनि लेखनसाधनानि, अनेकानि पत्राणि, सावरणसंख्यान-पत्राणि, विद्यासागरप्रणीतानि च द्विचतुराणि पाठ्यपुस्तकानि सन्तीति संदृश्यन्ते। तस्यैव काष्ठासनात् दक्षिणदिग्भागीये कक्षे पर्यङ्को विद्यते। तत्रासौ शेते।

ननु लेखनाधारस्योपरि विन्यस्तेषु लिपिषु के नाम विषया लिखिताः सन्ति? मन्यतां तावत् काचिद् विधवा लिखितवती—"अपोगण्डः शिशुर्मे अनाथः असहायश्च, भवतैव प्रतिपाल्यः" इति। कोऽपि लिखितवान्—"भवान् खर-माताराख्यं स्थानं गतः। तस्माद् वयं नो मासिकवृत्तिं यथाकालं न प्राप्नुम। एतेन महान् क्लेशः संवृत्त" इति। केनचिद् अकिञ्चनेन छात्रेण विज्ञापितम्—"भवद्विद्यालये वेतनं विनैव पठनार्थं लब्धप्रवेशोऽहम्। किन्तु पुस्तक-क्रयसामर्थ्यं मे नास्ति" इति। केनचिद् वा लिखितं—"अशनं विना पीड्यन्ते मे परिजनाः, तन्मदर्थं किंचित् कर्म व्यवस्थाप्यतामि"ति। अपि तत्रभवतो विद्यालयस्य केनचित् शिक्षकेण लिखितं "साम्प्रतं भगिनी मे विधवा सञ्जाता,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तस्या एव भारोऽखिलो मया निरुपायं गृहीतः। न हि वेतनेनानेन मे व्यय-निर्वाहो भवेदि"ति। इंल्याण्डदेशगतेन वा केनचिल्लिखितम्—"अहमत्र विपद्-ग्रस्तः; दीनबन्धुर्भवान्, कियदर्थप्रेषणेन आसन्नविपत्तितो मां त्रायस्वे"ति। अथापरेण वा लिखितम्—"अमुष्मिन् दिवसे विवादनिष्पत्तिर्भविता। तस्मिन्न-हनि भवानत्रागत्य अस्मदीयं विवादं समाधेही"ति।

श्रीरामकृष्णः शकटादवातरत्। पन्थानं प्रदर्शयन् माष्टारस्तं वाटिकामध्यं नयति स्म। अङ्गने पुष्पपादपाः सन्ति, तन्मध्यत एवागच्छन् श्रीरामकृष्णो बालक इव कुड़ुपं स्पृष्ट्वा माष्टारमपृच्छत्—"गात्रावरणकुड़पं मे मुक्तमस्ति। किमेतेन दोषः स्यान्न वे"ति। तत्रभवतो वपुषि साधारणश्वेतवस्त्रनिर्मितं गात्रावरणम्, परिधाने च रक्तप्रान्तिकवसनम्, स्कन्धविलम्बितमञ्चलञ्च। चरणयोश्च परिमार्जिते चर्मपादुके। प्रत्युक्तवान् माष्टारः—"एतदर्थं मा भवांश्चिन्तयतु। किमपि ते दोषाय न स्यात्; अलं ते कुड़पबन्धनेन" इति। प्रबोधनेन यथा बालकस्तथा श्रीरामकृष्णोऽपि निश्चितिमगात्।

अथ सोपानेन आरुह्य सपद्येव प्रथमे कक्षे उत्थानात् परमुत्तरस्मिन् कक्षे सभक्तः श्रीरामकृष्णः प्राविशत्। कक्षस्योत्तरपार्श्वे दक्षिणास्यः समुपविष्टो विद्यासागरमहोदयः। पुरतश्च परिमार्जितः चतुष्कोणसमन्वितो दीर्घः कश्चि-ल्लेखनाधारः, तस्मात् च पूर्वस्यां दिशि पश्चात्सन्निवेशार्हं दीर्घमेकं काष्ठासनम्। लेखनाधाराद् दक्षिणतस्तथा पश्चिमतश्च काश्चिदासन्द्यः। तदानीं कतिभि-र्बन्धुभिः साकं कथयन्नासीद् विद्यासागरमहोदयः।

प्रविष्टे एव श्रीरामकृष्णे विद्यासागरो दण्डायमानः सन् तमभ्यर्थयत्। श्रीरामकृष्णः पश्चिमास्यः, लेखनाधारात् पूर्वपार्श्वे दण्डायमान आसीत्। लेखनाधारस्योपरि तस्य वामपाणिः, पश्चाच्च काष्ठासनम्। विद्यासागरन्तु पूर्वपरिचितमिव निर्निमेषनेत्रेण विलोकयन् भावावेशेन च स्मयमान आस्त।

द्विषष्टिस्त्रिषष्टिर्वा विद्यासागरस्य वयः अनुमीयते। तत्रभवान् विद्या-सागरो हि श्रीरामकृष्णात् प्रायेण षोड़श-सप्तदशवर्षैर्ज्यायान् भवेत्। परिधाने साधारणं शुभ्रञ्च वस्त्रम्, चरणयोश्च चर्मपादुके, वपुषि च कर्तितभुजम् और्णपटीयं गात्रावरणम्। उत्कलवासिजनस्य इव परिमुण्डितं शिरः, वचनावसरे दन्तास्तावदुज्ज्वलाः संदृश्यन्ते। ते खलु कृत्रिमाः, प्रस्तरनिर्मिता एव। पृथुलो मौलिः, उन्नतं ललाटम्, कियच्चास्य खर्वा आकृतिः। ब्राह्मणश्चासौ—तद् गलदेशे उपवीतमासीत्।

विद्यासागरस्य तावद् बहवो गुणाः। प्रथमः खलु विद्यानुरागः। एकदा, "अध्ययनादिकं कुर्यामिति मे महतीच्छा आसीत्; किन्त्वहो, अपि तत् सम्भा-वितम्? संसारे पतितः कमपि अवसरं न प्राप्तवानस्मि" इति ब्रुवन् माष्टारं

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

निकषा तत्त्वत एव रुदितवान् सः। द्वितीयो गुणस्तावत् सर्वजीवेषु दया। विद्यासागरः खलु दयायाः सागरः। वत्सा मातृस्तन्यं न प्राप्नुवन्तीति लक्षयन् स्वयमेव कति वत्सरान् दुग्धपानं वर्जितवान्। ततश्च शरीरस्य बलवदस्वस्थतया बहुदिनानन्तरं पुनः दुग्धपानं समारब्धवान्। शकटं नारूढ़वानासीत्—अश्वाः स्वीयकष्टं कथयितुं न प्रभवन्तीति हेतोः। एकदा कश्चिद् भारवाही विसूचिकारोगाक्रान्तः सन् पतित आस्ते, सन्निहितस्तस्य करण्ड इत्यालोक्य तं क्रोड़े कुर्वन् स्वगृहं निनाय सेवितवांश्च। तृतीयतः, स्वाधीनताप्रियता। कर्तृपक्षीयैः सह मतैक्याभावात् संस्कृतमहाविद्यालयस्य अध्यक्षपदमप्यसौ परित्यक्तवान्। चतुर्थतः, नासौ लोकान् अपेक्षते स्म। कस्मिंश्चित् शिक्षके सोऽस्निह्यत्। तस्य शिक्षकस्य दुहितुर्विवाहकाले स्वयमेव अव्यूढ़वसनं कुक्षौ कुर्वन् समुपस्थितोऽभूत्। पञ्चमतः, मातृभक्तिस्तथा मनोबलञ्च। माता किल तस्मै अशंसत्—"ईश्वर, त्वं चेद् विवाहेऽस्मिन् (भ्रातुर्विवाहे) नागच्छेस्तर्हि मनो मे बलवद् दुःखायेत" इति। तस्मादसौ पद्भ्यामेव चलितः। पथि दामोदरनदः, नास्ति नौका; सन्तरणेनैव पारं किल गतः। तादृक् सलिलसिक्तवसनः स विवाहरजन्यामेव वीरसिंहे मातुः समीपमुपागच्छत् अवादीच्च—"मातः, अयमहमस्मि" इति।

श्रीरामकृष्णो भावाविष्टः सन् कियत्क्षणं तथा दण्डायमान आसीत्। भावसंवरणार्थम् अन्तरान्तरा वदति—जलं पिबामीति। एतावत्कालेन वाटीस्था बालास्तथा स्वजनबान्धवास्तत्र समागताः।

श्रीरामकृष्णो भावाविष्ट एव काष्ठासनस्योपरि उपाविशत्। कश्चित् सप्तदशाष्टदशवार्षिको युवा तदेव काष्ठासनमध्यास्ते। विद्यासागरं चासौ अध्ययनार्थं साहाय्यं याचितुमागतः। श्रीरामकृष्णस्तदापि भावाविष्टः। ऋषेरन्तर्दृष्टिः खलु; बालस्य तावदन्तर्भावम् अखिलमसौ विदितवान्। किञ्चित् सरन् भावमास्थाय आचष्टे स्म—"मातः, बालस्यास्य नितरां संसारासक्तिः। ननु अविद्यायास्ते संसारः, अयमपि अविद्याया बालः।" यो ब्रह्मविद्यायाः कृते न व्याकुलः, केवलमर्थकरविद्यार्जनं तस्य विड़म्बनमात्रमित्येवं किमुक्तवान् श्रीरामकृष्णः?

विद्यासागरमहोदयः व्यस्ततामावहन् जलानयनार्थं कमपि आदिशत्; माष्टारं चापृच्छत्—"यदि किञ्चिदाहार्यमानीयते, किमसौ गृह्णीयात्?" सोऽगदत्—"वाढ़म्, आनीयताम्।" विद्यासागरो व्यस्तः सन्नभ्यन्तरं गत्वा कियन्मिष्टान्नान्यानीय अभ्यधात्—"एतानि वर्धमानत आनीतानि।" श्रीरामकृष्णाय किञ्चिदाहारार्थं प्रदत्तमासीत्। हाजराभवनाथौ च कानिचिद्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गृहीतवन्तौ। ततो माष्टाराय मिष्टान्नप्रदानोद्योगे सति व्याहरद् विद्यासागरः—"अस्मदीयभवनपरिजनः खल्वेषः। नास्य कृते किञ्चिन्नाम चिन्त्यमस्ति।"

अथ कञ्चिद् भक्तयुवानमधिकृत्य श्रीरामकृष्णो विद्यासागरमाह। स युवा श्रीरामकृष्णस्याग्रत एवावर्तत। श्रीरामकृष्ण आह—"अयमेष युवा सुतरां साधुरन्तःसारश्च; यथा फल्गुनदी; उपरि तावत् सिकताः, किन्तु किञ्चित्-खननादभ्यन्तरे खलु जलप्रवाहो दृश्यते" इति।

मिष्टान्नग्रहणानन्तरं श्रीरामकृष्णो विद्यासागरेण सह सस्मितमालपति स्म। सममेव गृहं जनसमाकुलं जातम्—केचिदुपविष्टाः केचन वा दण्डायमानाः।

श्रीरामकृष्णः—अद्य खलु सागरेण संगतोऽस्मि। एतावन्तं कालं जलाशयं ह्रदं नदीञ्चाहं दृष्टवान्। अधुना मया सागरो दृश्यते।

(सर्वेषां हास्यम्)

विद्यासागरः (सहास्यम्)—तस्मात् लवणाक्तमेवाम्बु किञ्चिद् गृह्यताम्। (हास्यम्)

श्रीरामकृष्णः—मा तावद् भोः! कथं लवणाक्तमम्बु नाम? नैव त्वम-विद्यासागरः, विद्यायाः सागरस्त्वमेवासि (सर्वेषां हास्यम्)। क्षीरसमुद्रस्त्वम्। (सर्वेषां हास्यम्)

विद्यासागरः—एवं कथनं त्वयि खलु युज्यते।

ततो विद्यासागरस्तूष्णीं गतः। श्रीरामकृष्णस्तु कथयन्नवास्त—

"सात्त्विकं खलु ते कर्म। सत्त्वमूलं ते रजः। सत्त्वगुणाद् दया जायते। दयाहेतोर्यत् कर्म क्रियते, तन्नूनं राजसिकं कर्म, परन्तु एष सत्त्वस्य रजोगुणः। नासौ दोषमावहति। शुकदेवादयो लोकशिक्षार्थं हृदि दयां धृतवन्तः। ईश्वरविषय-शिक्षणार्थमेव तेषां दया। त्वं विद्यादानमन्नदानञ्च करोषि, तदपि साधु। तच्चेन्निष्कामं क्रियेत, तर्हि भगवल्लाभो भवेत्। केचिद् यशसे पुण्याय च कर्म कुर्वन्ति; तेषां कर्म हि न निष्कामम्। स्वभावत एव त्वं खलु सिद्धो वर्तसे" इति।

विद्यासागरः—महात्मन्, कथमेतत्?

श्रीरामकृष्णः (सहास्यम्)—ननु गोलालुपटोलादीनि सिद्धानि सन्ति कोमलानि भवन्ति; त्वं तु पुनः नितरां कोमलः। अहो, एतावती ते दया! (हास्यम्)

विद्यासागरः (सस्मितम्)—पिष्टमाषास्तु सिद्धाः सन्तः कठिना एव भवन्ति! (सर्वेषां हास्यम्)

श्रीरामकृष्णः—न त्वं तथाविधोऽसि। केवलपण्डिता हि अर्धपक्वा एव! तेषामितो न, ततो न। ननु गृध्रो निरतिशयमुच्चैरुत्पतति; परं तु तद्दृष्टि-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

र्गलितमांसेष्वेव। ये तावत् केवलपण्डिताः, नाम्नैव पण्डिताः, परं तेषां कामिनीकाञ्चनेष्वासक्तिः, ते हि शकुनिवद् गलितकुणपानि मृगयन्ति। तेषामासक्तिरविद्यायाः संसारे। दया-भक्ति-वैराग्याणि विद्यैश्वर्याणि नाम।

विद्यासागरस्तूष्णीकः सन् शृणोति स्म। सर्व एव अनन्यदृष्टयः इममानन्दमयं पुरुषं पश्यन्तस्तस्य कथामृतं पेपीयमाना आसत।

विद्यासागरो महापण्डितः। यदा संस्कृतमहाविद्यालये सोऽधीतवान्, तदा स्वश्रेण्यां सर्वोत्कृष्टश्छात्र आस। असौ प्रत्येकपरीक्षासु प्रथमो भूत्वा स्वर्णपदकादीनि छात्रवृत्तिं वालभत। क्रमेण स संस्कृतविद्यालयस्य प्रधानाध्यापकोऽभवत्। स संस्कृतव्याकरणे तथा संस्कृतकाव्यशास्त्रे च महतीं पारदर्शितामापद्यत। अध्यवसायगुणेन स्वचेष्टया तेन इंराजीभाषाधिगता।

धर्मविषये विद्यासागरः कमपि न शिष्टवान्। असौ दर्शनग्रन्थादिषु अधीती आसीत्। एकदा माष्टारोऽपृच्छत्—"हिन्दुदर्शनशास्त्रं भवता कथं मन्यते?" विद्यासागरः प्रोक्तवान्—"यत्तु तेषां विवक्षितमासीत् तत्तु बोधयितुं ते न क्षमा इति तर्कयामि।" स हि हिन्दुजनवत् श्राद्धादीनि सर्वाण्येव धर्मकर्माणि आचरत्, तथा हि स्कन्धदेशे उपवीतं धृतवान्। वङ्गभाषया च स यान्येव पत्राणि लिखितवान्, तेषु 'श्रीश्रीहरिः शरणमि'ति भगवद्वन्दनमादावेव अकार्षीत्।

अन्येद्युर्माष्टारः विद्यासागरः ईश्वरसम्बन्धे कीदृशं भावयतीति तन्मुखादेव श्रुतवान्; यथाह च विद्यासागरः—"नैवेश्वरस्तु परिज्ञातुं शक्यते, तत्र किं तावद् विधेयम्? मतेन मे—तथैव भवितव्यमस्माभिर्यथा सर्वेषां तथात्वे स्वर्गायते किलेयं पृथिवी नाम। यथा जगतः कल्याणं स्यात् तथैव सर्वैरेव प्रयत्नः करणीयः।"

अथ विद्याऽविद्याविषयिणीं वाचं ब्रुवता श्रीरामकृष्णेन ब्रह्मज्ञानमुपजीव्य प्रसङ्गः किलावतारितः। महापण्डितेन च विद्यासागरमहोदयेन षड्दर्शनाध्ययनेन पुनरेवं ज्ञातं यत् न किमपि वा वेत्तुमर्हते भागवतं तत्त्वमिति।

श्रीरामकृष्णः—ब्रह्म—विद्याऽविद्यातिगम्; तन्मायातीतं खलु।

"विद्यते तावदस्मिन् जगति विद्यामाया तथैव चाविद्यामायापि। भक्तिर्ज्ञानं यथा तथैव कामिनीकाञ्चनादिकमपि वर्तते नाम। सच्चासच्च तथैवोत्तमं चानुत्तमं चेति सर्वमेवैतदस्ति। अपि तु निर्लिप्तं खलु ब्रह्म। उत्तमानुत्तमे सदसती च जीवविषये, नैभिस्तस्य ब्रह्मणः कियानपि सम्बन्धः। यथा, को वा प्रदीपस्य सम्मुखे भागवतं पठति, अपरो वा कूटलेखं प्रयुङ्क्ते; प्रदीपस्तु निर्लिप्तः। यथा शिष्टस्योपरि तथा दुष्टस्योपरि सूर्य आलोकं तनोति।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"भणसि चेत् किमिदं नाम दुःखं पापमशान्तिश्चैतत् सर्वम्। तदुत्तरन्तु—तत् सर्वं जीवपक्षे। ब्रह्म तावन्निर्लिप्तम्। सर्पस्यान्तर्विषमस्ति ; तेन दष्टः सन्नन्यो म्रियते, सर्पस्य तु न किमपि स्यात्।

"ब्रह्म किमिति वाचा नैव प्रकाशयितुं शक्यते। अखिलं तावदुच्छिष्टं सञ्जातम्। वेदास्तन्त्राणि पुराणानि षड्दर्शनानि च सर्वाण्येतानि उच्छिष्टान्येव संवृत्तानि। तथा हि वाचा पठितानि, वाचैव उच्चारितानि—अतः खलु उच्छिष्टान्येव जातानि। किन्तु एकमेव वस्तु नोच्छिष्टं, तद् ब्रह्मेति। किं नाम ब्रह्मेति नैतावताऽपि कालेन कोऽपि वाचाऽऽख्यातुं शक्तः।"

विद्यासागरः (बन्धून् प्रति)—अहो, रमणीयमिदं वचः। नूनमद्य नूतना काचित् कथा मया ज्ञाता।

श्रीरामकृष्णः—आस्तां कस्यचित् पितुर्द्वौ पुत्रौ। ब्रह्मविद्याधिगमार्थं पित्रा कस्मैचिदाचार्याय समर्पितौ तौ कुमारौ। अथ कतिपयान् वत्सरानतीत्य गुरुगृहात् प्रत्यागतौ तौ पितरं प्रणेमतुः। पुत्रयोश्च ब्रह्मज्ञानं जिज्ञासमानः पिता ज्यायांसं कुमारमपृच्छत्—'तात, सर्वमधीतं त्वया। अथ किंस्वरूपं ब्रह्मेति विव्रियताम्'इति। एवं पृष्टः स वेदेभ्यो बह्वीः श्रुतीरुदाहृत्य ब्रह्मस्वरूपमवेदयत्। तूष्णीमासीत्तु पिता। ततस्तथैव पृष्टः कनीयान् कुमारो जोषमासीदवनताननः। स्फुरति स्म न वाङ् मुखात्। ततः प्रसन्नान्तरेण पित्रा स कुमारः प्रोक्तः—'अयि तात! त्वयैव किञ्चिदवगतम्। किं नाम ब्रह्मेति न हि वाचा वर्णयितुं शक्यते'इति।

"तदेव विदितवन्तो वयमिति मन्यते मानुषैः। कदाचित् कञ्चित् शर्करामयं गिरिमुपेता काचित् पिपीलिका। कणमेकं भुक्त्वा परिपूर्णोदरा मुखेनापरां कणिकामुद्वहन्ती स्वावासं प्रतिष्ठमाना सा व्यचिन्तयत्—'पुनरागम्य साकल्येनैव गिरिं नेष्यामी'ति। क्षुद्रैरेव जीवैरेवं मन्यते, ब्रह्म वाक्यमनसोरतीतमिति ते तु न विदन्ति। कोऽपि यावन्नाम महत्त्वमापन्नः स्यात्, तत्स्वरूपं किं जानीयात्? भवतु, शुकदेवादयो वापि बृहत्-पिपीलिकाविशेषाः, अष्टौ वा दश वा शर्कराकणान् गृह्णन्तो मुखैः।

"अपि तु वेदेषु पुराणेषु च यद् वर्णितं तत्तु कीदृशं भो विजानीहि? सागरं दृष्ट्वा प्रत्यागतं कञ्चिज्जनं कोऽपि चेत् पृच्छेत् कीदृशो दृष्टः सागर इति, स मुखव्यादानपूर्वकं गृणाति—'अहो, किं दृष्टम्—हिल्लोलः कल्लोलश्चास्ये'ति। तथैव ब्रह्मविषयः। तदानन्दस्वरूपं सच्चिदानन्दमिति श्रूयते वेदेषु। शुकदेवादयस्तावत् ब्रह्मसागरस्यास्य तटे स्थिताः दर्शनस्पर्शनादिकं कृतवन्तः। मतान्तरेण—न ते सागरमिममवतीर्णाः। ननु सागरमिमम् अवतरतो नास्ति प्रत्यावर्तनयोग एवेति।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"समाधिस्थस्यैव ब्रह्मज्ञानं स्यात्, तथा ब्रह्मदर्शनमपि। तादृगवस्थायां विचारः सम्पूर्णमेव निवर्तते ; जोषमास्यते च मानुषैः। ब्रह्म किं वस्त्विति वाचा वर्णने काऽपि शक्तिर्नावतिष्ठते।

"काचिल्लवणपुत्तलिका समुद्रं परिमातुं गता। (सर्वेषां हास्यम्) समुद्रजलं कियन्नाम गभीरमिति ज्ञापयितुं सा तत्रोपस्थिता। ज्ञापनं तु नाभूत्। यावदवातरत् तावदेवासौ गलिता संवृत्ता। को वा वार्तां दद्यात् ?"

कश्चिदपृच्छत्—समाधिस्थो यः सञ्जातब्रह्मज्ञानः किं पुनरसौ वचो न प्रयुङ्क्ते ?

श्रीरामकृष्णः (विद्यासागरादीन् प्रति)—ननु लोकशिक्षार्थमेव शङ्कराचार्यैर्विद्याया अहमिति भावः स्वीकृतः। सति च ब्रह्मदर्शने मानुषो मौनमेति। यावद् दर्शनं न भवेत् तावदेव विचारस्तिष्ठति। घृतं यावदामं वर्तते तावदेव कलकलः। पक्वस्य तु घृतस्य न कोऽपि शब्द उच्चरति। अपि तु यदा पुनः पक्वेऽपि हविषि आमं गोधूमचूर्णनिर्मितमाहार्यं (लुचीति भाषा) प्रदीयते, तदा पुनरपि शब्दोद्गमो भवति। यदा तद् आममाहार्यं पच्यमानमास्ते, तदा घृतं पुनर्निःशब्दतां याति। एवमेव समाधिस्थः पुरुषो लोकशिक्षार्थमेव व्युत्थानदशामादत्ते ब्रवीति च पुनर्वचांसि।

"यावन्मधुमक्षिकाः पुष्पेषु नोपविशन्ति तावन्नाम गुञ्जन्ति। पुष्पेषु निषण्णा मधुपानरताः सन्तस्तूष्णीमासते। मधुपानानन्तरं पुनर्मत्ताः क्वचिच्च गुञ्जन्ति!

"पुष्करिण्यां कलसपूरणकाले भक् भक् इति शब्दो भवति। पूर्णे च सति पुनर्न शब्दोद्गमः। (सवषां हास्यम्) अपि च कलसान्तरे चेज्जलं व्यतिमुच्यते तर्हि पुनः शब्दो जायते" इति। (हास्यम्)

श्रीरामकृष्णः—ब्रह्मज्ञानं बभूव ऋषीणाम्। लेशतोऽपि विषयबुद्धौ सत्यां नैतद् ब्रह्मज्ञानं सम्पद्यते नाम। अहो, ऋषीणामासीत् कियान् नामायासः! प्रातरेव आश्रममुज्झित्वा गतास्ते। समग्रमेव दिवसमेकाकिनो ध्यानचिन्तादिभिर्निन्युः ; रात्रौ चाश्रमं प्रत्यावृत्य ते किञ्चित् फलमूलमश्नन्ति स्म। दर्शन-श्रवण-स्पर्शनादिविषयेभ्यस्ते मनो निवर्तयामासुः। तत एव ब्रह्म ते बोधेनाबुध्यन्त।

"अन्नगता हि कलौ प्राणाः, देहबुद्धिः खलु नापगच्छति। नैवंविधायाम् अवस्थायां सोऽहमिति व्याहारः शोभते नाम। सर्वाण्येव आचर्यन्ते, पुनस्तु अहमेव ब्रह्मेति उक्तिर्न यूज्यते। ये नाम विषयांस्त्यक्तुं न पारयन्ति, अहम्भावश्च येषां केनाप्युपायेन नापगच्छति, 'दासोऽहम्' 'भक्तोऽहम्' चेति अभिमानस्तेषां साधुरेव। भक्तिपथेनापि तदवाप्तुं शक्यम्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"ज्ञानी नेति नेतीति कृत्वा विषयबुद्धिं जहाति। ततो ब्रह्म ज्ञातुमर्हति। तद् यथा सोपानपद्धतीः क्रामं क्रामं प्रासादपृष्ठं लभ्यते। किन्तु विज्ञानी यो विशेषतस्तेन आलपति, स पुनरितोऽपि किञ्चिदधिकतरं पश्यति। वीक्षतेऽसौ—यदुपादाननिर्मितं प्रासादपृष्ठं तैरेव इष्टकचूर्णादिभिः सोपानश्रेण्यश्चापि निर्मिताः। नेति नेतीति विचारेण यद्धि ब्रह्मेत्यवगतं तदेव जीवजगद्रूपं संवृत्तम्। विज्ञानी पश्यति—यदेव निर्गुणं तदेव सगुणमिति। लोकः प्रासादपृष्ठे चिरमवस्थातुं न शक्नोति, पुनश्चावतरति। ये नाम समाधिस्थाः सन्तो ब्रह्मदर्शनं कृतवन्तः, ते अप्यवतीर्य तदेव जीवजगद्रूपं संवृत्तमित्यनुभवन्ति। सा-रे-गा-मा-पा-धा-नीति स्वरग्रामाः। अत्र 'नी'ति स्वरे चिरमवस्थानं न सम्भवति। 'अहमि'ति नापगच्छति। तदा तु तदेवाहम्, तदेव च जीव-जगद्रूपं कृत्स्नमिति अवगम्यते। एतन्नाम विज्ञानम्।

"ज्ञानिनः पन्था अपि पन्था एव। ज्ञानभक्त्योः पन्था अपि पन्थाः खलु। तथा हि भक्तिमार्गोऽपि मार्गस्तावत्। ज्ञानयोगो यथा सत्यस्तथा भक्तियोगोऽपि। सकलैरेव मार्गैर्हि प्राप्यते भगवान् किल। यावदहमिति भावस्तेन जीवेषु न्यस्यते तावद् भक्तिपथ एव सुकरः।

"ब्रह्म अटलं निष्क्रियं सुमेरुवच्चेति विज्ञानी पश्यति। जगत्संसारोऽयं तस्यैव सत्त्वरजस्तमस्त्रिगुणैः सञ्जातः। तदेव तु निर्लिप्तम्।

"यदेव ब्रह्म स भगवानेवेति विज्ञानी अवैति। यदेव गुणातीतम् स एव षड्ऐश्वर्यमयो भगवान्। जीवो जगन्मनो बुद्धिर्भक्तिर्वैराग्यं ज्ञानञ्च—एतानि सर्वाणि तस्यैश्वर्याणि। (सहास्यम्) ननु यस्य भद्रविलासिनो नास्ति प्रासादादिकं, विक्रीतमेव वा स्यात्, स पुनः कीदृग् वा भद्रविलासी भवेत्? (सर्वेषां हास्यम्) षड्ऐश्वर्यपूर्णः खल्वीश्वरः। ननु तस्य चेत् पुरुषस्यैश्वर्यं न स्यात्तर्हि केनासौ पुनर्मान्येत? (सर्वेषां हास्यम्)

"अहो, दृश्यतामस्य जगतः चमत्कारित्वम्! सूर्याचन्द्रमसौ नक्षत्राणि चेति कतिविधानि खलु द्रव्याणि! बृहन्तः क्षुद्राश्च उत्कृष्टास्तथाऽपकृष्टाश्च; केषांचनाधिकशक्तिः, केषांचन वाऽल्पशक्तिश्चेत्यहो कतिधा जीवा" इति।

विद्यासागरः—ननु किं तेन (ईश्वरेण) कस्मैचिद् अनेकशक्तिः तथा अपर-स्मैचिद् अल्पशक्तिः प्रदत्ता?

श्रीरामकृष्णः—असौ विभुरूपेण सर्वेषु भूतेष्वेव तिष्ठति। पिपीलिकाया-मपि स वर्तते। किन्तु शक्तिविशेषोऽस्ति। नो चेत् कथमेकेनापि लोकेन दशजनाः पराभूयन्ते, क्वचिद् एकः पुनरन्यस्मादपि पलायते। किं बहुना, एवं न चेत् किमिति त्वमेष सर्वैः पूज्यसे? किं स्विदुद्गतं ते शृङ्गद्वयम्? (हास्यम्) अन्यापेक्षया दया च विद्या च त्वयि वर्तेतेतराम्। तस्मादेव

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लोकास्त्वां मानयन्ति, द्रष्टुमायान्ति चापि। कथामिमां त्वं स्वीकरोषि न वा? (मृदुस्मितमकरोत् विद्यासागरः)

श्रीरामकृष्णः—पाण्डित्यमात्रे किमपि नास्ति। तत्प्राप्तये तज्ज्ञानाय च ग्रन्थपाठः कल्पते। किमस्ति भवत्पुस्तिकायामिति कश्चिज्जनः साधुमेकं पृष्टवान्। स साधुः स्वपुस्तकमुद्घाटच प्रदर्शयामास। तत्र च प्रतिपत्रमेव 'ॐ रामः' इति लिखितमासीत् नान्यत् किमपि।

"ननु को नाम गीताया अर्थः? गीतेति दशधा समुच्चारणैर्यत् सिध्यति। तथा हि गीतेति दशवारानुच्चारणैः 'त्यागी'–'त्यागी'ति भवति। गीताया इयमेव शिक्षा—'हे जीव, सर्वं विहाय भगवल्लाभाय चेष्टस्व। साधुर्वा स्यात् संसारी वा भवेत्—सर्वेषामेव मनसां सर्वा आसक्तयो वर्जयितव्याः।

"दक्षिणदेशेषु तीर्थानि पर्यटता तत्रभवता चैतन्यदेवेन गीतां पठन् कश्चिद् जनो दृष्टः। कश्चिदपरः कियद्दूरे आसीनः शृणोति रोदिति च। क्रन्दतस्तस्य चक्षुषी प्लाविते एव संवृत्ते। चैतन्यदेवः पप्रच्छ—'किमेतत् सर्वं त्वया बध्यते?' सोऽवदत्–'देव, श्लोकानामहं किमपि बोद्धुं न शक्नोमि।' 'तत् कथं रोदिषी'ति सोऽपृच्छत्। भक्तः प्राह–'अर्जुनस्य रथं तावत् पश्यामि। अपि च तस्याग्रतः प्रभुरर्जुनश्च द्वौ आलपतः। तदालोक्य रोदिमी'ति।

श्रीरामकृष्णः—ननु विज्ञानी कथं भक्तिमवलम्ब्य अवतिष्ठते? अस्योत्तरं तु—अहमिति नापगच्छति। समाध्यवस्थायां तद् व्यपैत्येव, परं पुनराविर्भवति। साधारणानां च जीवानामहमिति भावो नापगच्छति। अश्वत्थवृक्षस्य कृन्तनात् परं पुनः परेद्यवि अङ्कुरादिकमुद्गच्छति। (सर्वेषां हास्यम्)

"ज्ञानलाभात् परमपि कुतश्चित् अहमिति पुनरायात्येव। स्वप्ने त्वया व्याघ्रो दृष्टः, ततो जागरितस्त्वम्। तथापि वक्षस्ते प्रकम्पते। अहंभावमाश्रितस्यैव जीवस्य वत यावत्यो यन्त्रणाः! गौर्हम्बा (अहम्) हम्बा (अहम्) इति शब्दायते। अस्मादेव तस्य एतावती यन्त्रणा! लोकस्तां हलेन संयोजयति। कर्षणकाले वर्षातपौ तद्गात्रस्योपरि प्रव्रजतः। पुनर्मांसिकैरसौ कृत्यते। चर्मणाऽस्य पादुका निर्मीयन्ते, तथा मृदङ्गा अपि—तदा प्रभूतं ताड़यन्त्यहो वादकाः। (हास्यम्) तथापि निस्तारो नास्ति। ततश्च तस्य स्नायु-नाड्यादिभिः तन्तूनि क्रियन्ते, तैः पुनस्तूलमार्जकस्य यन्त्रं निष्पाद्यते। तदा त्वसौ (गौः) पुनर्न अहमिति शब्दायते, तदा 'तुँहु' 'तुँहु' इति (अर्थात् त्वम्, त्वमिति) भणति। यदा त्वम् त्वमिति उच्चार्यते तदैव निस्तारः! हे ईश्वर, दासोऽहं, प्रभुस्त्वमेव। तव पुत्रोऽहम्, त्वं मे मातेति।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"रामो हनुमन्तं पृष्टवान्—'मारुते, केन भावेन त्वं मामवेक्षसे।' हनुमतोक्तम्—'हे राम, यदाऽहमिति मे बोधो वर्तते, तदा पश्यामि—त्वं पूर्णः, अहमंशः, प्रभुस्त्वं दासोऽहम्। हे राम, पुनर्यदा तत्त्वज्ञानमत्पद्यते तदा पश्यामि—त्वमेवाहम्, अहञ्च त्वमिति।

"अहं मम चेति द्वयमेव अज्ञानम्। 'मम गृहं', 'मम धनं', 'मम विद्या', 'एतत् सर्वमैश्वर्यं मदीयमेव'—ईदृशो भावोऽज्ञानादेव जायते। 'हे ईश्वर, त्वं कर्ता, इदं सर्वं तवैव वस्तु। गृहं, कलत्राणि, अपत्यानि बान्धवाश्च—अखिलान्येतानि त्वदीयानि वस्तूनि'—एवंविधो भावो ज्ञानादेव सञ्जायते।

"मृत्युः सदा स्मर्तव्यः। मरणात् परं किञ्चिन्न स्थास्यति। जगतीह कानिचित् कर्माणि कर्तुं जीवाः समागच्छन्ति। यथा—कस्यचित् ग्राम एव गृहं, कर्मसम्पादनार्थं तु कलिकातामेवासौ आयाति।

"यदि कोऽपि धनिन उद्यानं द्रष्टुमागच्छति, तर्हि उद्यानस्याधिरक्षको वदति—'इदमस्मदीयमुद्यानं नाम; इयं पुष्करिणी अस्माकमेवे'ति। अथ किञ्चिद्दोषमालक्ष्य प्रभुश्चेत् तं कर्मणो निराकुर्यात्, तर्हि प्रभोराम्रपेटिकामादाय गन्तुमसौ न क्षमः। तदासौ दौवारिकद्वारेण तामेव पेटिकां स्वामिसकाशं प्रेषयति। (हास्यम्)

"भगवान् खलु द्वाभ्यामेव कथाभ्यां हसति—यदा भिषग् रोगिणो मातरं भणति—'मातः, किमिति भयम्? अहमेव पुत्रं ते निरामयं विधास्यामी'ति। तदा खलु भगवान् वारमेकं हसति, एवं चिन्तयन्नेव हसति—'अहमेव नाशयामि, पुनरसौ वदति अहमेव रक्षिष्यामी'ति। भिषग् भावयति—'अहमेव कर्ते'ति। परम् ईश्वर एव कर्तेति स विस्मृतिं गतः। अथ यदा द्वौ भ्रातरौ सूत्रं पातयित्वा भूमिं विभजमानौ विवदेते—'ममायं भागः, तवासौ' इति, तदैवेश्वरः पुनरपि वारमेकं स्मयते, एवं मनसि कृत्वा स्मयते,—'ममैवेदं जगत्, ममैवेदं ब्रह्माण्डम्', परं त्वेतैराकलय्यते—'स्थानमेतत् ममैव, तत्तु तवे'ति।"

श्रीरामकृष्णः—किमसौ भगवान् विचारेण ज्ञातुं शक्यते? तस्य दासो भूत्वा शरणागतश्च सन् तत्समीपं प्रार्थयस्व।

(विद्यासागरं प्रति सहास्यम्)—भवतु, कस्ते पुनर्भावः?

मृदु हसन्नाह विद्यासागरः—भवन्तमेकान्तत एव एकदा तावद् वदिष्यामि। (सर्वेषां हास्यम्)

श्रीरामकृष्णः (सहास्यम्)—न हि पाण्डित्येन विचार्यं केवलं ज्ञातुं शक्यः स भगवान्। इत्युक्त्वा श्रीरामकृष्णः प्रेमोन्मत्तः सन् संगीतमेकं गातुं प्रक्रमते—

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'काली सा किंस्वरूपा तद् हि को वेत्ति तावद् यथार्थम्.....'
(द्रः, ११ मार्च, १८८२)

"किं दृष्टं भोः, ब्रह्माण्डभाण्डमुदरे ननु कालिकायाः किं हा प्रकाण्डमिति चेत् किल वेद्यते किम् ? अपि चोक्तम्—षड्दर्शनैरपि पुनर्न हि दृश्यते सा—पाण्डित्य-मात्रेणाधिगम्यो न भगवानसौ। विश्वासेन तथा भक्त्या च प्रयोजनम्। अथ श्रूयतां विश्वासस्य कीदृशी शक्तिरिति। कश्चिद् जनः लंकायाः समुद्रं तितीर्षुरासीत्, विभीषणस्तमाह—'द्रव्यमेतद् वसनाञ्चले बद्ध्वा गृहाण ; एवं सति निर्विघ्नं गमिष्यसि, जलस्योपरिभागेन गन्तुं पारयिष्यसि। अपि तु न कदापि ग्रन्थिमुन्मुच्य द्रष्टव्यम्, उन्मोचनमात्रादेव जलनिमग्नो भविष्यसी'ति। लोकोऽसौ समुद्रस्योपरिभागेन स्वच्छन्दं चलन्नासीत्। विश्वासस्येदृशी शक्तिरहो ! स कियन्तं पन्थानं गत्वाऽचिन्तयत्—'ननु विभीषणेन अञ्चले बद्ध्वा किं नाम वस्तु प्रदत्तं यद्बलाज्जलस्योपरिभागेनापि स्वच्छन्दमहं गन्तुं शक्नोमि !' एवं चिन्तयन्नसौ वसनग्रन्थिमुन्मुच्य केवलं रामेति नामाङ्कितं पत्रमेकं ददर्श ; तदा सोऽभावयत्—'आः, एतन्नाम वस्तु !' इति। एवं भावनामात्रमेव तस्य जलनिमज्जनमासीत् ! उच्यते किल—हनुमतो रामनामनि एतावान् विश्वास आसीद् यद् विश्वासगुणेनासौ सागरमुल्लङ्घयामास। किन्त्वहो ! स्वयं रामस्यापि सागरबन्धनमावश्यक-मासीत् !

"यदि तस्मिन् भगवति विश्वासो वर्तते, तर्हि कश्चित् पापानि महापातकानि वा करोतु, कुतोऽपि तस्य भयं नास्ती"ति।

एवमुक्त्वा श्रीरामकृष्णो भक्तभावमात्मनि आरोप्य भावोन्मत्तः सन् विश्वास-माहात्म्यं गायति स्म—

"दुर्गां दुर्गां मम तु जपतो मृत्युरस्मिन् यदि स्यात्
दीनं मां भोः कथमिह न वा तारयेः शङ्करि त्वम्।
विप्रान् गावो यदि पुनरये हन्मि चेत् पापिनं मां
हातुं शक्ता जननि ! किमहो त्वां स्मरन्तं सुतं ते ?
यान्यन्यानि क्षितितलभुवां पापकर्माणि वा भोः ?
नारीहत्या-जठरनिवसत्प्राणिनाशादिकानि।
काचिन्नो वा तव पदयुगं ध्यायतो तत्र भीतिः
त्वत्कारुण्यात् प्रभवति जनो ब्रह्मलाभाय शश्वत् ॥"

श्रीरामकृष्णः—विश्वासस्तथा भक्तिश्च। सोऽञ्जसा भक्त्या लभ्यते। असौ तावद् भावविषय इति।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एवं ब्रुवता सङ्गीतमारब्धं तत्रभवता श्रीरामकृष्णेन—

"किमिह हृदय तं भोः, वेत्तुमिच्छेः कदाचित्
तिमिरमयगृहान्तर्मत्तवद् व्याकुलत्वात् ?
भवति स विषयोऽस्मिन् भावमात्रस्य नित्यम्
प्रभवति न हि धर्तुं भावहीनो ह्यभावैः ॥

आदौ शशी रे क्रियतामधीनः
त्वदीयशक्त्या नियतं प्रकामम् ।
कक्षान्तरे गुप्तगृहं चकास्ति
सति प्रभाते स पलायितः स्यात् ॥

आगमैर्निगमैर्वापि षड्भिर्वापि च दर्शनैः ।
तन्त्रैः सारभूतैर्वापि नेक्षितुं शक्यते हि सः ॥

विराजते नित्यसुखालये सदा
भक्त्येकमार्गानुगतो रसान्वितः ।
दधत् स योगं किल भावसम्पदे
नित्यं युगान्तप्रभृतिक्षिताविह ॥

उदीयमाने ननु भाव एव रे
यथा ह्ययस्कान्तमणिस्तदायसम् ।
परं समाकर्षति तत् तथा जनम्
स्वयं प्रगृह्णाति परेश्वरोऽन्तिके ।
सा प्रार्थ्यते मे निजमातृभावैः
रामप्रसादो वदतीति नित्यम् ।
न तत् प्रकाशं वचनीयमस्मिन्
गूढेङ्गितैस्तत् किल बुध्यतां भोः ॥"

एवं गायन् श्रीरामकृष्णः समाधिस्थोऽभूत् । तस्य हस्तौ बद्धाञ्जली, देह उन्नतः स्थिरश्च, नेत्रद्वयं स्पन्दहीनम् ! स तस्यैव काष्ठासनस्योपरि पश्चिमास्यः सन् पादौ प्रलम्बमान उपाविशत् । सर्वे उद्ग्रीवाः सन्त इमामद्भुतामवस्थां पश्यन्ति स्म । पण्डितो विद्यासागरोऽपि निस्तब्धः सन् अपलकनेत्रेण पश्यन्नास्त ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीरामकृष्णः प्रकृतिस्थः सञ्जातः। दीर्घं च निःश्वस्य सहास्यं कथयति स्म—"भावो भक्तिश्च—एतयोरर्थः तस्मिन् प्रीतिः। यदेव ब्रह्म सैव मातेति समाहूयते।

'सा प्रार्थ्यते मे निजमातृभावैः
रामप्रसादो वदतीति नित्यमि'त्यादि।

"ननु गूढ़ेङ्गितैर्बोद्धव्यमित्युक्तं रामप्रसादेन स्वकीयहृदयं प्रति। इदमत्रावधेयमिति वदति—

"वेदा यद् ब्रह्मेति आमनन्ति सैवात्र मया मातेति प्रार्थ्यते। यन्निर्गुणं तदेव सगणम्, यदेव ब्रह्म सैव शक्तिः। यदा निष्क्रियमिति बुध्यते, तदा ब्रह्मेति उदाहरामि। यदा तु भावयाम्यसौ सृष्टिस्थितिप्रलयान् करोतीति, तदा तामाद्यशक्तिं कालीति व्यपदिशामि।

"ब्रह्मशक्त्योरभेदः। यथा अग्निस्तस्य दाहिका शक्तिश्च। अग्नीतिव्यपदेशात् तस्य दाहिका शक्तिरपि गम्यते। दाहिका शक्तिरपि अग्निं गमयति। एकस्वीकारे अपरस्वीकारोऽपि भवेत्।

"तदेव खलु ब्रह्म मातरित्याहूयते। कुतः? परमप्रेमास्पदं किल माता। अनुरागेणैव लभ्यः स ईश्वरः। तत्र भावस्तथा भक्तिः प्रेम तथा विश्वासश्च। श्रूयतां तावद् गीतान्तरम्—

"उदेति भावः परिभावनाभिः।
(अरे) यथैव भावो हि तथैव लाभः
तत्प्रत्ययस्तत्र भवेच्च मूलम्
कालीपदाम्भोजसुधाह्रदाख्ये
चित्तं निमग्नं यदि तिष्ठतेऽस्मिन्।
यागोऽर्चनं होमचयश्च वापि
किञ्चिन्न वा स्यादुपकारकं वा॥"

"चित्तस्य तद्गतत्वम् प्रेम च तस्मिन् निरतिशयम्। को नाम सुधाह्रदः। तस्मिन् निमग्ना मानुषा नहि म्रियन्ते—अमरा भवन्त्येव। एके तर्कयन्ति—अनारतमीश्वर ईश्वर इति वादेन मस्तिष्कं विकृतिमेति। मा मैवम्। अयं तावत् सुधाया ह्रदः—अमृतस्य सागरः। वेदेष्वसौ 'अमृते'ति आम्नातः। अस्मिन् निमग्नो नहि मृत्युमेति, अमर एव स्यात्।

"पूजा-होम-यागयज्ञा अकिञ्चित्करा एव। यदि तस्मिन् भगवति प्रेम विलसति, तर्हि एषां कर्मणां बाहुल्येनालम्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"यावद् वायुर्न लभ्यते तावदेव व्यजनेन प्रयोजनम्। दक्षिणानिलश्चेत् स्वत एवायाति व्यजनं त्यक्तुं शक्यते। तदा कोऽर्थो व्यजनेन ?

(विद्यासागरं प्रति) "त्वया क्रियमाणानि कर्माण्येतानि सत्कर्माणि नाम। अपि चेत् 'कर्ताहमि'त्यभिमानत्यागेन निष्कामभावमाश्रित्य त्वया कर्मानुष्ठातुं शक्यते, तर्हि सुतरामेतत् साधु स्यात्। एतदेव निष्कामकर्म कुर्वाणस्य ईश्वर एव भक्तिः प्रीतिश्चोपजायेते। तथैव निष्कामं कर्म समाचरत ईश्वरलाभः स्यात्।

"पुनस्तु तस्मिन्नीश्वरे यावान् भक्तिप्रेमसञ्चारः स्यात्, तावान् कर्मणामपि सङ्कोचः संपद्यते। यथा—गृहस्थवधूरन्तर्वत्नी यदा जायते, तदा श्वश्रूमाता तस्याः कर्महासं विदधाति। एवं यावदेव मासविवृद्धिर्गर्भस्य संपद्यते, तावदेव श्वश्रूमाता तस्याः कर्मणां ह्रासमापादयति। ततः पूर्णेषु दशमासेषु सा स्नुषया मनागपि न कर्म कारयति ; नो चेदपत्यस्य काऽपि हानिः प्रजायेत, प्रसवस्य चापि कोऽपि व्याघातः स्यात्। (हास्यम्) यानि तावत् कर्माणि क्रियन्ते त्वया तैस्तु तवैवोपकारः प्रपद्येत। निष्कामभावेन तु कर्मसम्पादनात् चित्तशुद्धिर्भवेत्, ईश्वरे च प्रीतिस्ते संजायेत। प्रीतिजननात् तमेव लब्धुमर्हसि। न हि जगदुपकारं मानवः कर्तुमर्हति। स एवैतं विधत्ते यश्चन्द्रसूर्यौ सृष्टवान्, पित्रोः स्नेहं, महति दयां, साधुभक्तेषु भक्तिं दत्तवान्। यो मानवः कामनाशून्यः सन् कर्म करिष्यति स आत्मन एव क्षेमं विधास्यति।

"अरे, अन्तरे ते स्वर्णमस्तीति वार्तां न प्राप्तवानसि। किञ्चिन्मृत्तिकयेव आच्छादितमिहास्ते। सकृदपि तत्सन्धानं लभ्यते चेत्, भवत्येव कर्मलाघवम्। ननु प्रसूतेऽपत्ये गृहवधूः केवलमपत्येनैव अवतिष्ठते, तदेवास्ते लालयन्ती सा ; श्वश्रूरपि सांसारिककर्मभ्यस्तां मोचयति। (सर्वेषां हास्यम्)

"भूयोऽपि गच्छाग्रतः। एकदा कश्चित् काष्ठिकः काष्ठानि समाहर्तुं गतः। स केनचिद् ब्रह्मचारिणा एवमुक्तः—सराग्रतः। ततोऽग्रे सरन् चन्दनपादपमलोकयत्। कियद्दिनानन्तरमेवं चिन्तितं तेन—ननु अग्रगमनमेवोपदिष्टं तेन ब्रह्मचारिणा, न तु चन्दनपादपपर्यन्तगमनम्। तत् पुरो गत्वा रजताकरमपश्यत्। ततः पुनरपि कतिपयदिनानन्तरमग्रगमनेन सुवर्णस्याकरो दृष्टः। ततश्चापि केवलमहो हीरकाणि माणिक्यानि चेति ! सर्वाण्येतानि संगृह्यासौ आण्डीरः संवृत्तः।

"निष्कामं कर्म कर्तुं पार्यते चेत् ईश्वरे प्रेम उपजायते। क्रमेण तत्कृपयाऽसौ लभ्यते। ईश्वरो द्रष्टुं शक्यते, तेन चालपनं सम्भवेत्—यथाऽहं त्वयैव सार्धमालापं करोमि।

सर्वे मूका निस्तब्धाश्च सन्त एतां सर्वां वाचं शृण्वन्ति स्म। मन्ये साक्षाद् वाग्वादिनी श्रीरामकृष्णजिह्वामवतीर्णा विद्यासागरमुपलक्ष्य जीव-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मङ्गलार्थं वाचं प्रपञ्चयति। रात्रिः समागतप्राया, नवघटिका वादिता। श्रीरामकृष्ण इदानीं साधयिष्यति।

श्रीरामकृष्णः (विद्यासागरं प्रति सहास्यम्)—ननु यदुक्तं मया तत् सर्वमेव विदितं भवतेति बाहुल्यमुक्तेः, परं तु ते प्रतिबोधो नास्ति। (सर्वेषां हास्यम्) वरुणस्य भाण्डारे कतिविधान्यहो रत्नानि सन्ति! परं वरुणराजस्य तद्विषये बोधो नास्ति।

विद्यासागरः (सहास्यम्)—नूनं भवतैव वक्तुमेतत् शक्यते।

श्रीरामकृष्णः (सहास्यम्)—अथ किम् भोः! स्वभृत्यनामान्यपि नैव ज्ञायन्ते तावदनेकैर्भद्रविलासिभिः। (सर्वेषां हास्यम्), क्व वा वाटिकाया महार्घाणि कानि वस्तूनि सन्तीति न ज्ञायते।

तयोरालापं श्रुत्वा सर्व एव आनन्दिता जाताः। सर्वे ते स्तोकं तूष्णीं-भावमापन्नाः। भूयो विद्यासागरं संबोध्य श्रीरामकृष्ण आलापं कुर्वन्नास्त।

श्रीरामकृष्णः (सहास्यम्)—भवान् वारमेकमुद्यानं द्रष्टुं गच्छतु—तत्तु रासमणिमहोदयाया उद्यानम्। प्रभूतमेव चमत्कारि स्थानमिदम्!

विद्यासागरः—नूनमहं यास्यामि। भवानत्र समागतः खलु, नाहं गमिष्या-मीति किं युज्यते?

श्रीरामकृष्णः—किं मत्समीपम्? कष्टं भोः!

विद्यासागरः—किमिदं नाम? कथमेवमुक्तवानसि? बोधयतु तावन्माम्।

श्रीरामकृष्णः—(सहास्यम्) ननु जालिक-नौका वयम्। (सर्वेषां हास्यम्) कुल्यासु पल्वलेषु विशालास्वपि नदीषु च गन्तुं शक्नुमः। किन्तु भवन्तः खलु अर्णवपोताः। शङ्के तावद् गमनावसरे उन्नतभूमौ प्रतिबद्धाः स्युः।" (सर्वेषां हास्यम्)

सहास्यवदनो विद्यासागरस्तूष्णीमास्त। श्रीरामकृष्णो हसन्नासीत्।

श्रीरामकृष्णः (सहास्यम्)—साम्प्रतं तु पोतोऽपि तत्र गन्तुमर्हति।

विद्यासागरः—आम्, नूनमयं वर्षाकालः।

माष्टारः (स्वगतम्)—ननु नवानुरागस्य वर्षाः; नूनं नवानुरागसमये मानापमानयोर्बोधो न वर्तते।

श्रीरामकृष्णो भक्तैः साकमुत्थितवान्; विद्यासागरोऽपि सपरिजनो दण्डाय-मानः श्रीरामकृष्णं शकटमारोहयितुकाम आसीत्।

किमिति श्रीरामकृष्णस्तदानीमपि दण्डायमान एवासीत्? स मूलमन्त्रं करेण जपति स्म। जपन्नेव भावाविष्टो जातः। अहो, अहेतुककृपासिन्धु-रेवासौ! मन्ये गमनकाले महात्मनो विद्यासागरस्य आध्यात्मिकमङ्गलार्थं जगज्जननीसमीपे प्रार्थयमान आसीत्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीरामकृष्णः सभक्तः सोपानश्रेणीभिरवतरति स्म। स कस्यचिद् भक्तस्य हस्तं धृतवान्। विद्यासागरः स्वजनैः सह अग्र एव गच्छति स्म। दीपहस्तोऽसौ पन्थानं प्रदर्शयन्नगमत्। तिथिरसौ श्रावणी कृष्णा षष्ठी; तदानीमपि चन्द्रो न उत्थितः; तिमिरावृताया उद्यानभूमेर्मध्यत एव सर्वे दीपस्य क्षीणालोकं लक्षयन्तः प्रधानद्वारं प्रति समायान्ति स्म।

अथ यावदेव सभक्तः श्रीरामकृष्णः प्रधानद्वार-समीपमापन्नस्तावदेव मनोरमं दृश्यमेकमालोकयन्तः सर्वे दण्डायमानाः स्थिताः। पुरत एव वङ्गीयपरिच्छदधारी गौरवर्णः श्मश्रुलः कश्चित् पुरुषः; असौ ३६।३७-वार्षिकः; शिरसि शिखवत् श्वेतोष्णीषं धृतवान्; स वस्त्रं पादत्राणं गात्रावरणञ्च परिहितवान्; किमपि तस्य उत्तरीयं नासीत्। पुरुषोऽसौ श्रीरामकृष्णं दृष्ट्वैव भूमौ सोष्णीषं मस्तकमवलुण्ठयन् प्रणत एवातिष्ठदिति ते दृष्टवन्तः। अथ प्रणामानन्तरं दण्डायमानं तं श्रीरामकृष्णः प्रोक्तवान्—"अये, बलराम! अपि त्वम्? एतावत्यां रात्रौ?"

बलरामः (सहास्यम्)—चिरं समागतोऽस्मि। अत्रैव दण्डायमान एवासम्।

श्रीरामकृष्णः—अभ्यन्तरं कथं न गतोऽसि?

बलरामः—देव! सर्वे भवदालपनादिकं शृण्वन्ति स्म; अन्तरागमनेन किं पुनर्विरक्तिजननम्?

(इत्युक्त्वा हसन्नासीत् बलरामः)

अथ सभक्तः श्रीरामकृष्णः शकटमारोहति।

विद्यासागरः (माष्टारं प्रति मृदुस्वरेण)—यानपण्यं किं दास्यामि?

माष्टारः—मा तावद् भोः! सम्पन्नमेव तत्। विद्यासागरश्चान्ये च श्रीरामकृष्णं प्राणमन्।

अथोत्तरां दिशं प्रति परिचालितः शकटः। दक्षिणेश्वरकालिकायतनं गन्तव्यं शकटेन। तदानीमपि शकटनिबद्धलोचनाः सर्वे दण्डायमाना आसन्। मन्ये नु ते भावयन्ति—अहो, यस्य तावदीश्वरे एतावती प्रीतिः, यः पुनर्जीवानां प्रतिगृहं पर्यटन् वदति—ईश्वरप्रीतिरेव जीवनस्योद्देश्यमिति।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

४

गृहस्थान् प्रति उपदेशाः

१३-आगष्टः, १८८२-खृः

अथ दक्षिणेश्वरमन्दिरे श्रीरामकृष्णः केदारादिभक्तैः सार्धमालपन्नासीत्। अद्य खलु रविवासरः, श्रावणी अमावस्या, १३-आगष्टमासः, १८८२-खृष्टाब्दः। पराह्णिक-पञ्चघटिकावादनवेला। हालिशहरवास्तव्यः श्रीमत्केदारचट्टोपाध्यायः राजकीयगाणनिकपदेऽधिष्ठित आसीत्। बहुकालं स ढाकानगर्यामवसत्। तदानीं श्रीविजयकृष्णगोस्वामिमहोदयस्तेन साकं सदा श्रीरामकृष्णमधिकृत्य आलपितवान्। ईश्वरकथाश्रवणादेव तस्य चक्षुषी अश्रुपूर्णेऽभवताम्। स आदौ ब्राह्मसमाजभुक्तोऽभूत्।

श्रीरामकृष्णः स्वकीयकक्षाद् दक्षिणस्यां दिश्यवस्थितेऽलिन्दे सभक्त उपविशन्नासीत्। राम-मनोमोहन-सुरेन्द्र-राखाल-भवनाथ-माष्टारप्रमुखा भक्ताः समुपस्थिता आसन्। केदारोऽद्य श्रीरामकृष्णमुपलक्ष्य उत्सवमेकं व्यदधात्। समस्तमेव दिनमानन्देन अतिवाहितमभूत्। रामः कश्चित् सङ्गीतविशारदमानीतवान्, स एवागायत्। सङ्गीतावसरे श्रीरामकृष्णः समाधिस्थः सन् गृहस्थितायां क्षुद्रायां खट्वायां समुपाविशत्। माष्टारोऽन्ये च भक्तास्तस्य पादमूले निषण्णा आसन्।

अथ कथाः कथयन् श्रीरामकृष्णः समाधितत्त्वं बोधयति स्म। प्राह सः —"सति सच्चिदानन्दलाभे समाधिर्निष्पद्यते, तदा कर्मत्यागो भवति। यदैवाहं सङ्गीतविशारदस्य नाम कीर्तयामि तदैवासौ उपस्थितश्चेत् तर्हि ततः किं तन्नामग्रहणेन? कियत्क्षणं भोः गुञ्जन्ति वै मधुकराः? यावदेव पुष्पेषु न निलीयन्ते। साधकानां तु कर्मत्यागो नैव युज्यते—पूजा-जप-ध्यान-सन्ध्या-कवचादि-तीर्थानि सर्वाण्येव विधेयानि।

"लाभानन्तरं यदि कोऽपि विचारं कुर्यात्, तर्हि स यथा मधुपानरतो मधुव्रत ईषद् गुञ्जन्नास्ते।"

सङ्गीतविशारदेन सुष्ठु सङ्गीतं कृतम्; तेन प्रसन्नतामगात् श्रीरामकृष्णः। तं चावोचत्—"मानुषाणां तावदस्ति कश्चिन्महागुणः, यथा सङ्गीतविद्या; तस्यामस्ति ईश्वरस्य शक्तिर्विशेषरूपेण।"

सङ्गीतविशारदः—महाशय, केन तावदुपायेन लभ्येत स ईश्वरः?

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीरामकृष्णः—भक्तिरेव सारभूता। ईश्वरः खलु सर्वभूतेष्वास्ते; तत् कं नाम भक्तं व्यपदिशामि? यस्य मनस्तु सर्वदा ईश्वरे लग्नम्। किञ्च अहङ्काराभिमानसद्भावे न किमपि स्यात्। 'अहम्'-रूपे वल्मीके ईश्वरकृपा-रूपं वारि न सन्तिष्ठते; निर्गच्छत्येव। अहमेव यन्त्रम्।

(केदारप्रमुखान् भक्तान् प्रति)—"सर्वैरेव पथिभिः स ईश्वरः प्राप्तुं शक्यते। सर्वे धर्माः सत्याः। सौधशिरसि उपस्थितिरेव प्रकृतविषयः। तत्र त्वया इष्टकसोपानेन काष्ठसोपानेन वंशसोपानेन वा तदारोढुं शक्यते; रज्ज्वाऽपि वा तदारुह्येत। असंस्कृतेनापि वंशेनारोढं पारयसि।

"यदि त्वयोच्यते—अन्येषां धर्मेषु बहवः प्रमादाः कुसंस्काराश्च सन्तीति, तर्हि ब्रवीम्यहम्—सन्तु नाम, निखिलधर्मेषु प्रमादाः सन्त्येव। सर्व एव मन्यन्ते—मदीया घटिकैव यथासमयं प्रचलति। व्याकुलतयैव सिद्धिः। तस्मिन् प्रेम तथानु-रागश्च—तयोरपि सिद्धिहेतुत्वम्। स एव अन्तर्यामी; आन्तरमनुरागं व्याकुलतां च लक्षयति। अवधार्यतां तावत्—कस्यचित् पितुर्बहवः पुत्राः सन्ति। तेषु प्रवयस्काः केचित् 'बाबा' इति, केचिच्च 'पा पा' इति वा शब्दैः सुस्पष्टं तं सम्बोधयन्ति। पुनरतिशिशुपुत्रः केवलं 'बा' इति 'पा' इत्येवं वा तं समाह्व-यति। ये नाम 'बा' इति 'पा' इत्येवं वा पितरमाह्वयन्ति, किं पिता तेभ्यः क्रुध्यति नाम? पिता विजानात्येव—ते मामेव आह्वयन्ति, परं सुष्ठूच्चार-यितुं न क्षमा इति। सर्व एव पुत्राः पितृसविधे समाना एव।

"पुनर्भक्ता विविधैर्नामभिः तमेव सम्बोधयन्ति—एकमेवेश्वरमाह्वयन्ति। एकस्याः पुष्करिण्यास्तावत् चत्वारो घट्टाः। तत्र घट्ट एकस्मिन् जलं पिबन्तो हिन्दवो जलमिति व्यपदिशन्ति। मोहम्मदीयाः पुनरन्यद्घट्टे पिबन्तः 'पानि' इति कथयन्ति। परम् इंरेजा अपरस्मिन् घट्टे पिबन्तो 'वाटार' इत्यभिद-धते। तथान्ये लोका घट्टान्तरे 'एकोया' इत्येवमाहुः। एक एवेश्वरस्तस्य नाना खलु नामानि।"

२४-आगष्टः, १८८२-खृः

अथ श्रीरामकृष्णो भक्तैः सार्धं दक्षिणेश्वरमन्दिरे विराजति स्म। गुरु-वासरः, श्रावणस्य शुक्ला दशमी तिथिः, २४-आगष्टः, १८८२-खृष्टाब्दः।

सम्प्रति हाजरामहाशय-रामलाल-राखाल-प्रमुखाः श्रीरामकृष्णसन्निधौ निव-सन्ति स्म। श्रीयुक्तो रामलालः श्रीरामकृष्णस्य भ्रातुष्पुत्रः—कालिकायतने

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पौरोहित्यमाचरति। माष्टारः समागम्य दृष्टवान्—उत्तरपूर्वदिक्स्थिते दीर्घेऽलिन्दे हाजरामहोदयस्य समीपे तिष्ठन् श्रीरामकृष्ण आलपतीति। स भूमिष्ठः सन् श्रीरामकृष्णस्य पादपद्मवन्दनमकार्षीत्।

श्रीरामकृष्णः सहास्यवदनः ; माष्टारमाह—"पुनरपि द्वेचकवारमीश्वरविद्यासागरस्य दर्शनेन प्रयोजनम्। ननु आदौ तावत् रेखाङ्कनं सम्पाद्य शनैः शनैः वर्णविन्यासः क्रियते चित्रकारिभिः। तथा हि प्रारिप्सितायां प्रतिमायां प्रथमतो मृत्तिकास्थापनम्, द्वितीयतस्तल्लेपनं, ततः खड़िकारञ्जनम्, ततश्चान्ते विविधवर्णसंयोजनमिति यथाक्रमं सम्पाद्यन्ते। ईश्वरविद्यासागरस्य तु सर्वं प्रस्तुतम् ; केवलं चावृतमस्ति। कानिचन सत्कर्माणि करोत्यसौ, किन्तु स्वान्तरे किमस्तीति न जानाति, तदन्तरे तु सुवर्णमेवावृतं विद्यते। अन्तरे ईश्वरो राजतीति ज्ञातुं शक्येत चेत्, सर्वकर्माणि विहाय व्याकुलः सन् जीवस्तं प्रार्थयितुकामो भवेत्।"

श्रीरामकृष्णः माष्टारेण तिष्ठन् विसृजति वचांसि—क्वचिच्च पुनरलिन्दके भ्रमति।

श्रीरामकृष्णः—ननु स्वान्तःस्थितवस्तुपरिज्ञानार्थमेव कियता साधनेन प्रयोजनमस्ति।

माष्टारः—अपि अनारतमेव साधना कर्तव्या ?

श्रीरामकृष्णः—न हि, आदौ तावत् विशेषेण उद्योगः कर्तव्यः। ततश्च पुनर्नैव समधिकं परिश्रमेण प्रयोजनमस्ति। ननु यावद्धि उत्तालतरङ्ग-झञ्झावाताहतिः प्रादुर्भवति, नदीवक्रता चातिक्रमणीया स्यात्, तावदेव नाविकेन दण्डायमानेनैव अरित्रधारणं विधेयं भवेत्, अथ व्यपगतेषु चैतेषु तथा प्रयासो न करणीयः। नदीवक्रतायामतिक्रान्तायां तथा प्रवहति चानुकूलवायौ नाविकोऽपि सुखेनोपविशन् अरित्रे करसंयोजनमात्रं करोति। ततश्च वातवस्त्रस्य प्रसारणं विधायासौ ताम्रकूटं सज्जीकर्तुमुपविशति नाम। कामिनीकाञ्चनमहावातातिक्रमणादेव शान्तिः।

"केषाञ्चन योगिलक्षणानि दृश्यन्ते खलु। परन्तु तैरपि सावधानैर्भवितव्यम्। कामिनीकाञ्चने एव योगव्याघातके। ते हि योगभ्रष्टाः सन्तः संसार एव पतन्ति ; अभवन् नु वा तेषां कियद्भोगवासनाः। क्षीणासु तासु पुनरपि ईश्वराभिमुखं ते यास्यन्ति—भूयोऽपि सैव योगावस्था। किमवगम्यते त्वया 'सट्काकले'ति मत्स्याकर्षणयन्त्रम् ?"

माष्टारः—न हि देव ! न मया दृष्टम्।

श्रीरामकृष्णः—अमुष्मिन् (मदीये) देशे विद्यते। कस्मिंश्चित् अवनमिते वंशदण्डे वड़िशयुक्ता रज्जुर्बध्यते। वड़िशे च आमिषं निधीयते। अथ यावदेव

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मत्स्यैरामिषं ग्रस्यते तावदेव वंशदण्डः सपदि समुन्नतिमाप्नोति--प्राग् यथा तथा हि ऊर्ध्वमुखिता सम्पद्यते।

"ननु तुलादण्डकस्य एकतो भाराधिक्यं चेत्, नीचस्थशलाका ऊर्ध्व-शलाकया न समतामेति। तत्र निम्नस्था शलाका मन एव, तथैवोच्चैःस्थिता शलाका चेश्वर एव। द्वयोरेतयोः शलाकयोरेकत्वापादनमेव योगो नामेति।

"मानसीं स्थितिं विना योगो नैव स्यात्। संसारवायुना निरन्तरमेव प्रकम्प्यते मनोदीपः। यद्यसौ नाम प्रदीपः कथमपि न लोलायते तर्हि प्रकृत-योगावस्था सिध्यति।

"कामिनीकाञ्चने तावद् योगव्याघातके। विचारणीयं हि वस्तु। तथा हि किमस्ति तावन्नारीणां देहेषु? केवलं रक्तमांस-मेदो-नाड्यन्त्र-कृमि-मूत्र-विष्ठेत्यादीनि। किमिति तथाविधेष्वपि शरीरेषु रागः?

"मया तु राजसिको भाव आरोपितोऽभूत्—त्यागार्थमेव। अथ कदाचिदेवं नाम ममाभिलाषः समुत्पन्नो यत्--अकृत्रिमपट्टसूत्रादिखचितं परिच्छदं धारयामि, दधामि चाङ्गुल्यां तावदङ्गुरीयकं, नलिकायोगेन ताम्रकूट-सेवनमपि करोमि चेति। ततस्तथैव परिच्छदादिकं मया आदत्तम्--यदानीतं तु एभिः (मथुरमहोदयैः)। कियत्क्षणात् परं मनसे कथितं मया—भोः चेतः! इदमहो अकृत्रिमपट्टसूत्रादिशोभितं परिधेयं नाम। ततश्च परिमुच्य तन्निक्षिप्तम्। नातःपरं तस्मिन् रमते स्म चित्तम्। तद् जल्पितं मया—मनो रे! इदं नाम शालेति गात्रवस्त्रम्! अहो, एतन्नाम पुन-रङ्गुरीयकम्! इदमेव तावन्नलिकया ताम्रकूटसेवनम्! अथ विसृष्टानि तानि न कदाचिदपि चेतसि लब्धपदानि।"

सन्ध्या प्रायेणागता। गृहाद् दक्षिणपूर्वदिक्स्थितेऽलिन्दे गृहद्वारसमीपे श्रीरामकृष्णो मणिना रहसि कथयन्नास्ते।

श्रीरामकृष्णः (मणिं प्रति)--योगिचित्तं सदैवेश्वरे तिष्ठति--सततमेव आत्मस्थम्। योगिनेत्रमुद्भ्रान्तम्—दर्शनमात्रेणैव तद् गम्यते। यथा पक्षी अण्डं तापयति—सर्वमेव मनस्तदण्डं प्रति, उपरि दृष्टिमात्रमेव प्रसारितम्। भवतु, अपि तथाविधां छविं मां प्रदर्शयितुं शक्नोषि?

मणिः—यदाज्ञापयति देवः। चेष्टेऽहं यदि कुत्रापि लभ्यते।

सन्ध्या समागता। कालीमन्दिरे राधाकान्तदेवायतने चान्येषु गृहेषु च भृत्येन प्रज्वालित आलोकः। स्वीयां क्षुद्रां खट्वामधिरूढः श्रीरामकृष्णो जगज्जननीं निध्याय ईश्वरनामानि कीर्तयति स्म। गृहं धूनकेन सुरभी-कृतम्; एकपार्श्वत एकस्मिन् दीपाधारे प्रदीपो ज्वलति स्म। कियत्क्षणात्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

परं शङ्खघण्टं निनादितम्। कालिकायतने नीराजनं प्रचलति स्म। शुक्ला दशमी तिथिः। चतुर्दिक्षु चन्द्रालोकः।

आरात्रिकात् किञ्चित् परं श्रीरामकृष्णः क्षुद्रायां खट्वायामासीनो मणिना सार्धं स्वयमेव नानाविषयानाचष्ट। मणिर्भूमावुपविष्टः।

श्रीरामकृष्णः (मणिं प्रति)—निष्कामं कर्म कुर्याः। ईश्वरविद्यासागरो यत् कर्म करोति तन्नाम साधु; निष्कामं कर्म कर्तुमीहते स एव।

मणिः—अथ किम् भगवन्। भवतु, यत्र कर्म किं तत्रेश्वरो लभ्यते? किं नाम रामकामयोरेकत्रसमावेशः सम्भवेत्? हिन्दीभाषायां कश्चिदा-भाणकस्तदा पठितो मया—

"यत्रास्ति रामो न च तत्र कामः।
कामोऽस्ति चेन्नास्ति पुनस्तु रामः॥" इति

श्रीरामकृष्णः—ननु कर्म सर्वैरेव क्रियते—तन्नामगुणगानमपि कर्मैव। यत्तु सोऽहंवादिनां 'अहमेव तदस्मी'ति चिन्तनं तदपि कर्म। अपि निःश्वास-क्रियादिकं—तदपि कर्म। कर्म त्यक्तुं न शक्यते, अतः कर्माणि साध्यन्ताम्, फलन्तु ईश्वर एव समर्प्यताम्।

मणिः—देव! किं मया चेष्टितव्यं यथा बाहुल्येन अर्थागमः स्यात्।

श्रीरामकृष्णः—विद्यासंसारस्य कृते एवं कर्तुं पार्यते। बाहुल्येन अर्थार्जनं चेष्टनीयं, परं तु सदुपायेन। न हि तावदुपार्जनमेव लक्ष्यम्। ईश्वरसेवैव उद्देश्यम्। अर्थेन यदि ईश्वरसेवा सम्पद्येत तर्हि तदर्थस्तु न दोषाय।

मणिः—एवमेव, ननु कियद्दिनानि तावत् परिवारान् प्रति कर्तव्यम्?

श्रीरामकृष्णः—यावद् ग्रासाच्छादनेषु तेषां न कष्टं; परं सन्तानाः स्वयं समर्थाश्चेत्, कृतं तेषां भारग्रहणेन। पक्षिशावको हि गुटिकोच्चये क्षमोऽपि पुनराहारार्थं मातुः सकाशमुपगतश्चेत्, मात्रा वारित एव स्यात्।

मणिः—अथ कानि दिनानि यावत् कर्म कर्तव्यं नाम?

श्रीरामकृष्णः—फलोद्गमे जाते पुष्पं खलु प्रलीयते। ईश्वराप्तौ च कर्मावसरो नास्ति, मनोऽपि तदा कर्मणि न सज्जति।

"मदिरापायी अतिशयेन मदिरां पिबन् विचारशक्तिं स्थापयितुं न शक्नोति; किञ्चित्पानेन खलु कर्म प्रचलितुमर्हति। यावद् यावद्धि त्वमीश्वरसमीपगो भविष्यसि, तावत्तावच्च ईश्वरस्ते कर्माणि श्लथयिष्यति। भयं नास्ति। गृहस्थवध्वामन्तःसत्त्वायां श्वश्रूमाता क्रमशो वध्वाः कर्म ह्रासयति। दशसु मासेषु व्यतीतेषु तस्या मनागपि कर्मानुष्ठानं नानुजानाति। सञ्जाते चापत्ये वधूस्तदेव क्रोड़े कृत्वा सञ्चालनादिकं करोति।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"यावन्ति कर्माणि सन्ति तावतां परिक्षये जीवो निश्चिन्तो भवति। समाप्तपाकादिकृत्या गृहिणी स्नातुं गता, तदा पुनर्नायाति, भृशमाहूयमानाऽपि सा नागच्छेत्" इति।

मणिः—देव ! ईश्वरलाभः—को नाम अस्यार्थः ? किं वा ईश्वरदर्शनमित्याख्यायते ? कथं वैतत् सम्पद्यते ?

श्रीरामकृष्णः—वैष्णवास्तावदेवमाहुः—ये नाम ईश्वरपथेन गच्छन्ति, ये वा तं लब्धवन्तः, तेषां श्रेणीविन्यासो वर्तते—प्रवर्तकाः, साधकाः, सिद्धाः, सिद्धानां सिद्धाश्च। यः सद्य ईश्वरपथमारूढः स प्रवर्तक इत्यभिधीयते ; यः साधनभजनादिकं करोति, पूजाजपध्यान-नामगुणकीर्तनादिकं कुर्वन्नास्ते स जनः साधकः। यस्य ईश्वरोऽस्तीति प्रतिबोधविदितम्, स सिद्ध इत्युच्यते। यथा वेदान्तेऽस्ति उपमा—अन्धकारावृतं गृहं, प्रभुस्तत्र शयान आस्ते। तं कश्चिद् हस्तामर्शेनान्विष्यति। असौ कञ्चित् पर्यङ्कं स्पृष्ट्वा ब्रूते—'नायम्' ; गवाक्षं स्पृष्ट्वा च वदति—'नायम्', तथा द्वारे हस्तौ निधाय भणति—'नायम्' ; 'नेति नेति नेति'। शेषे तेन प्रभोर्गात्रे हस्तौ न्यस्तौ, तदा ब्रवीति—'इह, अयमेव प्रभुः'—अर्थात् प्रभुरस्तीति बोधस्तस्य सञ्जातः। प्रभुस्तावल्लब्धः, किन्तु विशेषेण न ज्ञातः।

"अस्त्यपरा काचित् श्रेणी—सा हि सिद्धानां सिद्ध इति व्यपदिश्यते। प्रभुणा सह यदि विशेषालापः स्यात् तर्हि अन्यरूपा अवस्था—यदि ईश्वरेण सह प्रेमभक्तिभ्यां विशेषालापो जायते। यस्तु सिद्धः स खलु केवलमीश्वरं लब्धवान्, परं यस्तावत् सिद्धानां सिद्धः स ईश्वरेण सविशेषमालपितवान्।

"किन्तु तल्लाभार्थं पुनः शान्त-दास्य-सख्य-वात्सल्य-मधुराणां यः कश्चिदन्यतमो भावः समाश्रयितव्यः स्यात्। तत्र—

"शान्तो भावः—ऋषीणामासीत्। ईश्वरादन्यद् भोक्तुं तेऽभिलाषिणो नासन्। यथा स्त्रियाः स्वामिनि निष्ठा ; जानात्येवासौ—मत्पतिः कन्दर्प एव।

"दास्यं तावत्—यथा हनुमतः। रामकर्मसाधने स खलु सिंहायते। स्त्रिया अपि दास्यभावोऽस्ति ; प्राणैरपि सा स्वामिनं सेवते। मातुरपि दास्यभावो लेशतोऽस्ति। स यशोदाया अप्यासीत्।

"सख्यं हि—बन्धुभावः। एह्येहि, मदन्तिकमागत्योपविश। श्रीदामादयः क्वचित् कृष्णेन निजोच्छिष्टं फलं खादयन्ति, कदाचिद्वा तस्य स्कन्धमारोहन्ति।

"वात्सल्यं—यथा यशोदायाः। स्त्रियाश्च कियदेतदस्ति—प्राणान् विदार्यैव स्वामिनमाशयति। उदरं प्रपूर्य पुत्रश्चेद् भूङ्क्ते तर्हि माता सन्तुष्टा। कृष्णेन भक्षितव्यमिति कृत्वा यशोदा नवनीतहस्ताऽभ्रमत्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"मधुरभावो—यथा श्रीमत्याः (राधिकायाः)। स्त्रिया अपि मधुरभावः। भावेऽस्मिन् सर्व एव भावाः सन्ति—शान्तदास्यसख्यवात्सल्याख्याः।"

मणिः—किमनेनैव चक्षुषा ईश्वरदर्शनं स्यात् ?

श्रीरामकृष्णः—न तु तं शक्यते द्रष्टुमनेनैव चर्मचक्षुषा। भृशं साधनामाचरतः पुनर्जायते प्रेममयमेकं शरीरम्—तस्यैव प्रेममयं चक्षुः, प्रेममयश्च कर्णः। तेनैव च चक्षुषा ईश्वरो दृश्यते ; तेनैव च कणन तस्य वाणी श्रूयते। पुनः प्रेममयं लिङ्गं तथा योनिरपि प्रेममयी जायते इति।

एतच्छ्रुत्वा मणिरुच्चैर्हसितवान्। विरक्तिमप्रकटयन् श्रीरामकृष्णः पुनराह—"प्रेममये शरीरेऽस्मिन् आत्मना सह रमणं भवति।"

मणिः पुनर्गाम्भीर्यमाधत्त।

श्रीरामकृष्णः—यदि ईश्वरे परं प्रेम नोपजायते तर्हि किमपि न स्यात्। तस्मिन् परमप्रेम्नि सति चतुर्दिक्षु कृत्स्नमीश्वरमयं दृश्यते। नितरां पीतरोगे सञ्जात एव चतस्रो दिशः पीतमय्यः प्रेक्ष्यन्ते।

"तदैव स एवाहमिति बोधो जायते। मत्ततातिशये मद्यपः प्रलपति—'अहमेव काली'ति।

"गोपीकुलं प्रेमोन्मत्तम् एव भणितुं प्रारभत—'अहमेव कृष्ण' इति।

"रात्रिन्दिवं तस्य (ईश्वरस्य) चिन्तनेन स चतुर्दिक्षु दृश्यते—यथाऽनन्यदृष्ट्या प्रदीपशिखावलोकनाद् दिक्चतुष्टयं शिखामयमाभासते" इति।

मणिश्चिन्तयति—न हि सा शिखा यथार्थेति।

श्रीरामकृष्णोऽन्तर्यामी ; तदाह—"चैतन्यं चिन्तयतो नाचैतन्यमापद्यते। उक्तं किल शिवनाथेन—'शतश ईश्वरभावनेन जनो मतिभ्रष्टतामेति।' स च मयोक्तः—'ननु चैतन्यभावनया किं पुनरचैतन्यमापद्यते ?'"

मणिः—देव, बुध्यते मया। नूनं नैतत्तु अनित्यस्य कस्यापि विषयस्य चिन्तनम्। यन्नित्य-चैतन्यस्वरूपं तस्मिन् मनो न्यस्य मानवाः कथमचैतन्याः स्युः ?

श्रीरामकृष्णः—(प्रसन्नः सन्)—इयमेव हि तदीया कृपा नाम। न हि तत्कृपां विना सन्देहभञ्जनं जायते।

"आत्मसाक्षात्कारादृते सन्देहनिरासो न सम्भवेत्।

"यदि तस्य कृपा विलसेत्तर्हि भयं नास्ति। ननु पितृकरं विधृत्य गच्छन्नपि पुत्रः कदाचिन्निपतेत्, परन्तु पिता चेत् पुत्रस्य पाणिं धारयेत्, तर्हि नास्ति भीः। स कृपया चेत् सन्देहभञ्जनं कुर्यात् स्वात्मानं च प्रदर्शयेत्, तर्हि किमपि कष्टं नास्ति। अपि तु तदवाप्तये नितरां व्याकुलतया अनारतं क्रियमाणेन स्मरणेन साधनेन च तस्य कृपा प्रजायते। सातिशयं धावन्तं पुत्रमालोक्य

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

माता तस्य दयते। एतावन्माता प्रच्छन्नाऽसीत्, अधुना सपद्येव आविर्भूता सती पुत्राय दर्शनं ददाति" इति।

मणिस्तर्कयति—"किमिति सा सुतान् धावयति?" तत्क्षणादेव श्रीरामकृष्णोऽभ्यधात्—"किञ्चिद्धावनं भवत्विति तस्या इच्छैव। तेनैव आमोदो भवति। सा लीलार्थमेव संसारमिमं रचितवती। सैव महामायेति। अतस्तस्याः शक्तिरूपिण्याः मातुः शरणागत्या प्रयोजनम्। सा मायापाशेनास्मान् संबद्धवती। यदि पाशोऽयं छेत्तुं शक्येत तर्हि ईश्वरदर्शनं भवितुमर्हति।"

श्रीरामकृष्णः—तत्कृपालाभ इष्टश्चेत्, आद्यशक्तिप्रसादनं कार्यम्। सा महामायेति। सैव जगत् संमोहयन्ती सृष्टिस्थितिप्रलयान् प्रकुरुते। तयैव सर्वमज्ञानीकृतम्। महामायया द्वारे विमुच्यमाने अन्तःप्रवेशनं शक्यम्। ननु बहिरेवावस्थितैः केवलं बहिःस्थितमेव दृश्यते वस्तु, न तु तैः नित्यसच्चिदानन्दमयः स पुरुषो ज्ञातुं शक्यते। तस्मात् पुराणेषु वर्णितमस्ति, तथा देवीमाहात्म्ये च—मधुकैटभवधसमये ब्रह्मादयो देवा महामायां स्तुवन्तीति।

"शक्तिरेव जगतो मूलाधारः। तस्यामाद्यशक्तौ विद्याऽविद्ये उभ एव वर्तेते। अविद्या तावन्मोहयति। अविद्या एव कामिनीकाञ्चनेषु मोहं तनोति। विद्यातो भक्तिर्दया ज्ञानं प्रेम च सम्भवन्ति—लोकम् ईश्वरपथञ्च नयन्ति।

"तामविद्यामेव प्रसादयेदिति शक्तिपूजापद्धतिरिह प्रवर्तिता नाम।

"प्रसादनार्थमेव तस्या विविधभावतः पूजा—दासीभावतो वीरभावतस्तथा सन्तानभावतः। रमणेन तस्याः प्रसादनं वीरभावः।

"शक्तिसाधना नाम—तस्याः खलु अत्युत्कटानि अङ्गान्यासन्; न तु तत्र कैतवं किमपि। अहं मातुर्दासीभावेन सखीभावेन च वर्षद्वयमासम्। तथापि मम तु सन्तानभावः। नारीस्तनमेव मातृस्तन इति मन्ये।

"नार्यस्तावत् प्रत्येकं शक्तिस्वरूपाः। प्रतीचां तु विवाहकाले वरस्य हस्ते छुरिका काचित् वर्तते, वङ्गदेशे तु पूगकर्तरिका प्रदीयते। अर्थात्—अस्याः शक्तिरूपायाः कन्यायाः साहाय्यमासाद्य वरो मायापाशं छेत्स्यति। एष खलु वीरभावः। न च वीरभावमाश्रित्य पूजितं मया। मम तावत् सन्तानभावः।

"कन्या शक्तिरूपैव। किं न दृष्टं भोः—विवाहसमये निर्बुद्धिरिव वरः पश्चादुपविष्टस्तिष्ठति। कन्या तु निःशङ्काऽऽस्ते।"

"ईश्वरलाभे सति तद्बाह्यैश्वर्यजगद्वैभवविस्मृतिः स्यात्। तमीश्वरं पश्यतो जनस्य तदैश्वर्यध्यानं मनसि नावतिष्ठते। ईश्वरानन्दे निमग्नस्य भक्तस्यान्यत् किमपि गणनं न विद्यते। दृष्टे नरेन्द्रे 'किं ते नाम?

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कुत्र ते निवास' इत्येवंविधैः प्रश्नैर्नैव प्रयोजनं भवति। कुतो वा प्रश्नावसरः ? हनुमन्तं कश्चित् पप्रच्छ--'का नामाद्य तिथिः ?' हनुमानवोचत्—'भ्रातः, नाहं वारतिथिनक्षत्राणि सर्वाण्येतानि जानामि, अहमेकं राममेव चिन्तयामि' इति।

१६-अक्टोबरः, १८८२-खृः

अद्य श्रीरामकृष्णो महानन्देन आस्त। दक्षिणेश्वर-कालिकायतने नरेन्द्रः समायातः। अपरे केचिदन्तरङ्गा भक्ता अपि समवेताः। नरेन्द्रस्तस्मिन् देव्यायतने स्नानं विधाय प्रसादमगृह्णात्।

अद्य खलु आश्विनमासस्य शुक्लपक्षीया चतुर्थी तिथिः, १८८२-खृष्टाब्दस्य १६-अक्टोबरः, सोमवासरः। तत आगामिनि बृहस्पतिवारे सप्तम्यां तिथौ श्रीश्रीदुर्गापूजा भविष्यति।

राखाल-रामलाल-हाजरामहोदयाश्च श्रीरामकृष्णसन्निधौ वर्तन्ते स्म। केचनान्ये ब्राह्मसमाजीया युवानोऽपि समागता नरेन्द्रनाथेन सार्धम्। माष्टारश्चापि समुपस्थितः। नरेन्द्रः श्रीरामकृष्णस्यान्तिके आहारं कृतवान्। आहारान्ते—श्रीरामकृष्णस्तत्कक्षभूमौ शय्यारचनार्थमादिशत् यतो नरेन्द्रादि-भक्तास्तत्र विश्राम्येयुः—विशेषतः नरेन्द्रनाथः। कटस्योपरि प्रावारोपधानानि समुपन्यस्तान्यासन्। श्रीरामकृष्णोऽपि बालकवत् शय्यायां नरेन्द्रस्य समीपे समुपविष्टोऽभूत्। भक्तैः साकं, विशेषतो नरेन्द्रेण, नरेन्द्राभिमुखः सन् सस्मितं महानन्देन कथां कथयति स्म। आत्मावस्थामात्मचरित्रञ्च कथाच्छलेन वर्णितवान्।

श्रीरामकृष्णः (नरेन्द्रादिभक्तान् प्रति)--मम तावत् ईदृशावस्थानन्तरम् ईश्वरकथाश्रवणार्थं व्याकुलता समजनि। कुत्र श्रीमद्भागवतं, कुत्र वा अध्यात्मरामायणं, कुत्र च महाभारतमालोच्यन्त इति मृगयन्नभ्रमम्। एड़िया-दहवास्तव्यस्य कृष्णकिशोरस्य सकाशमध्यात्मरामायणं श्रोतुं गतवानहम्।

"अहो, कियांस्तावत् कृष्णकिशोरस्य विश्वासः! क्वचिद् वृन्दावनं गतोऽसौ ; तत्रैकदा तस्य जलतृष्णा जाता। कूपसमीपं गत्वासौ जनं कञ्चिद् दण्डायमानमपश्यत्। कृष्णकिशोरेण पृष्टोऽसौ अवदत्—'नीचजातिरहं, भवांस्तु ब्राह्मणः ; कथं भवत्कृते जलमुत्तोलयामि ?' कृष्णकिशोर आह—'शिव इति उच्चार्यतां भोः ! शिवः शिव इत्युच्चारणात् त्वं शुद्धतां यास्यसि।' स शिवः शिव इति ब्रुवन् जलमुत्तोल्य तस्मै दत्तवान्। एवंविधाचारवान् ब्राह्मणस्तदेव जलमपिबत्। अहो, कीदृग् विश्वासः ?"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"अथ कदाचित् एड़ियादहस्थगङ्गाघट्टे समागतः कश्चित् साधुः। आवामेकदा तं द्रष्टुं गमिष्याव इति चिन्तितं मया। हलधारिणमहमवदम्—'कृष्णकिशोरोऽहञ्च—'आवां साधुं द्रष्टुं गमिष्यावः। किं यास्यसि?' प्रत्युक्तं हलधारिणा—'अपि मृन्मयमेकं पिञ्जरं द्रक्ष्यामि? एतेन किं स्यात्?' हलधारी नाम गीतावेदान्तौ अधीते! अतस्तेन साधुर्मृन्मयपिञ्जरम् इति भणितम्। एतन्मया कृष्णकिशोराय आवेदितम्। स तु नितरां रुषं गतः, एवञ्चाह—'किं भोः, एवमुक्तं नु हलधारिणा? य ईश्वरं चिन्तयति, यो रामं चिन्तयति, तदर्थञ्च येन सर्वत्यागो रचितः, किं तस्य देहो मृत्तिकापिञ्जरम्? भक्तस्य देहश्चिन्मय इत्यसौ न जानाति!' कालीवाटिकायां कृष्णकिशोरः पुष्पचयनार्थमागच्छति स्म—हलधारिणं प्रति तस्येदृशः कोप आसीद् यद् हलधारिणा साक्षात्कारे संवृत्ते स्वमुखमसौ पर्यवर्तयत्। नालापं तेन करिष्यतीति निश्चयः!

"कथं त्वया यज्ञोपवीतं विसृष्टमिति स कदाचिन्मां पृष्टवान्। मम तावद् एवंविधायां दशायाम् आश्विनझटिकावत् किमपि प्रादुर्भूय कुत्र वा किं नास तु सर्वं निःसारितमिति नैव जाने। पूर्वस्थितानां किमपि चिह्नं नावशिष्टम्। नास्ति अवधानम्! ननु परिहितं वसनमपि स्खलितमभूत्तदा, कथं यज्ञोपवीतं तिष्ठेत्? मयासौ प्रत्युक्तः—'तवापि सकृदुन्मादावस्था भवतु; तदैव त्वयावगन्तव्यम्।'

"अभूच्च तथैव। तस्यैव स्वकीयोन्मत्ततामाविरासीत्। तदैवासौ ॐ ॐ इति केवलमुदीरयन् एकस्मिन्नेव गृहे तूष्णीमेव समुपाविशत्। 'शिरसो विकृतिर्जातेति सर्वैस्तदर्थमाकारितः भिषक्। आयातस्तु रामो नाम नाटागड़-वासी। कृष्णकिशोरस्तमभ्यधात्—'अयि भोः, रोगो मे दूरीक्रियताम्, किन्तु ऊह्यताम्, यावत् ॐकारो मे दूरङ्गतो मा भूत्!' (सर्वेषां हास्यम्)

"कदाचित् तमुपगम्याहम् अद्राक्षम्—स चिन्तयन्नास्त इति। अपृच्छ-महम्—'अये, किं जातम्?' स आह—'शुल्कग्राहकः कश्चित् समायातः। तस्माच्चिन्तयामि।' उक्तं हि तेन शुल्कग्राहिणा—"यदि नामाहं शुल्कं न ददामि तर्हि घटपात्रादिकं सर्वमेव विक्रीय अर्थास्तेन संग्रहीष्यन्ते।" मयोक्तम्—'किं वा भावनया? घटपात्रादिकमपि नेष्यतीति वा स्यात्। बद्ध्वा नयतु वा! न पुनस्त्वमपि नेतव्यः। यतः 'ख'मेवासि त्वम्।' (नरेन्द्रादीनां हास्यम्) कृष्णकिशोरः प्रोक्तवान्—'आकाशवदस्मी'ति। असौ ननु अध्यात्मरामायण-पठनशील आसीत्। क्वचित् क्वचित् त्वं 'ख'मसीति वदता मया स परिहसितः। सस्मितमहमवदम्—'त्वं हि 'ख'मेव; शुल्कग्राही त्वां ग्रहीतुं न क्षमः।'

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"उन्मादावस्थायां पुनः सर्वानेव लोकान् स्पष्टयथार्थवचनमेव उक्तवानहम् ; कस्याप्यपेक्षणं न कृतवान् ; धनिनः पश्यतोऽपि मे भयं नाभूत् ।

"कदाचिद् यदुमल्लिकस्योद्यानवाटिकायां यतीन्द्रः समागतः। अहमपि तत्रासम् । स मया पृष्टः—'किं तावत् कर्तव्यम् ? ईश्वरचिन्तनमेव अस्माकं कर्तव्यं न वा ?' यतीन्द्रः प्रावोचत्—'संसारिणो वयम्। किं नस्तावन्मुक्तिरस्ति ? राजा युधिष्ठिरोऽपि नरकदर्शनं चकार ।' एतेन मे महान् क्रोधः सञ्जातः। उक्तवानहम्—'कीदृशो जनस्त्वम् ? ननु युधिष्ठिरस्य नरकदर्शनमेव केवलं मनसि धारयसि ? युधिष्ठिरस्य सत्यकथनं, क्षमा, धैर्यं, विवेकः, वैराग्यम्, ईश्वरे भक्तिश्चैतानि ते मनसि किं नायान्ति ?' ततोऽप्यधिकन्तु वक्तुमुद्यत आसम्, मुखं मे हृदयनाथेन करावनद्धं कृतम्। यतीन्द्रः कियत्क्षणानन्तरमेव 'वर्तते मे किञ्चित् करणीयमि'ति कथयन् प्रस्थितः।

"अनेकेभ्यो दिनेभ्यः परं काप्तेनेन सार्धं सौरीन्द्रठाकुरस्य वाटिकां गतोऽहम् । तं दृष्ट्वाऽवदम्—नाहं त्वां राजेति वक्तुमलम्। कुतः ? तत् खलु मिथ्याकथनं भवेत्। मया सह किञ्चिन्नाम आलपनं कृतवानसौ। ततोऽद्राक्षम्—इंरेजादयो गतागतमारभन्त । रजोगुणात्मकोऽयं पुरुषः, नानाकर्मभिर्व्यस्त एव। यतीन्द्राय तु वार्ता विसृष्टा । गलदेशे मे वेदना जातेति स व्यज्ञापयत्।

"तस्याम् उन्मादावस्थायां कदाचिद् वराहनगरघट्टे जयमुखोपाध्यायं जपन्तमपश्यम् ; किन्तु अन्यमनस्कोऽसौ ! ततोऽहमुपसृत्य तस्मै द्विश्चपेटाघातं दत्तवान्।

"एकदा रासमणिर्देवतायतनमागता। सा कालिकामन्दिरमायात् । पूजावसरे प्रायः समुपस्थिता सा मे द्वयेकसङ्गीतकरणाय आवेदयति स्म। गीतं कुर्वन्नहमपश्यम्—सा अन्यमनस्का सती कुसुमसंकलने व्यापृतेति । तत्क्षणादेव द्विश्चपेटाघातः ! तदा सम्भ्रान्ता सा कृताञ्जलिरवर्तत ।

"हलधारिणम् उक्तवानहम्—भ्रातः, कीदृग् वतायं स्वभावो मे सञ्जातः ! किं करोमि ? तदानीं भृशं जगन्मातरमाह्वयतो मे स स्वभावस्तिरोहितः ।

"तस्यामेव अवस्थायाम् ईश्वरकथां विना नान्यत् किमपि मे रोचते स्म। विषयकथा प्रचरतीति श्रुत्वा उपविशन्नक्रन्दम् । यदा मथुरमहोदयो मां नीत्वा तीर्थं गतस्तदा वयं काशीनगर्यां राजमहोदयस्य गृहे कति दिवसान् अतिष्ठाम । मथुरमहोदयेन सह बहिःप्रकोष्ठे उपविष्ट आसम् ; राजमहोदय-प्रभृतयोऽपि आसीनाः । ते विषयकथां कुर्वन्तीति अपश्यम् । मुद्राणामेतावती क्षतिर्जातेति कथा। अहं क्रन्दितुमारभे, अवदञ्च—'मातः, कुत्रानीतोऽस्मि त्वया ? अहं तावत् रासमणेर्मन्दिरे परमसुखेनासम् । तीर्थागमनात् परमपि सैव कामिनीकाञ्चनकथा ! किन्तु तत्र दक्षिणेश्वरे नु विषयकथा श्रवणीया नासीत् ।"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीरामकृष्णो भक्तान्, विशेषतो नरेन्द्रं, कियद्विश्रामार्थम् आदिशत् ; स्वयमपि क्षुद्रखट्वोपरि किञ्चिद्विश्रामाय गतः।

अपराह्णः समायातः ; नरेन्द्रो गायति ; राखालः, लाटुः, माष्टारः, नरेन्द्रस्य ब्राह्मबन्धुः प्रियः, हाजरामहोदयश्च—सर्वे उपस्थिताः।

नरेन्द्रः कीर्तनमगायत्, मृदङ्गो ध्वनति स्म—

"चिन्तय मम मानस हरिम्....."(द्रः, ५-३-८२)

पुनरपि नरेन्द्रो गीतवान्—

"नित्यं राजति चित्तमन्दिरगतं सत्यं शिवं सुन्दरं
दर्शं दर्शमशेषरूपजलधौ मग्नः पुनः स्यामहम्।
किञ्चायं दिवसो भविष्यति नु मे दीनस्य भाग्यादहो
ज्ञानानन्तविशेषरूपमतुलं चित्तप्रविष्टं भवेत्॥
किं मे व्याकुलमन्तरं हि शरणं त्वत्पादमालप्स्यते
त्वं मे प्राणसखस्तवामलपदे शान्ते शिवे वा कदा।
विक्रीतः किल हा भवानि नितरां भो राजराजेश्वर !
येन स्यान्मम जन्मकर्म सफलं स्वर्गाद्यधिकग्रहात्॥
तत्पादाम्बुजलाभदिव्यमहिमप्राप्ताधिकारात् पुन-
र्नान्यद् किञ्चन वर्तते बहुमतं विश्वेषु विश्वेश्वरः।
शुद्धं पापकलङ्कलेशरहितं नाथ ! त्वदीयं महः
संरुद्धान्तरवृत्तिचित्तगगने लब्धोदयं पश्यतः।
पापं याति लयं यथेह किरणैर्गाढ़ान्धकारः खलु
दिव्यज्योतिरमन्दमेव सततं तस्यान्तरे दीप्यति॥
त्वत्साक्षात्करणान्मनागुदयते चित्ताम्बरे प्रोज्ज्वलः
दिव्यानन्दसुधासुधाकरवरः पीयूषनिष्यन्दकः।
तं दृष्ट्वा परमं प्रकाशममलं ह्लादप्रकर्षादथ
मत्तं मे भवभीतिलेशरहितं चित्तं चकोरायताम्॥
त्वं भूया ध्रुवतारका मम सदा विश्वासदीप्त्युज्ज्वला
त्वं प्रज्वालय जाड्यपूर्णहृदये ज्ञानप्रदीपत्विषम्।
तेनास्मिन् परिपूर्णमस्तु मनसः संप्रार्थनं सर्वथा
प्रेमानन्दसुधाब्धिमग्नहृदयो नित्यं विभो स्यामहम्॥
लब्ध्वा त्वामरिबलार्तिनाशनकरं सर्वार्थसिद्धिप्रदं
पूर्णं विश्वसमस्तवस्तुवपुषं सच्चित्सुखैकाश्रयम्।
आत्मानं किल विस्मराणि हि यदा व्यासक्तहर्षोच्चयः
स्यान्मे तद्दिवसः कदा ननु मम प्राणेश्वर प्राणद॥"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पुनः सङ्गीतम्—

"आनन्ददीप्तवदनः परमेशनाम
गायत्वरे निशि दिने मधुरं पवित्रम् ।
नाम्ना सुधाजलधिरुच्छ्वसितो भवेद्धि
पीयूषराशिममलं पिब, देहि भूयः ॥
शुष्कं कदा यदि भवेद् हृदयं वता रे
तद् गीयतां परमुदा विभुनामगानम् ।
पीड्येत चेद् विषयतृष्णिकया भवेऽस्मिन्
नाम्नैव ते सरसतामुपयाति चित्तम् ॥
(तं मन्त्रमेव न कदा भुवि विस्मरेथाः
तञ्चाह्वयेः 'सदय तात' नितरां विपत्तौ)
छिन्धीममत्र सकलं दुरितोत्थबन्धं
हुङ्कारपूर्वकमरे जयनादयुक्तम् ।
ब्रह्माख्यमोदरभसा परिपूर्णकामाः
सर्वे भवामः सुचिरं परयोगयुक्ताः ॥"

करतालिकया सह मृदङ्गमादाय कीर्तनं प्रचलति स्म । नरेन्द्रादयो भक्ताः श्रीरामकृष्णं परिवेष्टयन्तः अकीर्तयन् । क्वचित्तेऽगायन् "प्रेमानन्दरसाम्बुधौ चिरमहो चेतस्त्वया मज्यताम्....." ; पुनः कदापि वा गीतवन्तः—"सत्यः शिवो हृदि विभाति चारुमूर्त्या....." इति ।

अथ नरेन्द्रनाथः स्वयं मृदङ्गमादाय मत्तः सन् श्रीरामकृष्णेन सह गायति स्म "सदानन्दवक्त्रैर्हरेर्नाम कुर्यात्....." इति । कीर्तनान्ते श्रीरामकृष्णो भूयो भूयोऽनेकक्षणान् नरेन्द्रमालिङ्गितवान् । उक्तवांश्च "त्वमद्य मे यादृशमानन्दं दत्तवान् नाहं तं वर्णयितुं शक्नोमि ।"

अद्य श्रीरामकृष्णस्य हृदयमध्यस्थस्य प्रेम्ण उत्स उच्छ्वसितो जातः । रात्र्या अष्टघटिका वादितकल्पा । तथापि स प्रेमोन्मत्तः सन् एकाकी अलिन्दे विचरन्नासीत् । उत्तरदिग्वर्तिनि दीर्घालिन्दे समुपस्थितः सन् द्रुतं तस्यालिन्दस्य एकसीमायाः सीमान्तरं यावत् पादचारणं कृतवान् । अन्तराऽन्तरा जगन्मात्रा सह कामपि कथामकथयत् । अकस्मादुन्मत्तवदुक्तवान्—"त्वं मे किं करिष्यसि ?" जगन्माता यस्य सहायभूता माया तस्य किं कर्तुं प्रभवतीति स वदति किम् ?

नरेन्द्र-माष्टार-प्रियनाथाः रात्रौ स्थास्यन्ति । नरेन्द्रनाथः स्थास्यतीति हेतोः श्रीरामकृष्णस्य आनन्दसीमा नासीत् । रात्रिकालीन आहारः प्रस्तुतः । श्रीश्रीमाता वाद्यभवने निवसति स्म । भक्ता ग्रहीष्यन्तीति कृत्वा रोटिका-चणकसूपा-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दीनि उपकल्प्य सा प्रेषितवती। अन्तराऽन्तरा भक्तास्तत्र तिष्ठन्ति। सुरेन्द्रः खलु प्रतिमासं व्ययनिर्वाहार्थं कियदर्थं ददाति।

आहारः प्रस्तुतः। गृहाद् दक्षिणपूर्वतः अलिन्दे आसनानि कल्प्यन्ते। गृह-पूर्वतो द्वारान्तिके नरेन्द्रादयः कथोपकथनं कुर्वन्ति।

नरेन्द्रः--इदानीं युवानस्तावत् कीदृशाः किं दृश्यन्ते ?

माष्टारः--न ते मन्दाः। अपि तु धर्मोपदेशः कोऽपि नास्ति।

नरेन्द्रः--स्वयं यत् प्रत्यक्षीकृतं तेन मया मन्यते--सर्वे अधःपातं यान्ति। 'बार्डसाइ' इति सिग्रेट्सेवनं, नर्मवाचालता, विलासिता, विद्यालय-पलायनञ्च इत्येतानि सर्वदैव लक्ष्यन्ते। एतदपि दृष्टं--ते कुस्थानमपि गच्छन्ति।

माष्टारः--वयं यदा विद्याभ्यासमकुर्म, एतद्रूपं तु न दृष्टं न श्रुतमपि।

नरेन्द्रः--मन्ये, भवता किल न तावत् संसर्गो रचितः। एतदपि आलोकितम्--मन्दा जनास्तान् नामग्राहमाह्वयन्ति। कदा वा तैरालापः कृत इति को नु वेत्ति !

माष्टारः--किमाश्चर्यम् !

नरेन्द्रनाथः--मया ज्ञायते, अनेकेषां चरित्राणि तावद् दूषितानि संवृत्तानि। यदि विद्यालयकर्तृपक्षीयास्तथा यूनामभिभावकाश्च इदं लक्षयेयुस्तर्हि शोभनं स्यात्।

एवं कथायां प्रचलन्त्यां श्रीरामकृष्णो गृहाभ्यन्तरतस्तेषां सविधं समागम्य हसन्नवदत्--'किमये भोः, काः कथाः वः प्रवर्तन्ते ?' नरेन्द्रोऽब्रवीत्--'अनेन साकं विद्यालयमधिकृत्य कथा कृता। छात्राणां तावत् चरित्राणि नोत्तमानि तिष्ठन्ति।' श्रीरामकृष्णस्तथाविधां वाचं स्वल्पतया श्रुत्वा गाम्भीर्यमालम्ब्य माष्टारमभ्यधात्--'एवंविधाः कथा न शोभनाः। न हीश्वरकथां विना अन्या वाचो वरम्। त्वमेतेषु वयसा प्रवीणः; विचारबुद्धिरपि ते सम्पन्ना; एतासां वाचामवसरदानं ते नोचितमासीत्।' (नरेन्द्रस्तदा ऊनविंशति-विंशतिवयाः, माष्टारश्च सप्तविंशत्यष्टविंशतिवयाः।)

माष्टारो विमूढचेताः संवृत्तः। नरेन्द्रादयो भक्तास्तूष्णीमासत।

भगवान् श्रीरामकृष्णो दण्डायमानः सस्मितं नरेन्द्रादीन् भक्तान् भोजयति। श्रीरामकृष्णस्याद्य महानन्दो जातः।

नरेन्द्रादयो भक्ता आहारं समाप्य श्रीरामकृष्णकक्षभूमौ उपविश्य विश्राम्य-न्तस्तेन सार्धं कथोपकथनं कृतवन्तः। अहो, आनन्दोत्सवश्चलितः ! कथां कुर्वन् श्रीरामकृष्णो नरेन्द्रं ब्रवीति--"'चिदाकाशे प्रेमद्युतिधवलितः पूर्ण-महिमरसेन्दु'रिति संगीतं वारमेकं गीयतां भोः !"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नरेन्द्रो गातुमारब्धवान् । सपद्येव अन्ये भक्ता मृदङ्गकरतालिका वादयितुं प्रवृत्ताः—

"चिदाकाशे प्रेमद्युतिधवलितः पूर्णमहिम-
रसेन्दुः सौभाग्यात् समुदिततनुः हर्षनिलयः ।
अथ स्फीतोत्तुङ्गप्रचलिततरङ्गाकुलतरः
महान् प्रेमाब्धिः स्यात् परमसुखरत्नः सुखकरः ॥
(जयोऽस्तु दयाब्धे जयोऽस्तु दयाब्धे जयोऽस्तु ते कृपामय)
विशोभन्ते पार्श्वे द्युतिलसितभक्तग्रहगणाः
स्वभक्तैः लीलायां लससि ननु लीलारसमयः ।
अथ स्वर्गद्वारं परमसुखमुद्घाटितमहो
समीरो वासन्तः स च नवविधानं प्रवहति ।
स्थितो मन्दो मन्दः प्रणयरसगन्धः सुखकरः
यदाघ्राणाद् योगी सुखमयसमाधिं प्रलभते ।
भवाम्भोधौ पद्मं लसति नवविधानं रसमयं
अथैतद्गन्धान्धाः प्रचलितमनोभक्तमधुपाः
पिबन्ति प्रह्लादा अमृतरसमासक्तहृदयाः ।
अरे दृश्यतां तद्भुवनजननीहृष्टवदनं ।
पदाम्भोजमग्नाः परमसुखदे योगिनिवहाः ॥
अहो चित्रं दृश्यं चिरमनुपमं विश्वनिलये
समाश्वस्ताः प्राणाः अभिनवमिदं वीक्ष्य भुवने ।
वदेत् प्रेम्नां दासः सकलविनतः भ्रातर इह
सदा मातुर्नाम्नां वदत महिमानं जयरवम् ॥"

कीर्तनं कुर्वन् भगवान् श्रीरामकृष्णो नृत्यति स्म । भक्ता अपि तं वेष्टयित्वा नृत्यरता अभवन् ।

कीर्तनान्ते श्रीरामकृष्ण उत्तरपूर्वालिन्दे भ्रमति । हाजरामहाशयः उत्तरांशे उपविष्टः । श्रीरामकृष्णस्तत्रोपेत्य उपाविशत् । माष्टारस्तत्रासीनो हाजरामहाशयेन आलपति स्म । श्रीरामकृष्णः भक्तमेकं पृष्टवान्—"किं त्वया स्वप्नादीनि दृश्यन्ते ?"

भक्तः—आश्चर्यमेकं स्वप्नमहमद्राक्षम्—जगदिदं संप्लुतोदकम् । अहो, अनन्तो जलराशिः ! कति नौकाः प्लवमाना आसन् ; हठात् जलोच्छ्वासेन निमज्जिताः । केचित् जना अहञ्च पोतमारूढाः । तस्मिन्नेव समये तस्य अकूलसमुद्रस्य उपरि कश्चिद् ब्राह्मणश्चलितः । अहमपृच्छम्—'केनोपायेन याति भवान् ?' ब्राह्मणस्तु किञ्चित् स्मयमान आह—'अत्र किमपि कष्टं

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नास्ति। जलस्य नीचैः अनन्तरमेव कश्चित् सेतुरस्ति।' पुनर्मया पृष्टः—'क्व गच्छति भवान् ?' तेनोक्तम्—'भवानीपुरं गच्छामि।' मयोक्तम्—'क्षणं तिष्ठतु। अहमपि भवता सह गच्छामि।'

श्रीरामकृष्णः—एवत् शृण्वतो मे रोमाञ्चस्तावदुद्भवति !

भक्तः—ब्राह्मणोऽभाषत—'ममेदानीं त्वराऽस्ति; तवावतरणे विलम्बः स्यात्। साधयामि तावत्। पन्था एष परिचीयताम्। ततः परमेहि।'

श्रीरामकृष्णः—रोमाञ्चो मे जायते। शीघ्रमेव त्वं मन्त्रदीक्षां गृह्णीष्व।

रात्र्या एकादशघटिका वादिता। नरेन्द्रादयो भक्ताः श्रीरामकृष्णकक्षभूमौ शयनं रचयित्वा अशेरत।

१७-अक्टोबरः, १८८२-खृः

निद्राभङ्गे सति कैश्चिद् भक्तैरालोकितम्—प्रभातं सम्प्राप्तम्। श्रीरामकृष्णो बालकवद्दिगम्बरः; देवतानां नामानि कुर्वन्नसौ कक्षे विचरति स्म। क्वचिद् गङ्गादर्शनं क्वचिद्वा देवतानां प्रतिकृतीरुपगम्य प्रणिपातः, क्वचिच्चापि मधुरस्वरेण नामकीर्तनम्। क्वचिद् वा व्याहरति—'वेदाः, पुराणानि, तन्त्राणि, गीता, गायत्री, भागवतम्, भक्ता भगवांश्च।' गीतामुद्दिश्य भूयो भूय उच्चारयति—'त्यागी त्यागी त्यागी त्यागी'ति। कदाचिद् वा—'त्वमेव ब्रह्म, त्वमेव शक्तिस्त्वमेव पुरुषस्त्वमेव प्रकृतिः, त्वमेव विराट्, त्वमेव स्वराट्, त्वमेव नित्यस्त्वमेव लीलामयी; त्वमेव चतुर्विंशतितत्त्वानि।'

इतस्तु कालीमन्दिरे राधाकान्तमन्दिरे च मङ्गलारात्रिकं प्रचलति, नदति च शङ्खघण्टम्। भक्ता उत्थाय विलोकयन्ति—कालिकायतनस्य पुष्पोद्याने दैवतानां पूजार्थं पुष्पचयनं समारब्धम्; प्रभातीरागलहरीञ्च उत्थाप्य वाद्यभवनस्य ऐकतानमुच्चरति।

नरेन्द्रादयो भक्ताः प्रातःकृत्यानि समाप्य श्रीरामकृष्णसमीपे समुपस्थिताः। श्रीरामकृष्णो हास्यवदनः, उत्तरपूर्वालिन्दस्य पश्चिमांशे दण्डायमानस्तिष्ठति।

नरेन्द्रः—पञ्चवट्यां केचन नानकपन्थिनः साधव आसते इति मया दृष्टम्।

श्रीरामकृष्णः—आम्, ह्यस्ते समायाताः। (नरेन्द्रं प्रति) यूयं सर्वे एकत्र कटे आघ्वम्; पश्याम्यहम्।

सकलेषु भक्तेषु कटे आसीनेषु श्रीरामकृष्णः सानन्दं तान् द्रष्टुं प्रावर्तत; तैरपि च कथोपकथनमारभत। नरेन्द्रेण साधनविषय उत्थापितः।

श्रीरामकृष्णः (नरेन्द्रादीन् प्रति)—भक्तिरेव सारभूता। तत्प्रेम्णा स्वत एव विवेकवैराग्ये समायातः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नरेन्द्रः—भवतु, किं नाम नारीसहायं साधनं तन्त्रेषु विद्यते ?

श्रीरामकृष्णः—नैते तावदुत्तमाः पन्थानः, नितरामेव दुष्करास्ते, प्रायशः पतनञ्च स्यात्। वीरभावेन साधनं, दासीभावेन साधनं, तथा मातृभावेन साधनम्—एवंरूपाणि साधनानि सम्पद्यन्ते। मम तावन्मातृभावः। दासीभावोऽपि वरम्। वीरभावेन साधनं पुनरतितरां कठिनम्। सन्तानभावो हि परमशुद्धः।

नानकपन्थिनः साधवः श्रीरामकृष्णमभिवाद्य अवदन्—'नमो नारायणाय !' श्रीरामकृष्णस्तान् आसनग्रहणार्थमाह।

श्रीरामकृष्णः शंसति स्म—

"नास्तीश्वरे न कोऽपि सम्भवः। तत्स्वरूपं कोऽपि वाचा न प्रकाशयितुं शक्नोति। तस्मिन्नीश्वरे सर्वमेव सम्भवेत्। द्वौ योगिनौ आस्तां साधनरतौ। तत्पथे नारदर्षिर्गच्छन्नासीत्। तयोरेकः परिचयं प्राप्यापृच्छत्—'अये, भवान् नारायणसकाशाद् आगच्छति ; किं नामासौ कुर्वन्नास्ते'इति। नारद उवाच—'स भगवान् नारायणः सूचिकाविवरे क्रमेलकान् तथा हस्तिनः प्रवेशयति, तथा ततो निष्काशयतीति मया दृष्टम्।' तयोरपर आह—'तस्मिन् भगवति किमाश्चर्यम् ! सर्वमेव तस्मिन् सम्भवति।' किन्तु अपरो जगाद—'किमेतत् सम्भवेत् ? त्वं तु न कदापि तत्र गतवानसि।'

प्रायेण नवघटिका वेला। श्रीरामकृष्णः स्वकीये कक्षे उपविष्टः। मनोमोहनः कोन्नगरात् सपरिवारं समायातः। मनोमोहनः प्रणम्यावदत्—'एतान् कलिकातां नयामि।' श्रीरामकृष्णः कुशलप्रश्नपूर्वकं व्याहरत्—"अद्य मासस्य प्रथमदिवसः ; अगस्त्ययात्रा, कलिकातां व्रजसि ; वत्स ! किं भवेदिति को नु वेत्ति !" इत्युक्त्वा किञ्चित् स्मयमानः कथान्तरं स कर्तुं प्रावर्तत।

नरेन्द्रस्तस्य बान्धवाश्च वगाह्य प्रत्यागताः। श्रीरामकृष्णो व्यग्रः सन् नरेन्द्रमाह—"गच्छ, वटतले ध्यानं कुरु। किमासनं दास्यामि ?"

नरेन्द्रस्तस्य केचिद् ब्राह्मबान्धवाश्च पञ्चवटीमूले ध्यायन्ति स्म। सार्धदशघटिकावादनवेला। भगवान् श्रीरामकृष्णः कियत्क्षणात् परं तत्रोपातिष्ठत् ; माष्टारश्चापि संप्राप्तः। श्रीरामकृष्णः कथयन्नास्त—

श्रीरामकृष्णः (ब्राह्मभक्तान् प्रति)—ध्यानावसरे तस्मिन् मग्नेन भवितव्यम्। किमुपरि भासमानेन जलस्य नीचैः रत्नानि प्राप्यन्ते ? एवमुक्त्वा श्रीरामकृष्णो मधुरस्वरेण गातुं प्रवृत्तः—

"कालीनाम वदन्निमज्ज किल हृद्रत्नाकरस्याम्भसि
लब्धं चेन्नहि मज्जनैर्यदि धनं द्वाभ्यां चतुर्भिः पुनः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शून्यस्तेन न मन्यतां मम कदा रत्नाकरो मानस
सामर्थ्यादिह गम्यतां परपदं निःश्वासवायोस्त्वया।
(प्राप्तः स्यात् कुलकुण्डलिन्यतितटो द्वेचकैस्तथा मज्जनैः॥)
ज्ञानाब्धेश्चिरमन्तरे फलति रे शान्त्याख्यमुक्ताफलम्
भक्त्या संग्रहसम्भवः शिवनयं संश्रित्य चेत् प्रार्थ्यते
षट्कामादिविशेषनक्रमकरा आहारलोभातुरा-
स्तस्मिन् सन्ति महार्णवे निशि दिने दत्तावधानं भव॥
गात्रं ज्ञानहरिद्रया कुरु ततो लिप्तं मुदा गच्छ रे
तद्गन्धं समवाप्य ते न हि पुनः स्प्रष्टुं क्षमन्ते ध्रुवम्
दिव्यं रत्नमथोज्ज्वलो मणिवरस्तत्रास्ति रत्नाकरे
झम्पैस्तत् परिलभ्यते वदति रे रामप्रसादः किल॥"

नरेन्द्रस्तस्य बान्धवाश्च पञ्चवटीचत्वरादवतीर्य श्रीरामकृष्णसमीपमागत्य अतिष्ठन्। श्रीरामकृष्णो दक्षिणास्यः सन् तैः सहालपन् स्वकक्षमभ्यायाति स्म।

श्रीरामकृष्णोऽवादीत्—निमग्नं जनं कुम्भीर आक्रामेत्, परन्तु हरिद्रालेपनादसौ न स्पृशति। 'हृद्रत्नाकरस्य अगाधजले' कामादयः षट् कुम्भीराः सन्ति। किन्तु विवेकवैराग्यरूपहरिद्राया विलेपनेन ते पुनस्त्वां न स्पृशेयुः। पाण्डित्येन उत वक्तृतया किं, यदि विवेकवैराग्ये नागच्छतः? ईश्वर एव सत्यः, अन्यत् सर्वमनित्यम्। स एव वस्तु, सर्वमन्यद् अवस्तु। एष विवेको नाम।

"आदावेव हृदयमन्दिरे तं प्रतिष्ठापय। ततश्चेदिच्छा स्यात्तर्हि वक्तृतादिकं देयम्। यदि विवेकवैराग्ये न स्यातां तर्हि केवलं ब्रह्म ब्रह्मेति उदीरणेन किम्? असौ तु रिक्तशङ्खध्वनिरेव।

"अस्ति कस्मिंश्चिद् ग्रामे पद्मलोचनो नाम कश्चिद् बालः। लोकास्तं 'पोदो' इति अभिहितवन्तः। तस्मिन् ग्रामे पतनोन्मुखं जीर्णमेकं मन्दिरमासीत्। तस्याभ्यन्तरे कोऽपि विग्रहो नाभूत्। मन्दिरगात्रे अश्वत्थवृक्षकाः, अन्येऽपि तरवः सञ्जाताः। मन्दिरस्यान्तश्चर्मचटिकाभिर्वासः कल्पितः। भूतले धूलिश्चर्मचटिकानां च विष्ठा। मन्दिरे तु साम्प्रतं लोकानां यातायातं नास्ति।

"एकदा सन्ध्यायाः किञ्चित् परं ग्रामवासिनः शङ्खध्वनिं श्रुतवन्तः। मन्दिरत एवासौ शङ्खनिनाद आयातः। ग्रामस्य लोका अमन्यन्त—केनापि विग्रहस्तावत् प्रतिष्ठापितः, अतः सन्ध्यान्ते आरात्रिकं भवति। बाला वृद्धाः पुरुषाः स्त्रियश्च—सर्वे धावन्तो मन्दिरस्य सम्मुखमुपस्थिताः। ते विग्रहदर्शने

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कुर्युः नीराजनञ्च पश्येयुः। तेषु कश्चिन्मन्दिरस्य द्वारं मन्दं मन्दमुन्मुच्यापश्यत्--पद्मलोचन एकपार्श्वतो दण्डायमान उच्चैः शङ्खनिनादं करोति स्म। विग्रहस्तावत् प्रतिष्ठितो नासीत्, मन्दिरमपि न सम्मार्जितं, चर्मचटिकानाञ्च विष्ठा प्रसृताऽभूत्। तदासौ तारस्वरेण वदन्नास्त--

"न तव मन्दिरे माधवोऽस्ति रे
विनिहितो महान् विभ्रमस्त्वया।
सकलमानसे पद्मलोचन
किमिह वा कृतं चञ्चलात्मना ॥"

"यदि नाम हृदयमन्दिरे माधवं प्रतिष्ठापयितुमिच्छसि, यदि भगवन्तं लब्धुमिच्छसि तर्हि केवलं शङ्खनिनादेन किं स्यात्? आदौ चित्तशुद्धिः; मनसि शुद्धे सति भगवान् समुपस्थाय पवित्रे तस्मिन्नासने उपवेक्ष्यति। सत्यां चर्मचटिकाविष्ठायां माधव आनेतुं न शक्यः। एकादश चर्मचटिकास्तावत् एकादश इन्द्रियाणि--पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, मनश्च। आदौ माधवप्रतिष्ठापनम्, ततः परं यदीच्छा स्यात्, वक्तृतादिकं वितीर्यताम्।

"प्रथमं तावन्निमज्ज; निमज्य च रत्नानि उत्तोलय; ततोऽन्यत् कर्म।

"न हि कोऽपि निमज्जितुमीहते। साधनं नास्ति, भजनं नास्ति, विवेकवैराग्ये न स्तः; काश्चित् कथाः शिक्षित्वैव वक्तृतां ददाति!

"लोकशिक्षाप्रदानं कठिनम्। भगवद्दर्शनात् परं यदि कश्चित् तस्यादेशं लभेत, तर्हि लोकशिक्षां दद्यात्।"

इत्येवमालपन् श्रीरामकृष्ण उत्तरालिन्दस्य पश्चिमांशमासाद्य अतिष्ठत्। मणिरन्तिके एव दण्डायमान आसीत्। श्रीरामकृष्णः पुनः पुनः वदति स्म—'विवेकवैराग्ययोरसम्पन्नयोः भगवांस्तावल्लब्धुं न शक्यते।' मणिर्विवाहं कृतवान्, अतो व्याकुलः सन् चिन्तयति--किं मे भविष्यति? अष्टाविंशतिवया असौ, महाविद्यालये अध्ययनरतः, इंरेजीभाषया कियन्नाम शिक्षां प्राप्तवान्। असौ चिन्तयन्नास्ते—किंनाम कामिनीकाञ्चनत्याग एव विवेकवैराग्ये?

मणिः (श्रीरामकृष्णं प्रति)—पत्नी चेद् वदति, मां नाभिलक्षयसि, आत्महत्यामहं करिष्यामीति तर्हि किं भवेत्?

श्रीरामकृष्णः (गम्भीरस्वरेण)—या ईश्वरपथे विघ्नमुत्पादयति तादृशीं भार्यां त्यजेः। आत्महत्यां वान्यत् किमपि करोतु वा। या ईश्वरपथे विघ्नं विदधाति सा नाम अविद्यारूपा स्त्री।

गभीरचिन्तानिमग्नः मणिर्गृहप्राचीरे न्यस्तपृष्ठः सन्नेकपार्श्वे तिष्ठन्नासीत्। नरेन्द्रादयो भक्ता अपि क्षणं हतवाचः सन्तोऽवस्थिताः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीरामकृष्णस्तैः सार्धं किञ्चिदालपन्नास्त ; सहसा मणिमुपेत्य एकान्तमुच्चैर्वदति स्म—"किन्तु यस्येश्वरं प्रति हार्दिकी भक्तिरस्ति तस्य सर्व एव वशमाप्नुयुः—राजानः, दुर्जनाः स्त्रियश्च। आत्मनो हार्दिकभक्तिसद्भावे भार्याऽपि क्रमेण ईश्वरपथेन गन्तुमर्हति। स्वयं शुद्धश्चेत् ईश्वरेच्छया साऽपि शुद्धा भवितुमर्हति।"

मणेश्चिन्ताग्नौ सलिलमपतत्। स एतावच्चिन्तयन्नास्त—यदि मद्जाया आत्महत्यां कर्तुकामा, करोतु वा! किमहं करोमि?

मणिः (श्रीरामकृष्णं प्रति)—संसारे खलु महद् भयम्।

श्रीरामकृष्णः (मणिं नरेन्द्रादींश्च प्रति)—तस्माच्चैतन्यदेव उवाच—

"नित्यानन्द! शृणु भ्रातः! सारमेकं वदामि ते।
संसारिणां हि जीवानां गतिर्नैवास्ति काऽपि वा॥"

(मणिं प्रति एकान्ततः)—ईश्वरं प्रति शुद्धा भक्तिश्चेत् न जायेत, तर्हि काऽपि गतिर्नास्ति। यदि कश्चिदीश्वरलाभात् परं संसारे तिष्ठति, तर्हि तस्य किमपि भयं नास्ति। निर्जनप्रदेशे अन्तरा चान्तरा साधनमास्थाय कश्चिच्चेत् शुद्धां भक्तिं लब्धुं शक्नोति, तर्हि संसारस्थितावपि तस्य किमपि भयं नास्ति। चैतन्यदेवस्य संसारिणोऽपि भक्ता आसन्। नामतः किल ते संसारे तस्थुः। अनासक्ताः सन्तः स्थिता बभूवुः।

देवतानां भोगारात्रिके संवृत्ते। सममेव वाद्यसमारोहः प्रारब्धः। इदानीं ते विश्रान्तिं लप्स्यन्ते। भगवान् श्रीरामकृष्ण आहारार्थमुपाविशत्। नरेन्द्रादयो भक्ता अद्यापि श्रीरामकृष्णसकाशे प्रसादं प्राप्स्यन्ति।

२२-अक्टोबरः, १८८२-खृः

भगवान् श्रीरामकृष्णो दक्षिणेश्वरमन्दिरे विराजति स्म। वेला नवघटिका। स क्षुद्रखट्वायां विश्राम्यन्नासीत्; कक्षभूमौ मणिरुपविष्टः। श्रीरामकृष्णस्तेन सह कथयन्नास्त।

अद्य खलु विजया। रविवासरः, २२-अक्टोबरः, १८८२-खृष्टाब्दः, आश्विनस्य शुक्ला दशमी तिथिः। इदानीं राखालः श्रीरामकृष्णसमीपे वर्तते। नरेन्द्रो भवनाथश्च अन्तराऽन्तरा यातायातं कुरुतः। श्रीरामकृष्णेन तस्य भ्रातुष्पुत्रः श्रीयुक्तो रामलालो हाजरामहोदयश्च वसतः। रामो मनोमोहनः सुरेशो माष्टारो बलरामश्च—एतेऽपि प्रायशः प्रतिसप्ताहं श्रीरामकृष्ण-साक्षात्कारं कुर्वन्ति। बाबुरामः सद्यो द्वयकैकशस्तद्दर्शनं कृतवान्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीरामकृष्णः--किं ते पूजावकाशः संप्राप्तः ?

मणिः--आम् । सप्तम्या अष्टम्या नवम्याश्च पूजादिवसेषु केशवसेनस्य वाटिकां प्रत्यहमेवाहं गतः ।

श्रीरामकृष्णः--किं भणसि भोः !

मणिः--दुर्गापूजायाः सुष्ठु व्याख्या श्रुता मया ।

श्रीरामकृष्णः--अये, किम्भूता सा उच्यताम् ।

मणिः--केशवसेनस्य वाटिकायां प्रत्यहमेव प्रातरुपासना भवति--दशैकादशवादनपर्यन्तम् । तदुपासनावसरे स दुर्गापूजाया व्याख्यां कृतवान् । सोऽभाषत-माता चेदुपलभ्येत, अपि च माता दुर्गा चेद् हृदयमन्दिरमानीयेत, तर्हि लक्ष्मीः, सरस्वती, कार्तिकेयो गणेशश्च स्वयमेवागच्छन्ति । लक्ष्मीः--अर्थात् ऐश्वर्यम्, सरस्वती--अर्थात् ज्ञानम्, कार्तिकेयः--अर्थात् विक्रमः, गणेशः--अर्थात् सिद्धिः--एतानि स्वत एव सिद्धानि भवन्ति--माता यदि समुपैति ।

भगवान् श्रीरामकृष्णः सर्वमेव विवरणं श्रुतवान् ; अन्तराऽन्तरा केशवस्योपासनामुद्दिश्य प्रश्नयति स्म । अन्तेऽवादीत्--"त्वं यत्र तत्र मा गमः--अत्रैव समागच्छेः ।"

"ये नामान्तरङ्गास्ते केवलमत्रैव आगमिष्यन्ति । नरेन्द्रो भवनाथस्तथा राखालः--एते मे अन्तरङ्गाः । न ह्येते प्राकृताः । त्वमेकदा भोजय एतान् । नरेन्द्रस्ते किंविधः प्रतिभाति ?"

मणिः--भगवन्, अत्युत्तमः ।

श्रीरामकृष्णः--दृश्यतां--नरेन्द्रस्य कति गुणाः सन्ति । सङ्गीते वादने विद्यायाञ्च निपुणः । पुनरसौ जितेन्द्रियः, उक्तवांश्च 'नोद्वाहं वै करिष्यामी'ति । आ बाल्यादेव ईश्वरे तस्य मनो लग्नम् ।

श्रीरामकृष्णो मणिना सह पुनः कथाः कथयति ।

श्रीरामकृष्णः--साम्प्रतं ते ईश्वरचिन्ता कीदृग् भवति ? किं ते साकारो रोचते--उत निराकारः ?

मणिः--भगवन्, साकारेऽधुना मनो न याति । पुनर्निराकारेऽपि मनः स्थिरीकर्तुं न पारयामि ।

श्रीरामकृष्णः--अपि दृष्टं तावत् ? निराकारे एकवारमेव मनो न स्थैर्यमेति । प्रथममेव साकारस्तावदुत्तमः ।

मणिः--किमु मृत्तिकाया एताः सर्वा मूर्तयश्चिन्तनीयाः ?

श्रीरामकृष्णः--कथम् ? चिन्मयी मूर्तिः !

मणिः--भगवन्, तथात्वेऽपि हस्तपादं तु भावनीयम् ! परम् एतदपि तर्कयामि--प्रथमावस्थायां रूपचिन्तामन्तरेण मनः स्थैर्यं नापद्येत इत्येवमत्र-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भवता उक्तमेव। भवतु, ईश्वरस्तावन्नानारूपाणि धर्तुं प्रभवति। किं नाम निजमातृरूपं ध्यातुं शक्यम् ?

श्रीरामकृष्णः—वाढ़म्। सा माता गुरुः—किञ्च ब्रह्ममयी-स्वरूपा।

मणिस्तूष्णीमास्त।

कियत्क्षणात् परमसौ पुनरपि श्रीरामकृष्णं पृच्छति स्म।

मणिः—भगवन्, निराकारभावनायां किम्भूतं दृश्यते ? किं तद् वर्णयितुं न शक्यते ?

श्रीरामकृष्णः—(क्षणं विचिन्त्य)—तत् किंविधम्—अपि ज्ञायते ?

एवमुक्त्वा श्रीरामकृष्णः किञ्चिद् जोषमास्त। तदनन्तरं साकारनिराकारयोर्दर्शने कीदृशी अनुभूतिर्जायते इति कथयैकया शंसितवान्। पुनरपि श्रीरामकृष्णस्तूष्णीं गतः।

श्रीरामकृष्णः—किं ज्ञायते ? एतस्य सम्यग् बोधनार्थं साधनमावश्यकम्। गृहमध्यस्थरत्नं चेत् द्रष्टुमिच्छसि, तदवाप्तुकामश्च स्यास्तर्हि श्रमस्वीकारेण कुञ्चिकामानीय तालयन्त्रमुन्मोचय। ततो रत्नं तद् बहिरानेतव्यम्। अन्यथा, तालपिहितं गृहम्—द्वारान्तिके तिष्ठन् चिन्तयामि—'एषोऽहं द्वारमुन्मोचयामि, लोहपेटिकायाश्च तालं भनज्मि, रत्नमदश्च बहिरानयामि' इति। केवलं तु दण्डायमानस्य सतः चिन्तनेन किमपि न सिध्यति। साधनमेव कार्यम्।

"ज्ञानिनो निराकारं चिन्तयन्ति। ते पुनरीश्वरावतारं नाङ्गीकुर्वन्ति। अर्जुनः श्रीकृष्णं स्तुवन्नाह—'त्वमेव पूर्णं ब्रह्मे'ति। कृष्णस्तु अर्जुनमुवाच—'अहं पूर्णं ब्रह्म न वेति पश्येस्तर्हि एहि तावत्।' इत्युक्त्वा अर्जुनं स्थानं किञ्चन समानीय तमपृच्छत्—'किं प्रेक्षसे ?' अर्जुनो जगाद—'अहं बृहद्वृक्षमेकं पश्यामि। तस्मिंस्तु गुच्छशः कृष्णजम्बुवत् फलानि सन्ती'ति। कृष्णः पुनरभ्यधात्—'समीपतरमेत्य प्रपश्य—नैतानि नाम गुच्छीभूतानि फलानि—परं स्तवकशः स्थितानि असंख्याताः कृष्णाः—मादृशा एव।' अस्यार्थः खलु—ततो ब्रह्मरूपाद् वृक्षादेव असंख्या अवताराः सम्भवन्ति प्रयान्ति च।

"कबीरदासस्य निराकारं प्रति बलवत् प्रावण्यमासीत्। कृष्णकथाप्रकरणे कबीरदासः किल बभाषे—'किमिति तं भजामि ? गोपवधूटयः करतालिकां ददुः, असौ पुनर्मर्कटवन्ननर्त !' (सहास्यम्) अहं तु साकारवादिनामभ्याशे साकारभाक्, परं निराकारवादिनां सकाशे निराकारभाक्।"

मणिः (सस्मितम्)—यस्य कथा चलति सोऽपि (ईश्वरः) यथा अनन्तः, भवानपि तथा अनन्तः—भवतोऽन्तस्तु नावगम्यते।

श्रीरामकृष्णः (सहास्यम्)—त्वया अवगतमेव ! किं ज्ञायते ? सर्व एव धर्माः सकृत् साधनीयाः। सर्वैरेव पथिभिः प्रचलितव्यम्। अपि नाम क्रीड़ाया

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

घुटिका सर्वप्रकोष्ठानामतिक्रमं विना लक्ष्यं समुपैति ? लक्ष्यभुवं सम्प्राप्तायां घुटिकायां कोऽपि तामाक्रमितुं न शक्नोति ।

मणिः—अथ किम्, देव !

श्रीरामकृष्णः—द्विविधाः खलु योगिनः—बहूदकाः कुटीचकाश्च । यो यतिर्बहुषु तीर्थेषु भ्रमन्नास्ते, परं यस्य मनसि अधुनापि शान्तिर्नोत्पन्ना, स बहूदक इति उच्यते । पुर्नयस्तु योगी सर्वत्र विचरन् स्वमनः स्थिरीकृतवान्, यस्य च शान्तिर्जाता स एकस्मिन्नेव स्थाने आसनमास्थाय उपविशति, पुनर्न ततो विचलति । तस्मिन् एकस्मिन्नेवासने उपविशत एव तस्यानन्दः । तस्य तु तीर्थगमनेन प्रयोजनं भवितुं नार्हति । स चेत् तीर्थाटनं कुर्यात्, तर्हि तत् केवलमुद्दीपनार्थमेवेति बोध्यम् ।

मम तु पुनः सर्व एव धर्माः साधनीया आसन्—हिन्दूनां, मुसलमानानां खृष्टीयानाञ्च पथिभिः, तथा च शाक्त-वैष्णव-वेदान्तादिपथैश्चापि मे आगमनमासीत् । तत्रापश्यम्—असावेक एवेश्वरः,—तत्समीपमायान्ति सर्वे एव—भिन्नैस्तु पथिभिः ।

"तीर्थं गतोऽहं, कदा कदा वा महान् क्लेशो जातः । काश्यां मथुरानाथमहोदयादिभिः सह राजमहोदयादीनां बहिःप्रकोष्ठे समुपस्थितः । तत्राद्राक्षम्—तत्रत्या जना विषयकथाः कुर्वन्ति स्म—अर्थभूमिसम्बद्धाः सर्वास्ताः कथाः । ताः शृण्वन्नहं क्रन्दितुं प्रक्रान्तः । मयोक्तं—मातः, कुत्र त्वं मामानीतवती ? दक्षिणेश्वरे तावदहं प्रकाममानन्देन आसम् । प्रयागेऽपश्यम्—सैव पुष्करिणी, तथाविधैव दूर्वा, तादृशान्येव तिन्तिड़ीपत्राणि ! केवलं पश्चिमाञ्चले लोकानां बुसवत् पुरीषमिति विशेषः ! (श्रीरामकृष्णस्य मणेश्चापि हास्यम्)

"मन्ये तावत् तीर्थेषु उद्दीपनं भवत्येव । एकदा मथुरानाथ-महोदयेन वृन्दावनं गतोऽहम् । मथुरानाथमहोदयस्य गृहस्य स्त्रियोऽप्यासन् ; हृदयरामोऽपि आसीत् । कालियदमनघट्ट-दर्शनादेव मे उद्दीपनं भवति स्म । अहं तावत् विह्वलोऽभवम् । यमुनायास्तस्मिन्नेव घट्टे हृदयरामो मां पुत्रमिव स्नाययति स्म ।

"यमुनातीरे सन्ध्यासमयेऽहं भ्रमणार्थमगच्छम् । तत्तीरपथैर्धेनवो गोष्ठात् प्रत्यायान्ति स्म । तद्दर्शनमात्रान्मे कृष्णभावोद्दीपनं संजातमासीत् ; उन्मत्तवदहं क्व कृष्णः, क्व कृष्ण इति व्याहरन् धावितुमारभे ।

"शिविकया श्यामकुण्ड-राधाकुण्डयोः पथा गच्छन् गोवर्धनं द्रष्टुकामोऽवातरम् ; गोवर्धनदर्शनादेव अशेषतो विह्वलो जातोऽहम् । धावन्नुपस्थितो गोवर्धनस्योपरि दण्डायमानोऽभवम् । बाह्यज्ञानशून्यश्चापि संवृत्तः । तदा व्रजवासिनस्तत्रोपनीता मामवातारयन् । श्यामकुण्डराधाकुण्डयोः पथि तदेव क्षेत्रं, तांश्च वृक्षान्, पक्षिणो हरिणांश्च— सर्वाण्येतानि दृष्ट्वा

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विह्वलतामभजे। चक्षुषोर्जलेन वस्त्रं मे सिक्तमभूत्। मनसि एवमासीत्—रे कृष्ण! सर्वमेव यथापूर्वं तिष्ठति, केवलं त्वामहं न पश्यामि! शिविकाभ्यन्तरे उपविष्ट आसम्; परन्तु सकृदपि मे एकस्या अपि वाच उच्चारणार्थं शक्तिर्नासीत्; केवलं तूष्णीमासि। हृदयरामः शिविकायाः पश्चादागच्छति स्म। स वाहकांश्च पूर्वमाह—सविशेषं सावधानैर्भवितव्यम्।

"गङ्गामायी सुतरां मां प्रति यत्नं कृतवती। सा अनेकवया आसीत्। निधुवनादारात् कुटिरे एकाकिनी न्यवसत्। ममावस्थां भावञ्च प्रेक्ष्यावादीत्—'अत्रभवान् साक्षाद् राधादेहं धारयन्नाविर्भूतः।' मां पुन'र्दुलाली'ति नाम्नाह्वयत्। तत्साहचर्यान्मे आहारे आवासप्रत्यावृत्तौ सर्वेषु च विषयेषु विस्मृतिरजायत। हृदयरामः कदा कदा वा आवासाद् आहार्यमानीय मामाशयत्। साऽपि पुनः भोज्यान्युपकल्प्य आहारयत्।

"गङ्गामातुर्भावसमाधिरजायत। तद्भावदर्शनार्थं लोकानां मेलनमभूत्। भाववशादसौ एकदा हृदयरामस्य स्कन्धमारूढा।

"गङ्गामायीसकाशात् स्वदेशप्रत्यावर्तने मे इच्छा नासीत्। सर्वमेव सुनिर्दिष्टम्—अहं सिद्धतण्डुलस्य अन्नमश्नामि; गङ्गामातुः शय्या कक्षस्य इतः स्यात्, मम शय्या तावदमुतः। सर्वमेव स्थिरीकृतम्। हृदयरामस्तदा अभ्यधात्—'एतावान् उदरामयस्ते—कस्त्वां परिचरेत्?' गङ्गामायी अवदत्—'कथम्? अहमेव प्रेक्षिष्ये, एषाहं सेविष्ये।' हृदयरामो हस्ते एकस्मिन् गङ्गामायी च हस्तेऽपरस्मिन् धृत्वाऽऽकर्षताम्। तदानीमेव माता मे स्मृतिपथमवातरत्। माता सा मे एकाकिनी दक्षिणेश्वरस्य कालिकायतनस्थे वाद्यभवने! न पुनः स्थातुमार्हम्। तदा मयोक्तम्—'मैव; मया तावद् गन्तव्यमेव।'

"वृन्दावनस्य भावः खलु उत्तमः। नूतनेषु यात्रिषु तत्र गतेषु व्रजबालका वक्तुमुपक्रमन्ते—'हरिं कथय, ग्रन्थिं मोचय!'"

पूर्वाह्णकादश-घटिका-वादनात् परं भगवान् श्रीरामकृष्णः मातुः कालिकायाः प्रसादं गृहीतवान्। मध्याह्ने किञ्चिद् विश्रम्य पुनर्भक्तैः सह अपराह्णमालपनेन यापयति स्म। केवलमन्तरा अन्तरा वारमेकं प्रणवध्वनिं 'हा चैतन्येति नामोच्चारणं वा कुर्वन्नास्त।

देवतायतने सन्ध्याया आरात्रिकं सम्प्रन्नम्। अद्य तावद् विजया दशमी; श्रीरामकृष्णः कालिकामन्दिरं समागतः। मातृप्रणामानन्तरं भक्तास्तस्य पदधूलिं गृहीतवन्तः। रामलालो मातुः कालिकाया आरात्रिकं सम्पादितवान्। श्रीरामकृष्णो रामलालं संबोध्य वदति स्म—'भो रामलाल, कुत्रासि रे?'

मात्रे कालिकायै सिद्धिर्निवेदिताऽस्ति। श्रीरासकृष्णस्तमेव प्रसादं

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्प्रक्ष्यति–अतो रामलालमाकारयति। 'अन्येभ्यः सकलेभ्यो भक्तेभ्यः सिद्धेः किञ्चित् दीयता'मिति आदिशत्।

मङ्गलवासरस्य अपराह्णः, २४-अक्टोबरः। वेला तावत् तृतीया चतुर्थी वा घटिका भवेत्। श्रीरामकृष्णः खाद्य-संस्थापन-फलकसमीपे दण्डायमान आसीत्। बलरामो माष्टारश्च कलिकातायाः शकटेनैकेन आगतौ; तौ श्रीरामकृष्णं प्राणमताम्। प्रणिपातानन्तरं समुपविष्टौ तौ श्रीरामकृष्णो हसन्नेव वदति स्म––"फलकस्योपरिस्थितं खाद्यमानेतुं गतोऽहम्। खाद्यस्योपरि हस्तं प्रसारितवत्येव मयि काचिद् गृहालिका निपतिता; तत्क्षणादेवाहं ततो हस्तं मे अपसारितवान्।" (सर्वेषां हास्यम्)

श्रीरामकृष्णः––अये सत्यम्, एतान्येव सर्वाणि पालनीयानि नाम। दृश्यतां तावत्, राखालस्य पीड़ा संवृत्ता। ममापि च हस्तपादं व्यथते। ननु ज्ञायते––किं तावद् घटितम्? प्रातः शय्याया उत्थानकालेऽहं राखालः समागच्छतीति मत्वा अमुकस्य मुखं दृष्टवान्। (सर्वेषां हास्यम्) अये, सत्यमेव; लक्षणानि द्रष्टव्यानि नाम। अन्येद्युर्नरेन्द्रः काणं कञ्चिद् युवानमानयत्; असौ तस्य बन्धुरेव। नासौ साकल्येन अक्ष्णा काणः। यदेवास्तु; मया पुनश्चिन्तितं––किमिदं नाम संघटितम्?

"कश्चिदपरो जनस्तावदायाति, नाहं तदानीतं द्रव्यं ग्रहीतुमलम्। स कस्मिंश्चित् कार्यालये कर्म करोति, विंशतिरूप्यकमात्रं तस्य वेतनम्। अपि चापराणि विंशतिरूप्यकाणि मिथ्यालेखनेन प्राप्नोति। मिथ्या भाषतेऽसौ इति कृत्वाहं संप्राप्ते तस्मिन् विशेषेण तस्मै न कथयामि। कदा नु स द्विचतुर-दिनानि कार्यालयं न गतः, अत्रैवातिष्ठत्। किं ज्ञायते नाम––अयमेव तस्याभिप्रायो यत् ममानुरोधेन यदि अन्यत्र तस्य कर्मप्राप्तिर्भवेत्।

"परमवैष्णववंशो बलरामस्य। तस्य पिता वृद्धत्वमापन्नः––परमो वैष्णवः। मस्तके शिखा, गलदेशे तुलसीमाला, हस्ते च सदैव हरिनाम-जपमाला, जपन्नास्ते। उत्कले एतेषां भूयान् भूम्यधिकारो वर्तते। कोठारे श्रीवृन्दावने अन्येषु चानेकस्थानेषु श्रीश्रीराधाकृष्णविग्रहसेवाऽस्ति, अतिथिशालाश्चापि वर्तन्ते। बलरामो नूतन एव समागच्छति; अतः श्रीरामकृष्णः कथाच्छलेन तस्मै नानाविधान् उपदेशान् यच्छति।

श्रीरामकृष्णः––तस्मिन् दिवसे अमुक आगच्छत्। श्रुतं मया, असौ कृष्णायास्तस्या ललनाया दासत्वसापन्नः? कथं नाम ईश्वरदर्शनं न सम्पद्यते?––कामिनीकाञ्चने तावदन्तरा व्यवधानरूपेण स्त इति हेतोः। पुनरसौ––तदा कथं पुरतस्ते एवमवादीत्––'कश्चित् परमहंसः समायातो मत्पितृसकाशम्; जनको मे तं कुक्कुटं पक्त्वाऽभोजयदि'ति। (बलरामस्य हास्यम्) मम तु

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एतावती अवस्था यत् साम्प्रतं चेन्मत्स्यसूपो मातृप्रसादीभूतस्तर्हि तं भोक्तुं शक्नोमि। मातृप्रसादरूपं मांसं भोक्तुमधुना न पारयामि, परमङ्गुल्या तदास्वादनं करोमि, माता चेत् रुष्टतां भजेत। (सर्वेषां हास्यम्)

"अये! ममेयं पुनः कीदृशी तावदवस्था संवृत्तेति कथ्यतां भोः। एकदा बाष्पीययानादवतीर्य वर्धमानात् तद्देशं प्रति गच्छन्नासम्। अहं गोशकटे उपविष्टः; तदैव सवृष्टिर्झञ्झावातः समारब्धः। कुतश्चिन्मे गोशकटेन केचन जना युक्ता अभवन्। मत्सहयात्रिणो लोका अब्रुवन्—'एते नाम दस्यव' इति। तदा अहमीश्वरनामानि कर्तुं प्रवृत्तः। कदा तु रामो राम इति अजपम्, कदा वा काली कालीति, कदा हनुमान् हनुमानिति कीर्तितवान्। सर्वथैव मया कीर्तितम्। उच्यतां तावत्—किंविधमेतत्?"

अपि श्रीरामकृष्ण एवं कथयति यत्—"एक एव ईश्वरः, तस्य असंख्यातानि नामानि; किमिति भिन्नधर्मावलम्बिनो भिन्नसम्प्रदाया वा लोका मुधैव विवदमाना म्रियन्ते?"

श्रीरामकृष्णः (बलरामं प्रति)—कामिनी-काञ्चने एव माया। तयोर्मध्य अनेकदिनावस्थानात् संज्ञा व्यपगच्छति—मनस्येवं भवति—'सुखेनास्मी'ति। संमार्जकः पुरीषभारं वहति—नित्यमेव तत् कुर्वतस्तस्य घृणा नावतिष्ठते। ईश्वरस्य नामगुणकीर्तनादेव क्रमेण भक्तिरुत्पद्यते।

(माष्टारमहोदयं प्रति)—नैतस्मिन् लज्जितव्यम्। लज्जा घृणा भयं चेति विद्यन्ते चेद् (किमपि) भवेन्नहि।'

"अमुष्मिन् देशे सुमधुरं कीर्तनं भवति—मृदङ्गयोगेन कीर्तनम्? अहो नकुड़ाचार्यस्य गानस्य चमत्कारित्वम्! ननु वृन्दावने युष्माकं विग्रहसेवा वर्तते?"

बलरामः—आम्, अस्ति देव! कुञ्जमेकं वर्तते। तत्र भवति श्यामसुन्दरसेवा।

श्रीरामकृष्णः—वृन्दावनमहं गतः। तत्र निधुवनं नाम मनोहरं स्थानम्।

२७-अक्टोबरः, १८८२-खृः

अद्य खलु कोजागरी लक्ष्मीपूजा। शुक्रवासरः, २७-अक्टोबरः, १८८२-खृष्टाब्दः। श्रीरामकृष्णो दक्षिणेश्वरस्थ-कालिकायतनस्य तस्मिन्नेव पूर्वपरिचिते कक्षे उपविशन्नासीत्। विजयगोस्वामिना हरलालेन च सह आलपति स्म। कश्चित् समागम्यावदत्—केशवसेनो बाष्पीयपोतेन घट्टे समुपस्थितः। केशव-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शिष्याः प्रणम्याभणन्—"महाशय, बाष्पीयपोतः संप्राप्तः, भवता गन्तव्यम् ; एतु भवान्, स्तोकं भ्रमिष्यति। केशवमहोदयस्तावत् पोते तिष्ठति, अस्मान् प्ररितवानसौ।"

वेला—चतुर्घटिका वादिता। श्रीरामकृष्णो नौकायोगेन पोतमारोहति ; तत्सहचरो विजयः। नौकामारूढ़ एव बाह्यज्ञानशून्यो जातः, समाधिस्थः।

माष्टारः पोते दण्डायमानः समाधिचित्रमेतत् आलोकयति। स त्रिवादनवेलायां केशवस्य पोतमारुह्य कलिकातात आगतः। महानेव तस्याभिलाषः—श्रीरामकृष्णकेशवयोर्मिलनं तयोश्चानन्दं द्रक्ष्यति, तयोरालापमपि श्रोष्यति। केशवस्तस्य साधुचरित्रेण वक्तृताबलेन च माष्टारवत् अनेकेषां वङ्गीययूनां मनांसि हृतवान्। अनेके तावत् परमात्मीयबोधेन तस्मै हार्दिकप्रीतिमयच्छन्। केशवस्तावत् इंराजीनिष्णातो जनः, इंराजीदर्शनसाहित्यानि अधीतवान्। असौ पुनर्बहुशः देवदेवीपूजां पौत्तलिकतेति अभ्यधात्। एवंविधो जनः श्रीरामकृष्णे भक्तिं श्रद्धां चाधत्ते, पुनरन्तरा अन्तरा तं द्रष्टुमायाति। नूनमेष विस्मयकरो व्यापारः! तयोर्मानसमैक्यं क्व कथं वा संवृत्तमिति रहस्यभेदने माष्टारादयोऽनेक एव कौतूहलाक्रान्ता जाताः। श्रीरामकृष्णो नूनमेव निराकारवादी, परन्तु पुनः साकारवादी च। स ब्रह्मचिन्तनं करोति, देवदेवीनाञ्च प्रतिमानां पुरतः पुष्पचन्दनं विरचय्य पूजां विदधाति, प्रेमोन्मत्तः संश्च नृत्यगीतं करोति! स पर्यङ्कशय्यायामुपविशति, रक्तदशं वसनं, गात्रावरणं, चरणच्छदौ, पादुके च परिधत्ते, किन्तु संसारधर्मं नाचरति। तस्य तावत् सर्व एव भावाः सन्न्यासिनः, अतो जनास्तं परमहंस इति व्यपदिशन्ति। पक्षान्तरे केशवो निराकारवादी, सदारापत्यः संसारकृत्यानि निर्वाहयति, इंराजी-भाषायां वक्तृतां तनोति, समाचारपत्रे प्रबन्धादीनि लिखति, विषयकर्माणि च सम्पादयति।

समवेताः केशवप्रमुखा ब्राह्मभक्ताः पोतादेव देवतायतनशोभां निरीक्षन्ते। पोतात् पूर्वदिशि अनतिदूरत एव इष्टकबद्धघट्टं देवतायतनस्य च चत्वरम्। आरोहिभ्यो वामपार्श्वतश्चत्वराच्च उत्तरदिशि क्रमेणैव द्वादशशिवमन्दिराणां षट् मन्दिराणि, दक्षिणपार्श्वतश्च शिष्टानि षट् मन्दिराणि। शारदनीलनभश्चित्रपटे भवतारिण्या मन्दिरचूड़ा उत्तरस्यां च दिशि पञ्चवट्या 'झाउ'वृक्षस्य च शिरोभागा दृश्यन्ते। वकुलतलादारात् एकं वाद्यमवनं कालिकायतनाच्च दक्षिणप्रान्तभागतोऽपरम्। वाद्यभवनयोरन्तरा उद्यानपथः, पार्श्वत एव श्रेणीबद्धाः पुष्पवृक्षाः। शारदनीलाकाशनीलिमा जाह्नवीजले प्रतिफलितो भवति। बहिर्जगति कोमलभावो, ब्राह्मभक्तानामपि हृदयाभ्यन्तरे कोमलभावः। ऊर्ध्वे सुन्दरं तथा सुनीलमनन्तमाकाशम् ; सम्मुख एव चारुदेवतायतनम् ; नीचैश्च पवित्रसलिला गङ्गा यस्यास्तीरे आर्या ऋषयो भगवच्चिन्तनं कृतवन्तः। पुनरागच्छति कश्चिन्महा-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पुरुषः—साक्षात् सनातनो धर्मः। ईदृशं दर्शनं मानुषभाग्येन सर्वदा न संघटते। एवंविधे स्थले समाधिस्थं महापुरुषमुद्दिश्य कस्य वा भक्त्युद्रेको न स्यात् अथवा विगलति न किमपि पाषाणहृदयम् !

नौका सन्निलग्ना। सर्व एव भगवन्तं श्रीरामकृष्णं द्रष्टुं व्यग्रमानसाः। जनसंमर्दो जातः। श्रीरामकृष्णं निरापत् अवतारयितुं केशवः शशव्यस्तोऽभवत्। बलवत्कष्टेन विहितसंज्ञः श्रीरामकृष्णो प्रकोष्ठाभ्यन्तरं नीयते। स इदानीमपि भावस्थः—कस्यचित् भक्तस्य स्कन्धस्योपरि हस्तं न्यस्यायाति। पादौ तस्य केवलमेव स्पन्देते। 'क्याबिन'-कक्षं श्रीरामकृष्णः प्रविष्टवान्। केशवादयो भक्तास्तं प्राणमत्, किन्तु तस्य कापि संज्ञा नासीत्। कक्षमध्ये एकं फलकम्, कति च विष्टराः। एकस्मिन् विष्टरे श्रीरामकृष्ण उपवेशितः, केशवोऽपरस्मिन्नुपविष्टः। विजयोऽपि उपाविशत्। अन्ये भक्ताः कक्षभूमौ प्राप्ते आसने उपाविशन्। अनेकेषां जनानामासनस्थानं नाभवत्। ते तावद् बहिःस्था उद्वीक्षणेन पश्यन्ति स्म। श्रीरामकृष्ण उपविशन्नेव पुनः समाधिस्थो जातः। सम्पूर्णतयाऽसौ बाह्यशून्यः। सकला एव एकदृष्ट्या तं पश्यन्त आसन्।

केशवो व्यलोकयत्—कक्षमध्ये बहवो जनाः सन्ति, श्रीरामकृष्णस्य तावत् क्लेशो भवति। विजयस्तं परित्यज्य साधारण-ब्राह्मसमाजभुक्तोऽभूत्, केशवकन्याविवाहादिव्यापारेषु च बह्वीभिर्वक्तृताभिः स केशवविपक्षतामातनोत्; अतो विजयं दृष्ट्वा केशवः किञ्चिदिवास्वस्थो जातः। केशवो गवाक्षानुन्मोचयितुम् आसनादुदतिष्ठत्।

ब्राह्मभक्ताः श्रीरामकृष्णमनन्यदृष्ट्या अवलोकयन्ति स्म। श्रीरामकृष्णस्य तदा समाधिभङ्गो जातः। अद्यापि भावः पूर्णमात्रयाऽवर्तत एव। श्रीरामकृष्णः स्वयमेव अस्फुटस्वरेण वदति स्म—'मातः, कथं त्वं मामत्र आनीतवती? किमहमेतान् वृतेरन्तरतस्त्रातुं पारयामि?'

ननु किमिदं तावत् श्रीरामकृष्णेन परिदृष्टं—संसारिणो जना वृतेरन्तरेव बद्धाः; अतो बहिर्निर्गन्तुं न क्षमाः, बहिःस्थमालोकमपि ते द्रष्टुं नालम्, सर्वेषां तेषां विषयकर्मभिर्हस्तपादं बद्धम्? केवलं गृहस्यान्तरस्य वस्तुजातं ते द्रष्टुमर्हन्ति मन्यन्ते च—जीवनस्योद्देश्यं केवलं देहसुखावाप्तिर्विषयकर्माणि च—कामिनीकाञ्चनञ्च? अतः किं श्रीरामकृष्ण एवमवादीत्—'मातः, त्वं कथं मामत्र आनीतवती? किमहमेतान् वृतेरन्तरतस्त्रातुं पारयामि?'

श्रीरामकृष्णस्य क्रमश एव बाह्यज्ञानं भवति। गाजीपुरस्य नीलमाधवमहोदयः कश्चिद् ब्राह्मभक्तश्च पओहारीबाबाप्रसङ्गमुत्थापितवान्।

कश्चिद् ब्राह्मभक्तः (श्रीरामकृष्णं प्रति)—महाशय, एते सर्वे पओहारी-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बाबेति महात्मानं दृष्टवन्तः। स गाजीपुरमधितिष्ठति। भवत्सदृशोऽयमपरः कश्चित्।

श्रीरामकृष्ण इदानीमपि वाग्व्यवहाराय न प्रभुः। किञ्चिदसौ स्मितमकरोत्।

ब्राह्मभक्तः (श्रीरामकृष्णं प्रति)—महाशय, पओहारीबाबा स्वगृहे भवतो यान्त्रिकीमेकां प्रतिकृतिं स्थापितवान्।

श्रीरामकृष्ण ईषद्धास्यं वितन्वन् आत्मदेहमभि अङ्गुल्या निर्दिशन्नाह—"केवलं बहिरावरणम्।

"बालिशं तस्यावरणञ्च—देही देहश्च।" देहो विनश्वरः, न स्थास्यतीति किं श्रीरामकृष्णो भणति? देहस्यान्तर्यः स एव देही, स एवाविनाशी; अतो देहस्य यान्त्रिक्या प्रतिकृत्या किम्? देहो नाम अनित्यं वस्तु, अस्यादरेणालम्। परं यो भगवान् अन्तर्यामी मनुष्यहृदयमध्ये विराजति, तस्यैव पूजा करणीया।

श्रीरामकृष्णः किञ्चित् प्रकृतिस्थो जातः। स वदन्नास्त—"परन्तु, काचित् कथा वर्तते एव। भक्तस्य हृदयं तस्यावासस्थानम्। नूनमसौ सर्वभूतेषु तिष्ठति, परं भक्तहृदये एव सविशेषमास्ते। यथा कश्चिद् भूम्यधिकारी तस्याधिकारस्य सर्वत्रैव स्थातुमर्हति; किन्तु लोका वदन्ति—'अयं तस्य अमुष्मिन्नुपवेशनकक्षे प्रायशस्तिष्ठति।' भक्तानां हृदयं खलु भगवत उपवेशनकक्षम्।" (सर्वेषामानन्दः)

"ज्ञानिनो यं ब्रह्मेति वदन्ति, योगिनस्तमेव आत्मेति उदाहरन्ति, भक्ताश्च पुनश्चेमं भगवानिति वक्ति।

"एक एव ब्राह्मणः, यदा पूजयति, तदा पूजक इति नाम, यदासौ पचति तदा पाचकब्राह्मण इति। यो ज्ञानी ज्ञानयोगं समाश्रित्य वर्तते—स नेति नेतीति विचारं करोति। नेदं ब्रह्म, अदोऽपि न ब्रह्म; ब्रह्म न जीवो नापि जगत्—एवं विचिन्वतो जनस्य यदा मनः स्थैर्यमेति, मनो गच्छति च लयं, किञ्च समाधिर्भवेत्; तदैव ब्रह्मज्ञानम्। ब्रह्मज्ञानिनो यथार्थधारणा यद्—ब्रह्म सत्यं जगन्मिथ्या; नामरूपाणि—सर्वाण्येतानि स्वप्नवत्। ब्रह्म किं नामेति वाचा नैव प्रकाश्यते; ब्रह्म तावद् व्यक्तिः (Personal God) इत्यस्यापि नास्ति वचनावसरः।

"ज्ञानिन एवं वदन्ति—यथा वेदान्तवादिनः वदन्ति। भक्तास्तु भगवतः सर्वा एवावस्थाः आददति। ते जाग्रदवस्थामपि सत्यामेव उदाहरन्ति, न तु स्वप्नवदिति आचक्षते। भक्ता भणन्ति—जगदेतद् भगवत ऐश्वर्यम्। आकाशं, नक्षत्राणि, चन्द्रः, सूर्यः, पर्वताः, समुद्राः, जीवाः, जन्तवश्च—

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सकलान्येतानि ईश्वर एव सृष्टवान्। तानि तस्यैव ऐश्वर्यम्। अन्तरेऽसौ—हृदयमध्ये—पुनर्बहिरप्यास्ते। उत्तमो भक्तो निगदति—असौ नाम स्वयं चतुर्विंशतितत्त्वानि जीवजगन्ति च संवृत्तः। भक्तस्याभिलाषो यत्—शर्करां भोक्ष्यामीति, परं शर्करा भवितुं न काम्यत्यसौ। (सर्वेषां हास्यम्)

"भक्तस्य कीदृश भावः—किं ज्ञायते? 'हे, भगवन्, त्वं प्रभुरसि, दासस्तेऽहम्'; 'माताऽसि त्वं, सन्तानस्तेऽहम्', अथवा, 'त्वमेव पिता वा माता वाऽसि मे।' 'त्वमेव पूर्णः, अंशस्तवाऽहम्' इति। अहं ब्रह्मास्मीति वचो भक्तो वक्तुं नेच्छति।

"योगिनोऽपि परमात्मानं साक्षात्कर्तुमीहन्ते। तत्रोद्देश्यं हि जीवात्म-परमात्मनोर्योगः। योगिनो विषयेभ्यो प्रत्याहृत्य परमात्मन्येव मनः स्थिरीकर्तुं यतन्ते। अतस्ते प्रथमावस्थायां निर्जने देशे स्थिरासने अनन्यमनसो ध्यानचिन्तनादिकं कुर्वन्ति। परन्तु वस्तु एकमेव—नामभेदमात्रम्। यच्च ब्रह्म स एवात्मा। असावपि किल भगवान्। तद् ब्रह्मज्ञानिनो ब्रह्म, योगिनः परमात्मा, भक्तस्य च भगवान्।"

अथ बाष्पीयपोतः कलिकातां प्रति चलति स्म। गृहमध्ये ये नाम श्रीरामकृष्णं पश्यन्ति स्म, तस्यामृतमयीं कथां च शृण्वन्ति स्म, ते पोतश्चलति वा न वा इति बोद्धुमपि नाशक्नुवन्। कच्चित् पुष्पासीनो भ्रमरो विरौति?

क्रमेण पोतो दक्षिणेश्वरमतिक्रान्तवान्। मनोहरा देवालयच्छविर्दृश्यपटाद् बहिर्भूता संवृत्ता। पोतचक्रविक्षुब्धं नीलाभं गङ्गावारि तरङ्गायितं फेनिलं कल्लोलपूर्णञ्च भवितुमारभत। भक्तानां कर्णेषु स एव कल्लोलो न सम्प्राप्तः। ते नाम मुग्धा आलोकयन्ति सहास्यवदनम्, आनन्दमयं, प्रेमानुरञ्जितनयनं, प्रियदर्शनम् अद्भुतञ्चेकं योगिनम्। सर्वत्यागिनं प्रेमिकं कञ्चित् विरागिणं दृष्ट्वा विमुग्धास्ते। असौ नाम ईश्वरादृते किमपि न जानाति। इतस्तु श्रीरामकृष्णकथा प्रचलत्येव।

श्रीरामकृष्णः—वेदान्तवादिनो—ब्रह्मज्ञानिनो वदन्ति—सृष्टिः स्थितिः प्रलयो जीवो जगच्च—एतानि शक्तेर्विलसितम् (लीला)। विचारे तु एतानि स्वप्नवत् प्रतिभान्ति। ब्रह्मैव वस्तु, अन्यत् सर्वमवस्तु; शक्तिरपि स्वप्नवदवस्तु।

"सहस्रकृत्वो विचारः क्रियतां नाम, परन्तु त्वं समाधिमनास्थाय शक्तेरधिकारमतिक्रम्य गन्तुं नालम्। 'ध्यानमहं करोमि' 'चिन्तनमहं करोमि'—एतानि सर्वाण्येव शक्तेरधिकारे शक्तेरैश्वर्ये च वर्तन्ते।

"अतो ब्रह्म शक्तिश्चाभेदे। तयोरेकं चेत् स्वीक्रियेत अपरमपि उरीकर्तव्यम्। यथा—अग्निस्तस्य दाहिका शक्तिश्च, अग्नावङ्गीकृते एव तद्दाहकशक्तिरपि

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अङ्गीकर्तव्या। दाहकशक्तिं हित्वा अग्निर्भावयितुं न शक्यते। तथैव अग्निं वर्जयित्वा न दाहकशक्तिः पुनर्भाव्यते। सूर्यं परित्यज्य सूर्यरश्मिर्न भावयितुं पार्यते, पुनश्च सूर्यरश्मिं मुक्त्वा सूर्योऽपि न भावनार्हः।

"दुग्धं तावत् कीदृशम् ? ननु धवलं धवलमिति। न हि दुग्धवर्जं तद्-धवलत्वं कल्प्यते। पुनर्नहि दुग्धस्य धवलत्वं त्यक्त्वा दुग्धं कल्पनीयम्।

"तस्माद् ब्रह्मवर्जं शक्तिश्चिन्तयितुं न शक्या। नित्यं परिवर्ज्य लीलां, लीलां च परित्यज्य नित्यमपि न भावयितुं शक्यते।

"आद्या शक्तिर्लीलामयी—सृष्टिस्थितिप्रलयान् कुर्वत्यास्ते। कालीति तस्या नाम। सैव काली ब्रह्म। एकमेव वस्तु, यदासौ (ईश्वरः) निष्क्रियः—सृष्टि-स्थितिप्रलयानां न किमपि कर्म करोति—एवमेव यदा भावयामि, तदा तं ब्रह्मेति व्यपदिशामि। यदासौ एतानि कार्याणि विदधाति तदैव तं कालीति वच्मि, शक्तिरिति वच्मि। एकैव व्यक्तिः, केवलं नामरूपयोर्भेदः।

"यथा जलं 'वाटार्' 'पानि' चेति। एकस्यामेव पुष्करिण्यां त्रिचतु-र्घट्टानि। घट्टे एकस्मिन् हिन्दवो जलं पिबन्ति, ते वदन्ति जलमिति ; अन्यस्मिन् घट्ट मुसलमाना जलं पिबन्ति, ते वदन्ति पानीति ; पुनरपरस्मिंश्च घट्टे इंरेजा जलं पिबन्ति, ते गदन्ति 'वाटार्' इति। त्रीण्येव एकम् ; केवलं नामतः पृथक्। केचन तमीश्वरम् 'आल्ला' इति लपन्ति, के वा 'गड्' इति, केचिच्च 'ब्रह्मे'ति शक्त ; केचन 'काली'ति, केचिद्वा 'रामः' इति 'हरि'रिति 'यीशु'रिति 'दुर्गे'ति च कथयन्ति।

केशवः (सहास्यम्)—काली कियद्भिर्भावैर्लीलां प्रकटयति, ता एव कथा वारमेकं कथयतु भवान्।

श्रीरामकृष्णः (सहास्यम्)—सा नानाभावैर्लीलां रचयति। सैव महाकाली नित्यकाली, श्मशानकाली, रक्षाकाली, श्यामा का ी च। महाकाल्या नित्यकाल्याश्च कथाः तन्त्रेषु विद्यन्ते। यदा सृष्टिर्नाभूत् ; चन्द्रः सूर्यः पृथिवी च नासन् ; केवलं निगूढ़न्तम आसीत्, तदा केवलं माता निराकारा महाकाली महाकालेन च समं व्यराजत।

"श्यामायाः काल्या अनेकशः कोमलभावः—असौ तावद् वराभयदात्री। हस्थवाटिकायां तस्या एव पूजाऽनुष्ठीयते। यदा महामारी दुर्भिक्षं भूमि-कम्पोऽनावृष्टिश्च सम्भवन्ति, तदा रक्षाकाली आराध्या। श्मशानकाल्यास्तु संहारमूर्तिः ; शवशिवाडाकिनीयोगिनीनां मध्ये श्मशानस्योपरि साऽवतिष्ठते। रुधिरधारा, गले मुण्डमाला, कट्यां च नराणां करसंघातैः कृता काञ्ची। यदा जगन्नाशो भवति महाप्रलयश्च प्रवर्तते, तदा माता सृष्टेर्बीजजातं समाहृत्य रक्षति—यथा गृहिण्याः सकाशे जीर्णवस्त्रादि-साधारणवस्तूनां हण्ड्येका

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वर्तते—यस्यां सा नानाविधानि द्रव्याणि उद्धृत्य रक्षति। (केशवादिसर्वेषां हास्यम्)

"नन्विदमेव भोः ! गृहिणीनामीदृशी काचित् हण्डी वर्तते ; तस्या अभ्यन्तरे समुद्रस्य फेनः, नीलवटिकाः, क्षीरिकाणां क्षुद्रपोट्टलिबद्धानि बीजानि, कुष्माण्डबीजानि, अलाबुबीजानि चैतानि सर्वाणि रक्ष्यन्ते ; प्रयोजनवशाद् बहिरानीयन्ते। माता ब्रह्ममयी सृष्टिनाशात् परम् ईदृशानि सर्वाणि बीजानि समाहृत्य रक्षति। सृष्टेरनन्तरम् आद्या शक्तिर्जगदन्तरे तिष्ठति ; जगत् प्रसूते, पुनरपि जगदन्तरे तिष्ठति। वेदे 'ऊर्णनाभ'स्य कथाऽस्ति। ऊर्णनाभोऽन्तरत एव जालं निःसारयति, पुनश्च स्वयमेव तस्य जालस्योपरि तिष्ठति। ईश्वरो जगत आधार आधेयश्च—उभावेव।

"किं तावत् काली कृष्णवर्णा ? दूरस्थेति सा कृष्णेति प्रतीयते। यथायथं यद्यसौ विज्ञाता स्यात् तर्हि नैव कृष्णाऽधिगम्यते।

"आकाशं दूरादेव नीलं भाति, समीप एव तत् पश्य, कोऽपि तस्य वर्णो नास्ति। समुद्रजलं दूरत एव नीलम्, पुनर्नेदयन् हस्तेन गृहीत्वा पश्य, कोऽपि वर्णो नास्ति। एवमुक्त्वा प्रेमोन्मत्तः सन् श्रीरामकृष्णो गातुमारभत—

"कृष्णरुचिमयी किमु मे जननी ?
सम्भृतसुन्दर-सितेतरकान्तिः
दिगम्बरी किल कृतजनशान्तिः।
मानसपङ्कजदीप्तिविधात्री
राजति वाञ्छितमङ्गलकारिणी ॥"

श्रीरामकृष्णः (केशवादीन् प्रति)—बन्धनं मुक्तिश्च—सैव द्वयोरपि कर्त्री। तस्या एव मायया संसारी जीवः कामिनीकाञ्चनाभ्यां बद्धः, पुनः सत्यां तस्या दयायां जीवो मुक्तः स्यादेव। सा हि 'भवबन्धस्य हारिणी तारिणी।' एवं ब्रुवाणो गन्धर्वनिन्दिना कण्ठेन श्रीरामकृष्णो रामप्रसादस्य गानं गायति—

"श्रीश्यामा जननी भवार्णवतटे संसारहट्टान्तरे
सूत्राबद्धविशेषपत्ररचनामुड्डीनयत्यद्भुतम् ।
आशावायुभरैरिह प्रचलितां मायाख्यरज्ज्वन्वितां
नाड़ीपञ्जरसंश्रितां प्रवहन्तीं ग्रन्थिं जनानामहो ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पत्री सा स्वगुणैः स्वयं विरचिता निर्माणसीमोपमा
तद् रज्जुविषयैर्विघृष्टमहिमा कार्कश्यभावं गता।
द्वेयकञ्चेयमथान्यपत्ररचनां वेगैश्छिनत्ति स्वयं
माता हास्यकरी करोति च पुनः शब्दं कराभ्यां मुदा।।
दूरं यास्यति वायुवेगविवशा लीलास्पदं सा पुनः
मातस्ते परिबद्धपत्ररचना हित्वा प्रभावं तव।
विश्वाम्भोधिमतीत्य तीव्ररभसा संहारवायुश्रिता
वक्तीदं भवनाशिनीपदनतो रामप्रसादः स्वयम् ।।"

"सा खलु लीलामयी ; संसारोऽयं तस्या एव लीलास्थानम्। सैव इच्छामयी आनन्दमयी च। मनुष्याणां च लक्षेषु कस्मैचित् सा मुक्तिं ददाति।"

ब्राह्मभक्तः—महाशय, सा चेदिच्छेत् सर्वानेव मुक्तान् विधातुमर्हति। कथं तर्हि संसारे वयं तया बद्धीकृताः ?

श्रीरामकृष्णः—तस्या एवेच्छा। तस्या इयमिच्छा यत् एतान् सर्वानादाय सा क्रीड़ेत्। केन्द्रक्रीड़के आदावेव स्पृष्टे धावनं नावश्यकं स्यात्। यद्यसौ सर्वैरेव स्पृश्येत, तर्हि खेलनं कथं स्यात् ? सर्वैरेव स्पृष्टः केन्द्रक्रीड़कोऽसन्तुष्टिमियात्। क्रीड़ायां प्रचलत्यां केन्द्रक्रीड़कस्य आह्लादो जायते। तस्मात्—'द्वेयकञ्चेयमथान्यपत्ररचनां वेगैश्छिनत्ति स्वयम्। माता हास्यकरी करोति च पुनः शब्दं कराभ्यां मुदा।।' (सर्वेषामानन्दः)

"नेत्रेङ्गितेन सा लोकस्य मन आदिष्टवती—याहि, अधुना संसारकार्यं कुर्विति। को नामात्र मनसो वा दोषः ? सा चेत् पुनः सदयं मनः प्रत्यानयति, तर्हि विषयबुद्धेर्हस्तान्मुक्तिर्भवति। तदा पुनस्तस्याः पादपद्मे मनो निविशते।

श्रीरामकृष्णः संसारिभावेन मातृसकाशे अभिमानभरेण गीतमाचरति—

"अमुना किल दुःखरंहसा
परिशोचामि पुनः सदाहम्।
त्वयि मातरि मद्गृहे कथं
विलसत्यामपि चौर्यमद्भुतम्
तव नाम सदैव तिष्ठतु
मम वक्त्रे परिचिन्तयामि तत्।
समये पुनरागते हि मे
मनसो विस्मरणं भवेदिह ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विषयोऽधिगतो मया च यस्तव सा नूनमेव चातुरी ।
विदितं पुनरत्र तन्मया तथा बुद्धं परितश्च पश्यता ॥
न गृहीतमथो न वार्पितं न च किञ्चित् खलु लब्धमेव वा ।
अयि मातरिह त्वया च यत् ननु दोषः मम किं नु विद्यते ॥
यदि दत्तमितोऽपि लभ्यते सुविधेयं हि तथोपभुज्यते ।
अथ समर्पण-दान-भोजनैः परिकर्तुञ्च मयापि शक्यते ॥
सुयशोऽपयशस्तथाऽयशः सुरसो वा कुरसश्च वाप्यथ ।
सकलं किल तावकं क्षितौ रसरूपा त्वमथो रसेश्वरी ॥
रससागरमूर्तिरव्यया रसभङ्गं कुरुषे कथं पुनः ।
तव सृष्टिरिह दग्धदृष्टिजा तनुते सैव रसं परामृतम् ॥
आह प्रसादो हृदयं प्रदत्तं नेत्रेङ्गितैः किञ्चिदपह्नवद्धि ।
विधाय तस्मादतिसृष्टमस्मिन् सुस्वादुबुद्ध्या परिगृह्यते च ॥'

"तन्मायामोहिता मानवाः संसारिणः सञ्जाताः ।" 'आह प्रसादः—प्रदत्तं हि चित्तं त्वया जनेष्विह ।'

ब्राह्मभक्तः—महाशय, किं सर्वत्यागमन्तरेण ईश्वरो लब्धुं न शक्यते ?

श्रीरामकृष्णः (सहास्यम्)—मा तावद् भोः ! कथं वः सर्वत्यागो विधेयः ? रसावेशेन सुष्ठु तावद्धि स्थीयते युष्माभिः—ससारगुड़े मस्तुगुड़े च । (सर्वेषां हास्यम्) साधु युष्माभिरास्यते । किं नस्केति क्रीड़ा ज्ञायते ? अनेकातिक्रमेणाहं क्रीड़ाया निःसारितः । यूयं नितरां चतुराः । युष्मासु कश्चित् दशमस्थाने, कोऽपि षष्ठस्थाने, कश्चन पञ्चमस्थाने अस्ति । यूयं नातिक्रमणं कृतवन्तः ; अतः अहमिव न निःसारिताः । चलति च खेला, एतत्तु साधु । (सर्वेषां हास्यम्)

"यूयं संसारधर्मं पालयथ ; सत्यमेव ब्रवीमि—अस्मिन् कोऽपि दोषो नास्ति । ईश्वरं प्रति तु मनः निधातव्यं खलु । अन्यथा किमपि न स्यात् । हस्तेनैकेन कर्म कुरुत, अथापरेण हस्तेनेश्वरमवलम्बध्वम् । कर्मणि शेषं गते द्वाभ्यामेव हस्ताभ्यामीश्वरमालम्बध्वम् ।

"मन एव प्रसक्तम् । मनस्येव जीवो बद्धो मनस्येव मुक्तः । मनस्तु यथानुरञ्जनं रज्यते । यथा—रजकगृहस्थितानि वस्त्राणि । रक्तै रञ्जयेच्चेद् वस्त्रं रक्तमेव स्यात्, नीलेन नीलं, श्यामेन च श्यामं स्यात् । येन वर्णेन रञ्जयेस्तथैव स्यात् । किं न दृश्यते, यदि किञ्चित् इंरेजीं पठेस्तर्हि ततक्षणमेव इंरेजीकथास्ते आगच्छन्त्येव । तथा हि 'फुट्फाट् ;

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इट्-मिट्।' (सर्वेषां हास्यम्) अपि च पादयोः 'बुट्' इति चर्मपादुके, 'शीश्'शब्देन च गानम्—इत्यादीन्यपि सर्वाणि आपतिष्यन्त्येव। पुनर्यदि कश्चित् संस्कृतं पठेत्, तर्हि पण्डितः सन् मुखात् श्लोकान् निर्गमयन्ति। कुसङ्गे मनश्चेत् स्थापयेस्तर्हि तदुचिता वार्तालापाश्चिन्ताश्च भविष्यन्ति। यदि भक्तैः साकं तत् स्थापयेस्तर्हि ईश्वरचिन्ता-हरिकथादीनि सर्वाणि भवेयुः।

"मनोऽधिकृत्यैव सर्वं सम्पद्यते। एकस्मिन् पार्श्वे पत्नी, अन्यस्मिंश्च पार्श्वे सन्तानः! लोकः पत्नीं तावत् एकभावेन, सन्तानञ्च पुनरन्यभावेन आद्रियते। मनस्तु एकमेव।"

श्रीरामकृष्णः (ब्राह्मभक्तान् प्रति)—जीवो मनस्येव बद्धः, मनस्येव मुक्तः। मुक्तपुरुषोऽहम्; संसारे तिष्ठामि, अरण्ये वा स्याम्, मम तावद् बन्धनं किम्? अहं खलु ईश्वरस्य सन्तानः, राजाधिराजस्य सुतः; को नाम मां बध्नीयात्? यदि सर्पो दशति, 'विषं नास्ती'ति दृढ़मुच्यमाने विषं दष्टजनं विहाय गच्छत्येव। तथा 'नाहं बद्धो मुक्तोऽहमि'ति दृढ़तया उदीरयन् तामेव दशां समधिगच्छति यः कोऽपि। मुक्त एव भवति।

"कश्चित् मह्यं खृष्टीयानां कञ्चित् ग्रन्थं दत्तवान्। अहं कञ्चित् तच्छ्रावणार्थमुक्तवान्। तस्मिन् ग्रन्थे केवलं 'पापम् पाप'मित्यासीत्। (केशवं प्रति)' युष्माकं ब्राह्मसमाजेऽपि केवलं 'पाप'मिति वर्ण्यते। यो 'बद्धोऽहम्, बद्धोऽहमि'ति वारं वारं वदति, स वराकः बद्धतामेव याति। यो रात्रिन्दिवं 'पापोऽहं पापोऽहमि'ति उच्चारयति स एव तद्रूपतामेति।

"ईश्वरस्य नाम्नि एतादृशो विश्वासो भवेद् यत्—'अयमहं तस्य भगवतः किल नाम कीर्तितवान्, किं मे अधुनापि पापं स्थास्यति? कथं मे पुनः पापं स्यात्? कुतस्तावन्मे बन्धनम्?' कृष्णकिशोरः परमो हिन्दुः, सदाचारनिष्ठो ब्राह्मणः। स वृन्दावनमगमत्। एकदा भ्रमतस्तस्य जलतृष्णा सञ्जाता। कस्यचित् कूपस्य समीपं गत्वाऽपश्यत्—कश्चित् पुरुषो दण्डायमानस्तिष्ठति। स तमवादीत्—'अरे, किं त्वं मे घटीमितं जलं दातुमर्हसि? का ते जातिः?' सोऽवदत्—'देव, हीनजातिरहम्, चर्मकारः खलु।' कृष्णकिशोर आह—'त्वं शिव इति उच्चारय। कूपात् इदानीमुत्तोल्य जलं देहि।'

"भगवन्नामकीर्तनेन मानुषस्य देहो मनश्च अन्यानि सर्वाणि च शुद्धानि सम्पद्यन्ते। केवलं पापं नरकञ्च एवमादीनि च वचांसि कथमुच्चार्यन्ते? सकृत् एवमुच्यताम्—'यान्येवाहम् अन्यायकर्माणि अकार्षं पुनस्तानि न कुर्याम्।' तस्य भगवतो नामनि विश्वासं स्थापय।"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीरामकृष्णः प्रेमोन्मत्तः सन् नाममाहात्म्यं गायति स्म—

"दुर्गां वदन् यदि तनुं परिहातुमस्मिन्....."

"अहं मातृसविधे केवलमेव भक्तिं प्रार्थितवान्। पुष्पाणि हस्ते निधाय मातुः पादपद्मे समर्प्यावदम्—'मातः, एतत्ते पापं गृहाण, एतत्ते पुण्यं गृहाण; देहि मे शुद्धां भक्तिम्; एतत्ते शुचि गृहाण, एतत्ते अशुचि गृहाण, एतं ते धर्मं गृहाण, एतं ते चाधर्मं गृहाण; देहि मे शुद्धां भक्तिम्।"

(ब्राह्मभक्तान् प्रति)—श्रूयतामेकं रामप्रसादगानम्—

"एहि रे मम मानस! भ्रमणाय गमिष्यसि
कालीकल्पतरोर्मूले स्वेष्टफलानि लप्स्यसे।
प्रवृत्तिश्च निवृत्तिश्च द्वे भार्ये खलु राजतः।
तयोर्निवृत्तिरादेया नूनं ते सहयात्रिणी॥
विवेकाख्यं सुतं तस्याः पृच्छस्व तत्त्वभारतीम्।
शुचिञ्चाशुचिमादाय कदा नु दिव्यवेश्मनि।
शयनं किल ते भावि तदेव भुवि चिन्तय॥
पूर्वोक्तयोः सपत्न्योर्हि यदा प्रीतिर्भविष्यति।
प्राप्स्यसि रे तदा श्यामां मातरं करुणामयीम्
तवाविद्यामहंकारं पितरावपसारयेः।
मोहगर्ते पतेर्वा चेत् धैर्यदण्डं ग्रहीष्यसि।
धर्माधर्मावजायुग्मं बधान तुच्छयष्टिके
न पालयेन्निषेधञ्चेज् ज्ञानखड्गेन छिन्धि रे॥
दूरात् प्रबोधयेन्नूनं प्रथमवनितात्मजम्।
न गृह्णात्युपदेशं चेत् ज्ञानसिन्धौ निमज्जय।
ब्रूते वत्स गुरोस्तात! चित्तमिष्टं भविष्यसि॥"

"संसारे तावदीश्वरलाभः कथं न स्यात्—स एव जनकराजस्यासीत्। 'संसारोऽयं मायाबन्ध' इति प्रसादोऽवादीत्। तस्याः मातुः पादपद्मे भक्तिलाभे सति—

"अश्नन् सुखं संविहरंस्तथाह-
मानन्दसन्दोहमुपाददे च॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जनक इति विख्यातो महातेजा अभून्नृपः।
न तस्यासीत् ध्रुवं कोऽपि क्वचिद्वा हि गुणात्ययः ॥
रक्षितौ तेन पक्षौ द्वौ त्यागसंसारधर्मकौ।
नित्यं मोदपयःपानं कृतं राज्ञा महात्मना ॥"

(सर्वेषां हास्यम्)

"न तु द्रागेव जनकराजो भवितुमर्हसि। जनकराजो निर्जने प्रदेशे भृशं तपस्तेपे। संसारस्थितेनापि अन्तरा अन्तरा निर्जनवासः कर्तव्यः। संसाराद् बहिः एकाकिना गच्छता यदि भगवत्कृते दिनत्रयमपि रुद्येत, तर्हि तदपि साधु एव। अथवा प्राप्ते अवसरे यदि एकाहमपि निर्जने केनचित् तस्याश्चिन्तनं क्रियेत तदपि साधु। पुत्रकलत्रार्थं लोको घटीमितमश्रु विसृजति ; ईश्वरस्य कृते को नाम रोदिति ? निर्जने तिष्ठता अन्तरा अन्तरा भगवत्कृते साधनं कर्तव्यम्। संसारमध्ये, विशेषतः कर्ममध्ये, प्रथमावस्थायां मनसः स्थिरीकरणे बाहुल्येन व्याघातो भवति। यथा चरणवीथिस्थो वृक्षकः। यदा वृक्षकावस्थस्तदा तद्रक्षार्थं वृतिद्वारा नाव्रियेत चेत् तर्हि छागा गावश्च भक्षयेयुः। प्रथमावस्थायां तावद् वृतिः प्रदातव्या। काण्डे पृथुले सति पुनर्वृतिबन्धेनालम्। तदा काण्डे हस्त्यपि बध्यते चेत् किमपि न स्यात्।

"रोगस्तावद् विकारो नाम। पुनर्यस्मिन् गृहे विकारस्य रोगी, तस्मिन्नेव जलस्यैको बृहत्कुम्भः स्वादु-तिन्तिड़ीसन्धितञ्च। यदि विकारस्य रोगिणं निरामयं विधातुमिच्छसि, तर्हि तद्गृहत एव रोगिणो निःसारणं कार्यम्। संसारी जीव एव विकारस्य रोगी ; विषय एव जलकुम्भः, विषयभोगतृष्णैव जलतृष्णा। तिन्तिड़ीसन्धितस्मरणमात्रादेव मुखात् रसक्षरणं भवत्येव ; समीपानयनं नावश्यकम्। एतादृशमपि वस्तु वर्तते गृहे ; यथा योषित्सङ्गः। अतो निर्जने चिकित्सया प्रयोजनम्।

"विवेकं वैराग्यञ्च लभमानो जनः संसारयात्रां कर्तुमर्हति। संसारसमुद्रे कामक्रोधादिरूपाः कुम्भीराः सन्ति। हरिद्रया गात्रं विलिप्य जलमवतरतः जनस्य कुम्भीराद् भयं न स्यात्। विवेकवैराग्य एव हरिद्रा ; सदसद्विचारो विवेक इत्यभिधीयते। ईश्वर एव सन्नामधेयं नित्यवस्तु। अन्यत् सर्वमसत्, अनित्यम्, दिनद्वयार्थम्। ईदृशो बोध ईश्वरे एवानुराग—एतद्धि तन्त्रम्। तमभिलक्ष्य चित्तस्याकर्षणं प्रीतिः। गोपीनां कृष्णं प्रति यादृशमाकर्षणमासीत् तादृशं प्रेम एव सप्रयोजनम्। गीतमेकं श्रूयताम्—

"निनदति पुरतो विपिने वेणुः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(न च विना गमनं मदवस्थानम्) (तिष्ठति वर्त्मनि सुन्दरयदुसुतः)

कथयत सख्यो यास्यथ वा न वा।
वाचनविषयः खलु वः श्यामः
मानसवेदनमिह मे श्यामः (सखि)
निनदति वंशी कर्णसमीपे ;
मम किल वेणुरन्तरमध्ये।
नदति च वेणुः श्यामकरधृतः
वदति च राधे ! तूर्णमिहाव्रज।
त्वद्रहितं न हि राजति कुञ्जम्
त्वमसि त्वमसि किल लावण्यपुञ्जम् ।"

श्रीरामकृष्णः साश्रुनयनो गीतमिदं गायन् केशवादिभक्तानवादीत्—राधाकृष्णौ मानयथ उत न, तयोरेतत् प्रेमाकर्षणं तावद् गृह्यताम्। भगवत्कृते कथमीदृशी व्याकुलता जायेत तदर्थं यतध्वम्। व्याकुलतासत्त्वादेव स भगवान् लब्धुं शक्यते।"

गङ्गाप्रवाहो ह्रासं गतः। बाष्पीयपोतः कलिकाताभिमुखं द्रुतगत्या प्रचलति। सेतुमतिक्रम्य कोम्पानीबागानमभितः कियद्दूरं भ्रमणार्थं काप्तेन आदिष्टः। पोतः कियद्दूरं गत इति अनेकेषामेव ज्ञानं नासीत् ; ते नाम ध्यानमग्नाः सन्तः श्रीरामकृष्णस्य कथां श्रुतवन्तः। कथं समयोऽतिक्रान्त इति कस्यापि बोधो नाजनि।

तस्मिन्नेव काले नारिकेलसंमिश्रस्य भर्जिततण्डुलस्य भोजनं प्रचलति स्म। सर्व एव तत्खाद्यस्य किञ्चित् किञ्चित् वस्त्राञ्चले गृहीत्वा भुञ्जते स्म। आनन्दोत्सवस्तावत् समारब्धः। केशवः स्वयमायोजनं कृत्वा भर्जिततण्डुलं समानीतवान्। अस्मिन्नवसरे श्रीरामकृष्णोऽद्राक्षीत—विजयः केशवश्च उभावेव सङ्कोचमालम्ब्य उपविष्टौ। स द्वयोरबोधबालकयोर्मध्ये पुनः सम्प्रीतिमानेष्यतीति प्रतीयते स्म। स हि 'सर्वभूतहिते रतः'।

श्रीरामकृष्णः (केशवं प्रति)—अये, एष विजयः समायातः। युवयोर्विसंवादः शिवरामयोर्युद्धमिव बभूव, द्वयोर्मेलनञ्च संवृत्तम्। परन्तु शिवस्य भूतप्रेतानां रामस्य च रानराणां कलहो न पुनः प्रशाम्यति ! (उच्चैर्हास्यम्)

"द्वावेव स्वजनौ ; तयोरेतादृशो व्यापारः संभवत्येव। लवकुशौ किल रामेण सार्धं युयुधाते। पुनर्ज्ञायतां—माता दुहितरौ नाम पृथक्तया मङ्गल-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वासरीयं व्रतमनुतिष्ठतः। उत्प्रेक्ष्यते—मातुर्मङ्गलं दुहितुश्च मङ्गलं पृथगेव। परन्तु अस्या मङ्गलेन अमुष्या अपि मङ्गलं भवत्येव। तद्वद् युवयोरेकस्य कश्चित् समाजो वर्तते, पुनरपरस्यापि एकेन प्रयोजनम्। (सर्वेषां हास्यम्) अवश्यमेव, सर्वमेतदपि अपेक्षितम्।

"यद्युच्यते—भगवान् स्वयमेव लीलां प्रकटितवान्; तत्र जटिलाकुटिलाभ्यां किं प्रयोजनम्? जटिलाकुटिलयोरभावे लीला न पुष्टिमश्नुते। (सर्वेषां हास्यम्) तयोरसत्त्वात् कौतुकप्रमोदो न जायते। (उच्चर्हास्यम्)

"रामानुजो विशिष्टाद्वैतवादी। तस्य गुरुरद्वैतवादी बभूव। परिणामे द्वयोर्मतानैक्यमभूत्। गुरुशिष्यौ परस्परमतस्य खण्डनं कर्तुमुपचक्रमाते। एवं घटते एव। यदेवास्तु, तथापि तौ स्वजनावेव।"

सर्वे तावदानन्दमत्ता आसन्। श्रीरामकृष्णः केशवं वदति स्म—"त्वं लोकानां प्रकृतिनिरीक्षणात् शिष्यान् न करोषि। अतस्ते एवं त्वत्तो भिद्यन्ते।

"यथादर्शनं जनाः समानाकाराः, परन्तु ते भिन्नप्रकृतयः। केषु नाम सत्त्वगुणाधिक्यम्, केषांचन रजोगुणाधिक्यं, केषां वा तमोगुणाधिक्यम्। 'पुलि'-नामानः पिष्टकाः सर्व एव समानरूपाः, परन्तु केषुचन क्षीरं सन्निविष्टम्, केषु वा नारिकेल-सारः, केषु वा कलायः।

"अपि विदितोऽसि—मम तावत् को भावः? अहं हि केवलम् आहार-विहारादिकमाचरन् वसामि, अन्यत् सर्वं जगन्मातैव जानाति। किञ्च, गुरुः कर्ता तातश्चेति कथात्रयेण मे गात्रं कण्टकविद्धवद् भवति।

"गुरुरेकः सच्चिदानन्दरूपकः। केवलमेवासौ शिक्षयेत्। मम तु पुनः सन्तानभावः। मानुषगुरूणां लक्षाण्यपि लभ्यन्ते। सर्वो हि गुरुर्भवितुकामः, को वा पुनः शिष्यो भवितुमिच्छति?

"लोकशिक्षाप्रदानं नाम नितरां कठिनम्। यदि नामासौ भगवान् साक्षादाविर्भूय आदिशेत्, तर्हि तत् सम्भवेत्। नारदशुकदेवादयो भगवत आदेशं लब्धवन्तः। शङ्कर आदेशं प्राप्तवान्। आदेशमन्तरेण कस्तव कथां श्रोष्यति? ननु ज्वलति काष्ठखण्डे कटाहस्थितं दुग्धं शब्दायमानं सत् स्फीतिं भजते। काष्ठे त्वपसारिते कुत्रापि शब्दादिकं किमपि नानुभूयते। कलिकाताया लोका उत्तेजनशालिनः। अधुनात्र कूपं खनन्ति—जलमिच्छाम इति वदन्ति; तत्र प्रस्तरः प्राप्तः; सममेव तत्स्थानं परित्यक्तम्, पुनरन्यत्र खनितुमारब्धवन्तः, तत्र वालुकाः लब्धाः, तदपि वर्जितम्, पुनरन्यस्मिन् स्थाने खननं समारब्धम्! एवमेव!

"पुनरहं भगवदादेशं लब्धवानिति मानसकल्पनयापि किमपि न सिध्येत्। ईश्वरो नूनमेव साक्षाद् आविरेति, आलपनमपि करोति। तदैव ईश्वरादेशो भवितुमर्हति। अहो, तत्कथायाः कीदृशं बलम्! तया पर्वतोऽपि टलति। केवलं

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वक्तृतया किम् ? कानिचिद्दिनानि लोकास्तां श्रोष्यन्ति, ततो विस्मृतिं यास्यन्ति, तामनुसृत्य किमपि न करिष्यन्ति ।

"अस्ति तस्मिन् कामारपुकुरे हालदार-पुष्करिणीति किञ्चित् सरः । तत्तीरे प्रत्यहमेव प्रातर्लोकाः पुरीषोत्सर्गं कृतवन्तः । ये नाम प्रातस्तत्र समागतास्ते भृशं गालीरुदसृजन् । ततः परेद्यव्यपि तद्वदेव ! पुरीषोत्सर्गो न कथमपि शाम्यति । (सर्वेषां हास्यम्) तदा लोका अधिकर्तॄन् व्यज्ञापयन् । तैः कश्चिद् भटः प्रेषितः । भटेनानेन 'मलं न विस्रष्टव्य'मिति आदेशपत्रे सन्निधापिते व्यतिकरोऽसौ विश्रान्तिं गतः । (सर्वेषां हास्यम्)

"यो लोकशिक्षां दास्यति तस्याधिकारचिह्नेन प्रयोजनम् । तदभावे तद्वाक्यं हास्यकरं स्यात् । आत्मनोऽपि अधिकारो नास्ति, कथमसौ अपरान् बोधयेत् । काणेन दर्शयता नीयमानः काणः ! (हास्यम्) तत्र हितं तु विपरीताय । भगवल्लाभे सति अन्तर्दृष्टिर्जायते, कश्च रोगः संवृत्त इति बुध्यते । तदैव उपदेशदानं साम्प्रतमेव ।

"असति च भगवदादेशे 'लोकशिक्षां ददामी'ति अहंकारो भवति । अज्ञानादेव अहंकारो जायते । अहं कर्तेति मतिरज्ञानादेव प्रभवति । ईश्वर एव कर्ता, ईश्वर एव सर्वं कुर्वन्नास्ते, 'अहं तु किमपि न करामी'ति बोधे प्रादुर्भूते मानवो जीवन्मुक्त एव । 'कर्ताहं कर्ताह'मिति बोधादेव यावद्दुःखं यावती चाशान्तिः !"

श्रीरामकृष्णः (केशवादीन् भक्तान् प्रति)— युष्माभिरुच्यते—जगत उपकारः साधनीय इति । किं भोः, जगद् एतन्मात्रम् ? अपि तु कोऽसि त्वं यद् जगदुपकारं साधयिष्यसि ? साधनेनासौ भगवान् साक्षात् क्रियताम् । तमेव लभस्व । स चेत् तुभ्यं शक्तिं दद्यात्, तर्हि सर्वेषां हितं विदधातुं पारयसि—नोचेन्न ।

कश्चिद् भक्तः—यावद् भगवल्लाभो न स्यात् किं तावत् सर्वकर्माणि त्यजेयम् ?

श्रीरामकृष्णः—न हि ; किमिति कर्माणि त्यजेः ? ईश्वरचिन्ता, तन्नामगुणगानं, नित्यकर्म—एतानि कर्तव्यान्येव ।

ब्राह्मभक्तः—अपि नाम संसारकर्म विधेयम् ? विषयकर्म वानुष्ठेयम् ?

श्रीरामकृष्णः—अथ किम् ! संसारयात्रार्थं यावता प्रयोजनं तदेव कर्तव्यम् । परं तु साश्रुनेत्रं निर्जनप्रदेशे तत्समीपे प्रार्थना कर्तव्या यथा कर्माण्यमूनि निष्कामभावेन सम्पाद्येरन् । किञ्च वक्तव्यम्—हे ईश्वर, मम तावद् विषय-कर्माणि लघय । कुतः, विजानामि प्रभो !—कर्मबाहुल्ये संवृत्ते त्वां विस्मरामीति । निष्कामं कर्म करोमीति भावयामि, किन्तु तत् सकामत्व-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मेव प्रतिपद्यते। शङ्के तावद् दानं सदाव्रतं च समाचरतो मे लोकमान्य-बुभूषा आपतेत्।

"शम्भुमल्लिकः सेवासदन-चिकित्सानिकेतन-विद्यालय-राजमार्ग-पुष्करिण्या-दीनां प्रसङ्गं कृतवान्। अहं तावदवोचम्—सम्मुखत एव यावदापतति, यद-करणं च नैव सम्भाव्येत, तदेव निष्कामेन सता कर्तव्यम्। न हि स्वेच्छया बहुषु कर्मसु आत्मसंश्लेषो मंगलावहः, एतेन ईश्वरविस्मृतिः स्यादेव। काली-घट्टे कश्चिद् दानं कुर्वन्नास्त, कालीदर्शनं तु न घटितम्। (हास्यम्) आदौ येन तेन प्रकारेण जनसंमर्दं सहित्वाऽपि कालीदर्शनं विधेयम्। ततो यावन्नाम सम्भवेत् तावदेव दानं कुर्या वा न वा। सति चाभिलाषे बाहुल्येनापि दानं क्रियताम्। ईश्वरलाभार्थमेव कर्मानुष्ठानम्। अतोऽहं शम्भुमल्लिकमुक्तवान् —'यदि ईश्वरः साक्षादायाति, तर्हि किमसौ त्वया वक्तव्यः—भवान् कानिचन सेवासदनानि चिकित्सानिकेतनानि संपादयतु?' (हास्यम्) भक्तः कदापि नैवं वदति। स पुनरेवं प्रार्थयेत—हे प्रभो, देहि मे त्वत्पादपद्माश्रयम्, त्वत्-सङ्गे एव मा सदा स्थापय, देहि मे त्वत्पादपद्मे शुद्धां भक्तिमिति।

"कर्मयोगो नितरां दुष्करः। शास्त्रेषु यानि कर्माणि विहितानि तेषामनु-ष्ठानम् अतीव कठिनम्। अधुना अन्नगताः प्राणाः। अधिकं कर्म न युज्यते। ज्वरे समुत्पन्ने आयुर्वेदीयचिकित्सा क्रियते चेत् रोगिणः शेषावस्था समापतेत्। तदा अधिकं कालहरणम् असाम्प्रतमेव। तदानीं तु 'डि-गुप्त'-नामकं ज्वरहर-मौषधम् आवश्यकम्।

"कलियुगे हि भक्तियोगो विशिष्यते; तत्र भगवतो नामगुणगानं प्रार्थना च विधीयेते। भक्तियोग एव युगधर्मः (ब्राह्मभक्तान् प्रति)—युष्माकमपि भक्तियोगः; यूयं हरिनाम कीर्तयथ, मातुर्नामगुणं गायथ; यूयं धन्याः! युष्माकं भावो साधुरेव। वेदान्तवादिवत् यूयं जगत् स्वप्नवदिति न मन्यध्वे। यूयं न तादृशा ब्रह्मज्ञानिनः, यूयं भक्ताः। यूयमीश्वरं व्यवित-भावेन उदाहरथ। एतदपि उत्तमम्। यूयं भक्ताः। व्याकुलतया प्रार्थ्यमानं तमवश्यमेव लप्स्यध्वे।"

अथेदानीं बाष्पीयपोतः कयलाघाटाख्ये स्थाने प्रत्यावृत्तः। सर्वे अवतरणार्थ-मुद्युक्ता अभवन्। कक्षाद् बहिरागत्य ते अपश्यन्—कोजागरयामिन्यां पूर्णचन्द्रो हसति स्म। भागीरथीवक्षः कौमुद्या लीलाभूमिर्जातम्। श्रीराम-कृष्णकृते शकटानयनार्थं कश्चित् समादिष्टः। कियत्क्षणानन्तरं माष्टारेण कतिपयभक्तैश्च सह श्रीरामकृष्णः शकटमारोहत्। केशवस्य भ्रातुष्पुत्रो नन्द-लालश्च आरूढवान्। श्रीरामकृष्णेन सह स कियद्दूरं गच्छेत्।

अथ शकटे समुपविष्टेषु सर्वेषु श्रीरामकृष्णः पृष्टवान्—"क्व तावत् तत्र-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भवान् ?" अर्थात्—केशवः कुत्र ? पश्यतां सर्वेषां केशव एकाकी एव उपस्थितः। स्मितास्य एवासौ। स समागच्छन्नपृच्छत्—के नाम अत्रभवता सह गमिष्यन्तीति। सर्वेषु शकटे समुपविष्टेषु केशवो भूमिष्ठः सन् श्रीरामकृष्णस्य पदधूलिं गृहीतवान्। श्रीरामकृष्णोऽपि तं सस्नेहं सम्भाष्य आपृच्छत।

शकटं प्रचलति स्म। पथि इंरेजवसतिः प्राप्ता। शोभनो राजपथः। पन्थानमुभयतो मनोरमा अट्टालिकाः। राकाचन्द्रः समुदितः। अट्टालिकास्तु विमलशीतले चन्द्रकिरणे विश्राम्यन्तीव। द्वारदेशे बाष्पीयदीपः, कक्षमध्ये दीपमालाः, स्थाने स्थाने हार्मोनियाम् तथा पियानो इति वाद्ययन्त्रयोः संयोगेन इंरेजमहिला गानं कुर्वन्ति। श्रीरामकृष्णः सानन्दं हसन् गच्छति। सहसाऽवदत्—"जलतृष्णा मे जाता। किं भवेत् ?" किमधुना कर्तव्यम् ? नन्ददुलाल 'इण्डियाक्लावस्य' समीपे शकटं स्थापयित्वा उपरि जलमानेतुं गतः। काचभाजने कृत्वा जलमानीतवान्। श्रीरामकृष्णः सहास्यमपृच्छत्—"किमेतत् काचभाजनं प्रक्षालितम् ?" नन्दलालोऽब्रवीत्—"अथ किम्।" श्रीरामकृष्णस्तेनैव भाजनेन जलमपिबत्।

बालकस्वभावः श्रीरामकृष्णः। प्रचलिते शकटे स मुखमण्डलं बहिर्गमयन् लोकान् यानानि अश्वान् चन्द्रालोकं च पश्यति स्म। सर्वेषु विषयेषु तावत् तस्यानन्दः!

नन्दलालः कलुटोलाख्यस्थाने अवातरत्। श्रीरामकृष्णशकटं सिमुलियाष्ट्रीटि श्रीयुक्तसुरेशमित्र-वाटचां विरतमभूत्। श्रीरामकृष्णस्तं सुरेन्द्रेतिनाम्ना अभिहितवान्। सुरेन्दस्तस्य परमो भक्त आसीत्।

सुरेन्द्रस्तु वाटिकायां नासीत्। स स्वीयं नूतनमुद्यानं गतः। वाटीस्था जना उपवेशनार्थं नीचगृहमुद्घाटितवन्तः। इदानीं शकटशुल्कं प्रदेयम्। को दास्यति ? उपस्थितश्चेत् सुरेन्द्र एवादास्यत्। श्रीरामकृष्णः कंचित् भक्तमादिशत्—"शुल्कं तावत् गृहस्त्रीर्याचस्व। किं ता न जानन्ति यत् तासां भर्तारो गतायातं कुर्वन्ति।" (सर्वेषां हास्यम्)

नरेन्द्रस्तामेव पल्लीमधिवसति। श्रीरामकृष्णो नरेन्द्रनाथानयनार्थं कंचित् प्रेषितवान्। अथ वाटीस्था जना द्वितलकक्षे श्रीरामकृष्णमुपावेशयत्। कक्षभूमौ कश्चित् प्रावारक आस्तृतः, तस्योपरि द्विचतुराणि बृहदुपधानानि। कक्षप्राचीरे सुरेन्द्रेण विशेषयत्नेन निर्मापितं तैलचित्रम्; तस्मिन्नेव श्रीरामकृष्णः केशवाय हिन्दु-मुसलमान-खृष्टीय-बौद्धादीनां सर्वेषां धर्माणां तथा वैष्णव-शाक्त-शैवादीनां च निखिलसम्प्रदायानां समन्वयं प्रदर्शयति।

श्रीरामकृष्णः समुपविष्टः सहास्यं जल्पं कुर्वन्नास्त; तदैव नरेन्द्रः समागतः; एतेन श्रीरामकृष्णस्य आनन्दो द्विगुणितो जातः। सोऽवदत्—"अद्य तावत्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

केशवसेनेन साकं बाष्पीयपोतेन भ्रमितुमगच्छम्। विजय आसीत्, इमे सर्वे चासन्। माष्टारं निर्दिश्यावदत्—"तं पृच्छ,—कथमिव विजयकेशवौ उक्तौ मया—अभिमानभरेण मातादुहितरौ पृथक्तया मङ्गलवारव्रतमाचरतः; किंच जटिलाकुटिले यदि नावर्तेतां तर्हि लीला न पुष्टिं भजते इत्येतानि सर्वाणि वचनानि। (माष्टारं प्रति)—किमेतन्नोक्तं भोः?

माष्टारः—आम्, देव।

रात्रिः समागता, तथापि सुरेन्द्रो न प्रत्यावर्तत। श्रीरामकृष्णो दक्षिणेश्वरं गच्छेत्, अधिकतरविलम्बो न युज्यते। रात्रेः सार्धदशघटिका वादिता। पथि चन्द्रालोकः।

शकटं समागतम्। श्रीरामकृष्णस्तदारोहत्। नरेन्द्रो माष्टारश्च तत्रभवन्तं प्रणम्य कलिकातास्थितयोर्निजवाटिकयोः प्रत्यागतौ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ब्राह्मभक्तैः श्रीरामकृष्णः

२८-अक्टोबरः, १८८२-खृः

श्रीश्रीपरमहंसदेवः सिँतिनामकस्थानस्य ब्राह्मसमाजं द्रष्टुं समागतः। २८-अक्टोबरः, १८८२-खृष्टाब्दः, शनिवासरः। आश्विनमासस्य कृष्णा द्वितीया तिथिः।

अद्य इह महोत्सवः। ब्राह्मसमाजस्य षाण्मासिकमनुष्ठानम्। अतो भगवतः श्रीरामकृष्णस्यात्र निमन्त्रणम्। अपराह्ण-त्रिचतुरघटिकासमये स कतिपयैर्भक्तैः सह शकटेन दक्षिणेश्वरस्य कालीवाटीतः श्रीयुक्त-वेणीमाधवपालस्य मनोहरायामुद्यानवाट्यां समुपस्थितोऽभवत्। तस्यामेव उद्यानवाट्यां ब्राह्म-समाजस्य अधिवेशनं भवति। ब्राह्मसमाजे स नितरां स्निह्यति। ब्राह्मभक्ता अपि तस्मिन् सातिशयं भक्तिं श्रद्धां च निदधते। तस्मात् पूर्वस्मिन्नहनि (शुक्रवासरस्य अपराह्णे) स सभक्तः प्रकाममानन्दं कुर्वाणः सशिष्येण श्रीयुक्त-केशवचन्द्रसेनेन सार्धं भागीरथीवक्षसि कालीवाटीतः कलिकातां यावत् बाष्पीय-पोतेन भ्रमणार्थं समागच्छत्।

सिँतिः पाइकपाड़ा-नामकस्य स्थानस्य समीपे वर्तते; कलिकातायाः सार्धैक-क्रोशदूरे उत्तरस्यां दिशि। इयमुद्यानवाटी मनोहरेति उक्तचरम्। स्थान-मिदम् अतीव निभृतम्, भगवदुपासनार्थं सविशेषमुपयोगि। उद्यानस्वामी वत्सरस्य द्विर्महोत्सवं विदधाति—शरत्काले वसन्ते च। महोत्सवमिम-मुपलक्ष्य स कलिकातायाः सिँतेश्च निकटवर्तिनो ग्रामस्यानेकान् भक्तान् निमन्त्रयते। अतोऽद्य कलिकातायाः शिवनाथ-प्रभृतयो भक्ताः समागताः। तेषु नैके प्रातरुपासनायां समवेता अभवन्। पुनः सान्ध्योपासना भविष्यति; अतस्ते प्रतीक्षन्ते। विशेषतस्ते श्रुतवन्तः—अपराह्णे महापुरुषस्यागमनं भवेत्, तेऽपि तस्यानन्दमूर्तिं द्रक्ष्यन्ति, तस्य हृदयमोहयितृकथामृतं पास्यन्ति, तस्य तन्मधुरं संकीर्तनं श्रोतुं तस्य च देवदुर्लभं हरिप्रेममयं नृत्यं द्रष्टुं शक्ष्यन्ति।

अपराह्णे तदुद्यानं बहुलोकसमाकीर्णं जातम्। केचित् लतामण्डपच्छाये काष्ठासने उपविष्टाः। केचन वा वापीतटे बन्धुभिः सह विचरन्ति। अनेके एव समाजगृहे श्रीरामकृष्णागमनं प्रतीक्षमाणाः आदित एव आसनान्यधिकृत्य आसीनाः। उद्यानप्रवेशद्वारे ताम्बूलविपणिः। प्रविशत एव पूजावाटिकेति

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रतिभाति। रात्रौ यात्राभिनयो भविता। चतस्रो दिश आनन्दपरिपूर्णाः। शारदनीलनभसि आनन्दः प्रोद्भासते। उद्यानस्य वृक्षलतागुल्मेषु विभाततः आनन्दसमीरणो वाति। मन्ये, आकाशं जीवजन्तवो वृक्षन्नततयश्च एकतानतया गायन्ति किल—

"अद्यत्वे किमु नाम हर्षपवनः प्राणेषु वाति द्रुतम्।
दीप्यन्तीव विशेषविघ्नहरणक्षेमावहद्दीप्तयः॥"

कामं सर्व एव भगवद्दर्शनव्याकुलाः। तदैव श्रीरामकृष्णशकटं समाजगृहस्य सम्मुखत एव उपस्थितमभूत्।

सर्व एव समुत्थाय महापुरुषमभ्यर्थितवन्तः। तत्रभवान् समागतः। चतुर्दिक्षु जनास्तं मण्डलाकारेण वेष्टितवन्तः।

समाजगृहस्य प्रधानप्रकोष्ठमध्ये काचिद् वेदी रचिता। तत् स्थानं लोकपरिपूर्णम्। सम्मुखे प्रासादः, तत्र श्रीरामकृष्णः समासीनः। तत्रापि लोकाः। प्रासादस्योभयपार्श्वयोर्द्वौ प्रकोष्ठौ, तत्रापि लोकाः। गृहस्य द्वारदेशे उद्ग्रीवाः सन्तः लोका दण्डायमानाः। प्रासादस्य सोपानपरम्परा एकप्रान्ततः अपरप्रान्तं यावत् विस्तृता। साऽपि जनाकीर्णा। सोपानस्य अनतिदूरे द्वित्रा वृक्षाः, तत्पार्श्वे लतामण्डपः, तत्र कानिचन काष्ठासनानि। तत्स्थानतोऽपि जना उद्ग्रीवा उत्कर्णाश्च सन्तो महापुरुषमीक्षन्ते। श्रेणीबद्धाः फलपुष्पवृक्षाः, मध्यत एव पन्थाः। वृक्षाः समीरणेन ईषदान्दोलिता भवन्ति। मन्ये आनन्दातिशयेन मस्तकान् आनमय्य तमेव भगवन्तमभ्यर्थयन्ते।

श्रीरामकृष्णपरमहंसदेवः सस्मितम् आसनपरिग्रहमकरोत्। तदैव सर्वाण्येव चक्षूंषि समभेव तस्यानन्दमूर्तेरुपरि न्यपतन्। यावन्नाटचशालायाम् अभिनयो नारभ्यते तावद् दर्शकवृन्देषु केचिद् हसन्ति, केचिद् विषयकर्मादिकम् आलोचयन्ति, केचिद् वा एकाकिनः सबन्धवो वा पादचारं चरन्ति, केचित्ताम्बूलमश्नन्ति, केचन वा तमाखुं सेवन्ते। यावदेव यवनिका अपसारिता, तावद्धि सर्वे जना अखिलवार्तालापं विहाय अनन्यमनस एकदृष्टयश्च सन्तो नाटचरङ्गं पश्यन्त आसते। अथवा नानापुष्पभ्रमणरताः षट्पदाः पद्मसन्धानोपलम्भात् कुसुमान्यन्यानि विहाय पद्ममधु पातुकामा धावन्त एवापतन्ति।

सहास्यवदनः श्रीरामकृष्णः श्रीयुक्तशिवनाथादीन् भक्तान् प्रति दृष्टिं निक्षेप्तुमारभत। कथयन्नास्त—भोः शिवनाथ, पश्य—यूयं भक्ताः, युष्माकं दर्शनात् सुतरामानन्दो जायते। गञ्जिकासेविनां स्वभावोऽयं यत् अपरमेकं गञ्जिकासेविनं दृष्ट्वा सातिशयं ते हर्षायन्ते। तमालिङ्गितुं प्रवर्तन्ते नु वा! (शिवनाथस्य अपरेषां सर्वेषाञ्च हास्यम्)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"ईश्वरे येषां चेतांसि न सन्तीति पश्यामि तान् ब्रवीमि—यूयं तावत् तत्रोपविशत। अथवा वच्मि—गच्छत, यथेच्छं प्रासादान् (कालीवाट्या मन्दिराणि) पश्य। (सर्वेषां हास्यम्)

"अथ पुनः प्रेक्षे—भक्तैः सह असारा अपि जना आगताः। तेषां नाम बलवती विषयबुद्धिः। तेभ्य ईश्वरकथा न रोचते। मन्ये, भक्ता मया सह चिरमीश्वरीयकथां कुर्वन्ति। तत्सहचरास्तु पुनरुपवेष्टुं न क्षमाः, नितरां च ते चञ्चला जाताः। पुनः पुनः तेषां कर्णेषु अनुच्चस्वरेण वदन्ति—'कदा गमिष्यथ—कदा गमिष्यथ?' ते चेत् वदेयुः 'स्थीयतां भोः, क्षणात् परमेव यास्यामः' तदा ते विरक्ताः सन्तः कथयेयुः 'यूयमालपत, वयं नौकायामेव उपविशामः।' (सर्वेषां हास्यम्)

"सर्वं परित्यज्य ईश्वरपादपद्मयोर्मज्जत इति चेत् संसारिणो जनान् वदेत्, तर्हि ते कदापि न श्रोष्यन्ति। अतो विषयिणो जनान् आकृष्टुं द्वौ भ्रातरौ गौरनित्यानन्दौ मिथः परामर्शपूर्वकमिदं व्यवस्थापितवन्तौ—

'मद्गुरमत्स्यकसूपमिह नित्यं
भक्षय तदिह हि परमं वित्तम्।
कुरु नवयुवतिक्रीड़ासङ्गं
कीर्तय हरिमिह भवभयभङ्गम्॥'

"ननु प्रथमोक्तयोर्द्वयोर्लोभात् अनेके हरिनामकीर्तनार्थं गताः। हरिनाम-सुधायाः कञ्चिदास्वादं लब्ध्वाऽनुभूतवन्तः—'मद्गुरमत्स्यस्य सूपोऽन्यत् किमपि न, अपि तु हरिप्रेम्णा यदश्रु निपतति तदेव। युवति-र्योषित् पृथिव्येव। युवत्या योषितः क्रीड़ं नाम—धूलिषु हरिप्रेम्णा विलुण्ठनम्।

"नित्यानन्दः कथमपि हरिनाम जनैः कारयामास। चैतन्यदेव उक्तवान्—ईश्वरनाम्नः खलु माहात्म्यातिशयः; शीघ्रं तत्फलप्राप्तिर्न स्यात्, परन्तु कदा वाऽस्य फलमवश्यमेव सम्पत्स्यते। यथा कश्चिद् भवनप्राचीरशीर्षे बीजमेकं निक्षिप्तवान्। बहुकालात् परं भवनं भूपतितं जातम्। तदापि तद्बीजं मृत्तिकायां स्खलत् वृक्षरूपं प्राप्नोत्, तस्य फलान्यपि अभवन्।

"यथा संसारिषु सत्त्वरजस्तमांसि त्रयो गुणा विद्यन्ते तथा भक्तेरपि सत्त्वरजस्तमोरूपं गुणत्रयमस्ति।

"संसारिणः सत्त्वगुणः किंविध इति जानासि? भवनस्य अयमंशो भग्नः, असावंशश्च भग्नः—कुत्राप्यसौ संस्कारं न करोति। देवतासौधे कपोताः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पुरीषोत्सर्गं कुर्वन्ति, चत्वरे शैवाला जाताः—कुत्रापि अवधानं नास्ति। गृहोपकरणानि प्राचीनानि; तेषां नवीकरणे प्रयत्नाभावः। वसनं—यदेवास्तु, तेनैव प्रयोजनं सिध्येत्। असावतीव शान्तः, शिष्टः, दयालुः, अमायिकश्च। कस्यापि किमप्यनिष्टं न करोति।

"संसारिणो रजोगुणस्यापि लक्षणानि वर्तन्ते। तस्य राजसिकस्य घटिकायन्त्रं, तच्छृंखलं, हस्ते द्वित्राणि च अङ्गुरीयकानि—एतानि विद्यन्ते। तस्य गृहोपकरणानि नितरां परिष्कृतानि। प्राचीरे राज्ञचाश्चित्रं, राजपुत्रस्य चित्रं, कस्यचिद् वा विशिष्टजनस्य चित्रम्। गृहं सुधाधवलितं, कुत्रापि कलङ्कचिह्नं नास्ति। नानाविधा उत्तमपरिच्छदाः। भृत्यानामपि उत्तम-परिच्छदाः सन्ति। एवंविधान्येव सर्ववस्तूनि।

"संसारिणस्तमोगुणलक्षणानि यथा—निद्रा कामः क्रोधोऽहङ्कारश्चैतानि।

"किञ्च भक्तेः सत्त्वमप्यस्ति। यस्य भक्तस्य सत्त्वगुणो विद्यते स परमरहसि ध्यायति नाम। स मशारिकाभ्यन्तरे ध्यायति—परन्तु सर्वे जानन्ति—अयं शयानो वर्तते, भवेद् वा रात्रौ निद्रा नासीत्, अत उत्थाने विलम्बो भवति। केवलमुदरपूर्तिं यावत् शरीरं प्रति आदरः। शाकान्नायालम्। भोजने आड़म्बरो नास्ति, परिच्छदस्यापि बाहुल्यं नास्ति। गृहोपकरणानामपि चाकचक्यं नास्ति। सत्त्वगुणो भक्तः कदापि चाटूक्त्या कस्मादपि धनं नादत्ते।

"भक्ते रजसि वर्त्तमाने भक्तस्य तिलकं भवेत्, रुद्राक्षमालिकाऽपि वा स्यात्; पुनस्तस्या एव मालिकाया अभ्यन्तरे स्वर्णखण्डमेकमास्ताम्। (सर्वेषां हास्यम्) पट्टवस्त्रं धारयन्नेव पूजयति।

"यस्य भक्तेस्तमो भवति तस्य ज्वलन्नेव विश्वासः। तादृशो भक्त ईश्वरसमीपे स्वाधिकारं प्रकटयति। यथा दस्युकर्मणा प्रसह्य धनग्रहणम्। दस्यूनामापतने, हन्यतां कृत्यतां बध्यतामिति भावः।

श्रीरामकृष्ण ऊर्ध्वदृष्टिः, प्रेमरसाभिषिक्तेन कण्ठेन गायति—

"गयागङ्गाप्रभासादीन् काशीं काञ्चीं क इच्छति।
काली कालीति मन्त्रेण भ्रामयेदजपां यदि॥
त्रिसन्ध्यं यो वदेत् कालीं सस्पृहः किं स पूजने?
सन्ध्या तं परिधावन्ती न हि सन्धिं लभेत वा॥
दया व्रतञ्च दानादि न तस्य हृदि तिष्ठति।
ब्रह्ममयीपदे तस्य लीयते मदनोत्सवः॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ईदृशं नाममाहात्म्यं कालिकाया हि वेत्ति कः ?
देवदेवो महादेवः पञ्चास्यैर्यद्धि गायति ॥"

श्रीरामकृष्णो भावोन्मत्तः, यथा अग्निमन्त्रेण दीक्षितः सन् गायति—

"दुर्गा दुर्गेति मन्त्रं यदि नाम जपतो मृत्युरेवेश्वरि ! स्यात् ।
दीनं मां शङ्करि त्वं तदिह न तु कथं भाविन्युद्धारयेर्वा ?"

"किन्नाम ? तन्नामाहम् उच्चारितवान्, मम पुनः पापं स्यात् ? अहं हि तस्य पुत्रः ! तस्यैश्वर्यस्य अधिकारी खलु ! ईदृशं चित्तदार्ढ्यमावश्यकम् ।

"तमोगुणस्य आवर्तनात् ईश्वरलाभो भवति । तत्समीपे स्वाधिकारं स्थापय ; न तु पर एवासौ, स एव आत्मीयो जनः। पुनर्दृश्यतां—अयमेव तमोगुणः परमङ्गलार्थं व्यवहर्तुं शक्यते । वैद्यस्त्रिविधः—उत्तमो मध्यमोऽधमश्चेति । यो वैद्यो रोगिणमुपेत्य तस्य नाड़ीं परीक्ष्य 'भोः, औषधं सेवस्वे'ति व्याहरन् प्रचलत्येव सोऽधमो वैद्यः । रोगी औषधसेवां कृतवान् न वेति वार्तां न गृह्णाति। यो वैद्यः रोगिणं नानाभावेन औषधसेवनार्थं बोधयति, मधुरया च वाचा वदति—'भोः, औषधसेवनादृते कथं निरामयो भवेः ? लक्ष्मीवन् ! सेवस्व, अहं स्वयमेव औषधमुपकल्पयामि । सेव्यतामि'ति—स मध्यमो वैद्यः । यस्तु वैद्यो रोगी कथमपि औषधं न सेवितवानित्यालोक्य तस्य वक्षसि स्वजानु न्यस्य बलादौषधं सेवयति, स उत्तमो वैद्यः । एष वैद्यस्य तमोगुणः ; गुणेनानेन रोगिणो मङ्गलं भवति, नापकारो भवेत् ।

"वैद्यवदाचार्योऽपि त्रिविधः । यो धर्मोपदेशं प्रदाय शिष्याणां पुनर्वार्तां न गृह्णाति स आचार्योऽधमः । यस्तु शिष्यमङ्गलार्थं तान् भूयो भूयो बोधयति यथा ते उपदेशान् धारयेयुः, अनुनयादिकं करोति ; स्नेहञ्चापि प्रदर्शयति, स मध्यमपर्यायस्य आचार्यः । पुनर्यदा शिष्याः कथमपि न शृण्वन्तीति अवेक्ष्य कोऽपि आचार्यो बलमपि प्रयुङ्क्ते, स उत्तम आचार्य इति आख्यायते ।"

कश्चिद् ब्राह्मभक्तः पृष्टवान्—अपि ईश्वरः साकारो निराकारो वा ?

श्रीरामकृष्णः—स ईदृश इति परिच्छेत्तुं न शक्यते । स निराकारः पुनः साकारश्च । भक्तस्य कृते स साकारः । ये नाम ज्ञानिनः, अर्थात् जगत् येषां स्वप्नवत् प्रतिभाति, तान् प्रत्यसौ निराकारः । भक्तो जानाति, अहं नाम किञ्चिद् वस्तु, जगच्च किञ्चिद् वस्त्विति । अतो भक्तसविधे ईश्वरो व्यक्तिरूपेण दर्शनं ददाति । ज्ञानिनः—यथा वेदान्तवादिनः—केवलं नेति नेतीति विचारं कुर्वन्ति । विचारात् प्रतिबोधो भवति—अहं मिथ्या, जगदपि

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मिथ्या, स्वप्नवत् इति। ज्ञानी ब्रह्म बोधेन बुध्यते, तत् किमिति मुखेन वक्तुं न शक्नोति।

"तत् किमिवेति—ज्ञायते? यथा—सच्चिदानन्दसमुद्रः—कूलसीमा नास्ति—भक्तिहिमेन स्थाने स्थाने जलं तुषारत्वमाप्नोति—तुषाराकारेण घनीभवति। भक्तसमीपे स कदा कदा व्यक्तभावेन साकाररूपं धारयति। उदिते ज्ञान-सूर्ये स तुषारो विगलितो भवति। तदा ईश्वरो व्यक्तिरिति बोधो न स्यात्। तस्य रूपदर्शनमपि न भवति। कोऽसाविति मुखेन वक्तुं न शक्यते। को वदेत्? यो वदिष्यति सोऽपि नास्ति। स पुनरात्मनः अहमिति अनुसन्धानेन न प्राप्नोति।

"विचारे क्रियमाणे अहमादिकं किमपि नावशिष्यते। आदौ त्वया पलाण्डोः रक्तवर्णमावरणमपसारितम्, ततः शुभ्रं स्थूलमावरणम्, एवमनारतम्, अपसार्यमाणेषु आवरणेषु अभ्यन्तरे किमपि अन्विष्य नावाप्यते।

"यत्र आत्मनः अहमिति अन्वेषणेन न लभ्यते—केन वा पुनर्मृग्यते?—तत्र ब्रह्मस्वरूपस्य बोधेन बोधः कथं स्यादिति कः कथयेत्?

"लवणेन विनिर्मिता काचित् पुत्तलिका समुद्रं परिमातुं गता। समुद्रमवगा-हन्त्यास्तस्याः शरीरं द्रवीभूतं सत् जलमयं संवृत्तम्। तर्हि को वा वार्तां प्रेरयेत्?

"पूर्णज्ञानस्य लक्षणम्—पूर्णज्ञाने सति मानुषस्तूष्णीं भवति। तदा अहमिति लवणपुत्तलिका सच्चिदानन्दसागरे विगलितं सत् एकीभूतं भवति। तदानीं पुनः स्तोकेनापि भेदबुद्धिर्नावशिष्यते।

"यावद्धि विचारो नावशेषं याति लोकस्तावद् वाग्जालं विस्तार्य तर्कं करोति, समाप्ते तु विचारे निःस्तब्धो भवति। कलसे पूर्णे सति तज्जलं पुष्करिणीजलैरेकत्वमापद्यते। ततः पुनः कोऽपि शब्दो न भवेत्। यावन्नाम एष कलसः सर्वथा पयोभिर्नापूर्यते तावत्तु शब्दायते।

"उक्तं हि प्राचीनैः—यदि समुद्रपोतः कृष्णवारि गतः नासौ पुनरेति। 'अहं' म्रियेत चेत् सकला समस्या, चिरं जगत्यां नियतं हि शाम्येत्। (हास्यम्) सहस्रधा विचारैरहंकारो नापैति। भक्तोऽहमिति अभिमानोऽस्माकं युष्माकं च शोभते।

"भक्तानां सगुणं ब्रह्म। अर्थात् स सगुणः—व्यक्तिरूपः सन्—रूप-मादाय आत्मानं दर्शयति। स एव प्रार्थनां शृणोति। युष्माभिः या प्रार्थना विधीयते—सा तमुद्दिश्यैव। यूयं न वेदान्तवादिनः, नापि च ज्ञानिनः, भक्ता एव। साकाररूपं स्वीक्रियतां न वा, तेन न हि कोऽपि हानिर्भवेत्। ईश्वरः एका व्यक्तिरिति बोधेनैव इष्टसिद्धिः—या व्यक्तिः पुनः प्रार्थनां शृणोति, सृष्टि-स्थितिप्रलयान् च विदधाति, या व्यक्तिरनन्तशक्तिः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"भक्तिपथेनैव लीलया स हि लभ्यते ।"

कश्चिद् ब्राह्मभक्तोऽपृच्छत्—महाशय, ईश्वरो यदि द्रष्टुमर्ह्यते तर्हि किमिति तं नावलोकयामः ?

श्रीरामकृष्णः—वाढ़म् ; अवश्यमेव द्रष्टुं शक्यते—साकाररूपं द्रष्टुं शक्यते, पुनररूपमपि द्रष्टुं शक्यते । कथं तावत् त्वामवबोधयामि ?

ब्राह्मभक्तः—केनोपायेनासौ दृश्येत ?

श्रीरामकृष्णः—अपि व्याकुलः सन् तदर्थं रोदितुं शक्नोषि ? ननु लोकाः पुत्रार्थं, कलत्रार्थं, धनार्थं च घटीपरिमितानि अश्रूणि विसृज्य रुदन्ति । परन्तु ईश्वरार्थं को नाम क्रन्दति ? यावत् शिशुश्चोष्येण क्रीड़न् सर्वं विस्मरति, तावन्माता रन्धनादिकं गृहकर्म सम्पादयति । शिशोर्यदा चोष्ये प्रीतिर्न स्यात्, चोष्यं हित्वा चीत्कारपूर्वकं क्रन्दति, तदा माता ओदनहण्डिकामवतार्य रभसा समागम्य पुत्रमङ्के गृह्णाति ।

ब्राह्मभक्तः—महाशय, ईश्वरस्वरूपमधिकृत्य इयन्ति नानाविधानि मतानि कथम् ? एके वदन्ति—ईश्वरः साकारः, निराकारो वा केचन । साकारवादित पुनः विभिन्नानां रूपाणां कथाः शृणोमि, कथं नामैतावद् वैमत्यम् ?

श्रीरामकृष्णः—यो भक्तो यथा पश्यति, स तथैव मन्यते । वस्तुतस्तत्-स्वरूपे किमपि वैमत्यं नास्ति । स चेत् केनापि प्रकारेण सकृल्लभ्येत, तर्हि स एव सर्वं बोधयति । त्वं तत्पल्लीमेव न गतोऽसि, तत्रत्यां निखिलां वार्तां कथं प्राप्स्यसि ?

"श्रूयतामेकमाख्यानम्—

"कश्चिद् वनं गतः । स वृक्षोपरि कञ्चित् जन्तुमपश्यत् । प्रत्यावृत्तः सोऽपरमभाषत—'दृश्यताम्, अमुकवृक्षे सुन्दरमेकं रक्तवर्णं जन्तुमद्राक्षम् ।' अपरजनः प्रत्यवादीत्—'मयाऽपि दृष्टः । स पुनः रक्तवर्णः कथं स्यात् ? स हि हरिद्वर्णः ।' अथान्योऽभ्यधात्—'न हि, न हि—अहं दृष्टवान्—असौ पीतः ।' ततोऽन्ये ऊचुः—'न हि ।' ते धूसरपाटलनीलादीन् वर्णानाहुः । अन्ते कलहः प्रवृत्तः । तदा ते वृक्षतलमासाद्य तत्रासीनमेकं जनमपश्यन् । पृष्टोऽसौ जगाद—'अहमस्य वृक्षस्य तलदेशे तिष्ठामि । जन्तुममुं सविशेषं जानामि । यूयं यद् यद् वदथ तत्सर्वमेव सत्यम् । असौ कदा लोहितः, कदा हरितः, कदा पीतः, कदा वा नीलः—अन्ये अपि च कति वर्णास्तस्य भवन्ति । बहुरूपोऽयम् । पुनः कदा वा पश्यामि—तस्य कोऽपि वर्णो नास्ति । कदा सगुणः कदा वा निर्गुणः ।

"अर्थात्—यः सदा ईश्वरं चिन्तयति स एव ज्ञातुमर्हति—किं नाम ईश्वर-स्वरूपम् । स एव जानाति—ईश्वरो नानारूपाणि विधृत्य दर्शनं ददाति,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नानाभावैश्च दृशोः पदमेति । स सगुणः, पुनर्निर्गुणः । यो वृक्षतलमधितिष्ठति स एव जानाति बहुरूपस्य नाना वर्णाः—अपि च कदा कदा वा न विद्यन्ते वर्णाः । अन्ये लोकाः केवलं वादवितण्डादिकमाश्रित्य क्लेशमापद्यन्ते ।

"कबीरः कथयामास—'निराकारो मे पिता, साकारो मे माता ।'

"यदेव रूपं भक्ताय रोचते, तेनैव रूपेणासौ दर्शनपथमायाति—स किल भक्तवत्सलः ! पुराणेषु विद्यते—वीरभक्तस्य हनुमतः कृते ईश्वरो रामरूपं धृतवान् ।

"वेदान्तविचारसविधे रूपादिकं विलुप्यते । तस्य विचारस्य चरमः सिद्धान्तोऽयम्—ब्रह्म सत्यं, नामरूपयुक्तं जगन्मिथ्या । यावद् 'भक्तोऽहमि'ति अभिमानस्तिष्ठति तावदेव ईश्वरस्य रूपदर्शनं स्यात् । ईश्वरश्च व्यक्तिरिति बोधः सम्भवति । विचारदृशा एतल्लक्ष्येत चेत्, भक्तस्य अहमिति अभिमानेन भगवतः किञ्चिद्दूरे भक्तः स्थापित इति बुध्यते ।

"कथं नाम कालीरूपं श्यामारूपं वा सार्धत्रिहस्तपरिमितम् ? दूरत्वादेवा दूरत्वादेव सूर्यः स्वल्पप्रसरो दृश्यते । समीपं गच्छ, तदा एतादृग्विशालो दृश्येत यदवधारणे त्वं समर्थो न भवेः । किमिति च कालीरूपं कृष्णरूपं वा श्यामवर्णम् ? तदपि दूरत्वहेतोः । यथा दीर्घिकायाः जलं दूरात् हरितं नीलं कृष्णं वा आलोक्यते, समीपस्थो भूत्वा तु जलमाददानः पश्य—तस्य कोऽपि वर्णो नास्ति । दूराद् दर्शने नीलं नभः, समीपे पश्य—तस्य कोऽपि वर्णो नास्ति ।

"तस्माद् ब्रवीमि—वेदान्तदर्शनविचारेण ब्रह्म निर्गुणम् । तस्य किं स्वरूपं तत् मुखेन वक्तुं न शक्यते । परन्तु यावत् त्वं हि सत्यस्तावज् जगदपि सत्यम् । ईश्वरस्य नामरूपे अपि सत्ये, ईश्वरो व्यक्तिरिति बोधो नामापि सत्यम् ।

"भक्तिपथो युष्माकमेव । एषः अत्युत्तमः—सहजः पन्थाः किल । किमनन्त ईश्वरो ज्ञायते ? तज्ज्ञानेन वा किं प्रयोजनम् ? एतद्दुर्लभं मानुषं जन्माहं प्राप्तवान् ; मम तावत् प्रयोजनम्—तस्य पादपद्मे भक्तिरस्तु इति आकूत्या ।

"यदि नाम मे एकघटपरिमितेन जलेन तृष्णा निवृत्ता भवेत्, तर्हि पुष्करिण्यां यावज्जलं वर्तते तस्य परिमापनेन किं प्रयोजनम् ? यदा आसवपात्रार्धमात्रया मदिरया अहमुन्मत्तो भवामि—शौण्डिकविपण्यां, कियती मदिरा वर्तते इत्यस्य निर्धारणेन मे किम् ? अनन्तस्य ज्ञानेन वा किम् ?

"वेदेषु ब्रह्मज्ञानिनो विविधावस्थानां वर्णनमस्ति । स एव ज्ञानपथः—अतीव कठिनः पन्थाः । विषयबुद्धेः कामिनीकाञ्चनासक्तेर्वा लेशतोऽपि सत्त्वाद् ज्ञानं नोदेति । नायं पन्थाः कलियुगस्य कृते ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"अस्मिन् विषये अस्ति तावद् वेदेषु सप्तभूमीनां (Seven Planes) वर्णनम्। इमा हि सप्तभूमयो मनःस्थानानि। यदा संसारे मनस्तिष्ठति, तदा लिङ्गगुह्यनाभयो मनःस्थानानि नाम। तदा मनस ऊर्ध्वदृष्टिर्न विद्यते—मनः केवलं कामिनीकाञ्चनेषु लग्नं तिष्ठति। मनसश्चतुर्थभूमिर्हृदयम्। तदा प्रथममेव चैतन्याविर्भावः, चतसृषु दिक्षु च ज्योतिर्दर्शनं भवति। तदासौ जन ऐश्वरं ज्योतिः पश्यन् विस्मयाविष्टो भूत्वा वदति—किमेतत्, किमेतदिति। तदानीं पुनस्तस्य मनो निम्नं (संसारं प्रति) नाभिगच्छति।

"मनसः पञ्चमी भूमिः कण्ठः। मनो यस्य कण्ठे उत्थितं तस्याविद्या सर्वशो गता; ईश्वरीयकथाया ऋते अन्यकथायाः श्रवणमुच्चारणं वा तस्मै न रोचेते। यदि कश्चिदन्यकथां वदेत्, तर्हि स तत्स्थानात् प्रयात्येव।

"ललाटं नाम मनसः षष्ठभूमिः। मनसि तत्स्थानं संप्राप्ते अहर्निशमीश्वरीयरूपस्य दर्शनं भवति। तदानीमपि किञ्चित् अहमित्यवशिष्यते। स तन्निरुपमं रूपमालोक्य उन्मत्तः सन् तद्रूपं स्प्रष्टुमालिङ्गितुञ्च गच्छति, न तु तावत् क्षमते। यथा लण्ठननामकस्य दीपस्याभ्यन्तरे आलोको विद्यते; एषोऽहमालोकं स्पृशामीति मनसि जायते; परन्तु काचव्यवधानादसौ स्प्रष्टुं न शक्यते।

"शिरोदेशः सप्तमभूमिः। मनसि तत् स्थानं संप्राप्ते समाधिर्भवति ब्रह्मज्ञानिनश्च ब्रह्मणः प्रत्यक्षदर्शनं स्यादेव। परं तस्यामेवावस्थायां शरीरमधिककालं न सन्तिष्ठते। सदैवासौ संज्ञाहीनः, किमपि भोक्तुं नार्हति, मुखविवरे प्रदत्तं दुग्धं स्खलितं स्यात्। अस्यां भूमौ एकविंशतिदिनानि स्थितस्य मृत्युर्भवति। ब्रह्मज्ञानिन एषैव अवस्था। युष्माकं भक्तिपथः। एष उत्तमोऽनायासश्च।

कश्चिन्मामुक्तवान्—"महाशय, किं मां समाधिकौशलं शिक्षयितुं शक्नोति भवान्?" (सर्वेषां हास्यम्)

"समाधौ सति सर्वकर्मत्यागः सम्पद्यते। पूजाजपादिकर्मणां विषयकर्मणां च सर्वेषां त्यागो भवति। प्रथमतः कर्मणां सातिशयः कोलाहलो वर्तते। यावदीश्वरं प्रति अग्रसरो भवेस्तावदेव कर्माडम्बरो ह्रासं गच्छेत्। किं बहुना, तन्नामगुणकीर्तनादिकमपि विलुप्येत। (शिवनाथं प्रति) यावद्धि त्वं सभायां नागतस्तावदेव त्वन्नामगुणकथा बाहुल्येनाभूत्। त्वत्समागममात्रमेव त एव प्रसङ्गा विरतिं गताः। तदा ते दर्शनेनैवानन्दः। तदा लोका वदन्ति—'अत्रभवान् शिवनाथमहोदयः समागतः।' तदा त्वद्विषया अन्या वाचो बद्धावकाशा भवेयुः।

"ईदृश्या मे अवस्थाया अनन्तरं गङ्गाजले तर्पणार्थं गतोऽहं हस्ताञ्जलि-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विवरैर्जलमस्खलदिति दृष्टवान् । तदा क्रन्दन् हलधारिणम् अपृच्छम्—'भ्रातः, किमेतत् संवृत्तम् ?' हलधारी प्राह—'इयं नामावस्था गलितहस्तेति व्यपदिश्यते । ईश्वरदर्शनात् परं तर्पणादिकं कर्म न तिष्ठति ।

"संकीर्तनादौ तावद् गीयते—

'नित्यानन्दो वररुचिवपुर्मत्तहस्ती ममासौ
नित्यानन्दो वररुचिवपुर्मत्तहस्ती ममासौ ।' इति

भावे गाढ़े सति 'हस्ती हस्ती'ति उच्यते। अतःपरं केवलं हस्तीति कथा मुखे तिष्ठति। अवशेषे 'हा' इत्यस्य उच्चारणमात्रेण भावसमाधिर्जायते। तदा एतावन्तं कालं यः कीर्तनं कृतवान् स जोषमास्ते।

'यथा ब्राह्मणभोजने आदौ महान् कोलाहलः। यदा सर्वे भोज्यविन्यासपत्राणि सम्मुखे कृत्वोपविष्टास्तदा कोलाहलो ह्रासं गतः, 'लुचि' आनीयताम्, 'लुचि' आनीयतामिति शब्दो भवति। ततो यदा ते 'लुचि'-व्यञ्जनादीनि भोक्तुमारभन्ते, तदा त्रिपादपरिमाणः शब्दो गत एव। दध्नि समागते सुप् सुप् इति शब्दः! (सर्वेषां हास्यम्)—शब्दो नास्तीति वक्तुं शक्यते। भोजनात् परं निद्रा। तदा सर्वं निस्तब्धम्!

"अतो ब्रवीमि—आदौ कर्मणो महान् कोलाहलस्तिष्ठति। ईश्वरपथेन यावदेव अग्रेसरो भवेस्तावदेव कर्मह्रासो जायेत। अन्ते कर्मत्यागः समाधिश्च। ननु अन्तःसत्त्वायां गृहस्थवध्वां श्वश्रूमात्रा विधीयते स्नुषायाः कर्मह्रासः। सम्प्राप्ते तु दशमे मासि प्रायो नैव कर्म क्रियते तया। पुत्रे जाते सर्वथैव तस्याः कर्मत्यागो विधीयते। माता पुत्रमादाय तत्सञ्चालनादिकं करोति, गृहकर्माणि श्वश्रू-ननान्दृ-यातृ-प्रभृतयः कुर्वन्ति।

"समाधेरनन्तरं प्रायशः शरीरं न तिष्ठति। पुनः केषाञ्चित् लोकशिक्षार्थमेव शरीराणि तिष्ठन्ति—यथा नारदादीनाम्। चैतन्यदेववत् अवताराणामपि। परिसमाप्ते कूपखनने मृत्तिकाधारः खनित्रञ्च विसृज्येते। यदि नाम एतैः पल्ल्या अन्येषां प्रयोजनं भवेदिति चिन्तयन्तः खनित्रादीनि रक्षन्ति। एतादृशा महापुरूषा जीवदुःखेन कातराः। नैते स्वार्थपराः—आत्मनो ज्ञाने समुत्पन्ने एव सर्वं संवृत्तमिति ते न चिन्तयन्ति। अपि स्वार्थपराणां लोकानां कथां जानासि नाम ? अत्र ष्ठीवेति उक्तो न ष्ठीवति, तेन तवोपकारः स्यात्। (सर्वेषां हास्यम्) एकपणमूल्येन मोदकानयनार्थं विपणिं प्रेरितः चोषं चोषमानीय ददाति। (सर्वेषां हास्यम्)

"अपि तु शक्तेर्विशेषोऽस्ति। साधारणशक्तेराधारभूतो जनो लोकशिक्षादानाद् बिभेति। असारकाष्ठं स्वयं कथमपि भासमानं गच्छति, किन्तु तस्यो-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

परि एकस्मिन् पक्षिण्यपि आसीने निमज्जति। नारदादयस्तु सारवन्ति महान्ति काष्ठानि। एतानि काष्ठानि पुनः स्वयमेव प्लवन्ते, उपरि च कियतः मानुषान्, गाः, हस्तिनश्चापि गृहीत्वा चलितुं क्षमाणि!

(शिवनाथं प्रति) "अयि भोः! कथं नाम यूयमीश्वरस्य ऐश्वर्यमेतावद् वर्णयथ? एतदहं केशवसेनाय कथितवान्। एकदा ते सर्वे तत्र (काली-वाटीम्) गताः। अहमवदम्—यूयं कीदृशं भाषणं दत्थेति अहं श्रोष्यामि। गङ्गाघट्टस्य चत्वरे सभाऽनुष्ठिता, केशवो वक्तुं प्रारभत। मनोज्ञमसौ भाषणं दत्तवान्। तेन मे भावः समजनि। अहमन्ते केशवमुक्तवान्—'कथं त्वमेतानि वदसि? यथा—हे ईश्वर, त्वमपूर्वसुन्दरमहो पुष्पं सृष्टवान्, त्वं ताराः कृत-वान्, त्वं समुद्रं विहितवान्! एतैः किम्? ये स्वयमेव ऐश्वर्येषु प्रीतिं कुर्वन्ति, त एव ईश्वरैश्वर्यवर्णने सानुरागा भवन्ति। राधाकान्तस्यालङ्कारेषु चोरितेषु रासमणिजामाता मथुरानाथो राधाकान्तमन्दिरमुपेत्य भगवन्तं वक्तु-मुपाक्रमत—'भगवन्! धिक् त्वाम्! त्वमात्मनोऽलङ्कारान् रक्षितुं नाल-मासीः।' मथुरामहोदयः मया प्रोक्तः—'भोः, तव नाम कीदृशी बुद्धिः! स्वयं लक्ष्मीर्यस्य दासी, तत्पदसेवां च यासौ विदधाति, तस्य किमैश्वर्यस्य अभावः? अलङ्कारा इमे त्वत्सविधे महार्घाणि वस्तूनि, परन्तु ईश्वरसमीपे तानि कानि च लोष्ट्राणि। शान्तं पापम्! नैवंविधा हीनबुद्धेः कथा वक्तुं नोचिता। किं नामैश्वर्यं तस्मै दातुमर्हति भवान्?' तस्माद् ब्रवीमि, यत्प्राप्त्या आनन्दो जायते स एव लोकैः प्रार्थ्यते; कुत्र तस्यावासः, कानि तस्य गृहाणि, कानि उद्यानानि, कति धनजनाः, दास्यो दासाश्च—एताभिर्वार्ताभिः किम्? नरेन्द्रं यदा पश्यामि, तदाऽहं सर्वं विस्मरामि। कुत्र तस्य गृहं, तत्पिता किं करोति, कति तस्य भ्रातरः—एवंरूपाः कथा विस्मृतावपि नाहं पृष्टवान्। ऐश्वर-माधुर्यरसे निमग्नो भव। तस्य अनन्ताः सृष्टयोऽनन्तमैश्वर्यम्। एताभिर्वार्ता-भिर्नस्तावत् किं प्रयोजनम्? पुनस्तेनैव गन्धर्वनिन्दिना कण्ठेन तत् मधुरिमपूर्णं गानम्—

"रूपपयोनिधिमध्यविलासं
मानस कुरु कुरु सुखमयवासम्।
अतलरसातलमनुसन्धत्से
यदि पुनरुज्ज्वलरत्नमादत्से।
प्रेम महाधनमस्ति हि तस्मिन्
मज्जसि सुन्दरसिन्धौ यस्मिन्॥
अन्वेषय पुनरन्वेषय हृदि
वृन्दावनमिह लप्स्यसे निरवधि।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ज्ञानमहोज्ज्वलरुचिरविकाशः
भास्यति हृदि तव चितिदीप एषः ॥
इह भुवि नावं सवेगरावं
कश्च नु गमयति दर्पितभावम् ?
कबीरवचनं शृणु शृणु सारम्
भज गुरुचरणं त्यज निजभारम् ॥

"तत्र तु, दर्शणात् परं, तल्लीला कीदृशीति वीक्षणार्थं भक्तस्य इच्छा जायते। रामचन्द्रो रावणवधात् परं राक्षसपुरीं प्रविवेश। वृद्धा निकषा धावन्ती पलायितुं प्रक्रान्ता। लक्ष्मणो बभाषे—'आर्य, किमेतत् ? निकषेयं नितरां वृद्धा, कियन्तं पुत्रशोकं प्राप्ता—तस्या ईदृक् प्राणभयम्, पलायते सा !' रामचन्द्रो निकषायै अभयं प्रदाय सम्मुखञ्चानीय कारणं पप्रच्छ ; तदा निकषाऽ वदत्—'राम, एतानि दिनान्यहं जीविताऽस्मि, अतस्ते एता लीला दृष्टवती ; तद्दीर्घतरजीवनार्थं मे इच्छा जायते। तदा अपरा अपि कति लीलास्ते द्रक्ष्यामि !' (सर्वेषां हास्यम्)

(शिवनाथं प्रति) "त्वद्दर्शनाभिलाषो मे जायते। शुद्धात्मनां दर्शनादृते किमवलम्ब्य स्थास्यामि ? शुद्धात्मानः पूर्वजन्मनो बान्धवा इति मन्ये।"

कश्चिद् ब्राह्मभक्तोऽपृच्छत्—महाशय, किं भवान् जन्मान्तरं स्वीकरोति ?

श्रीरामकृष्णः—अथ किम्। जन्मान्तरमस्तीति श्रुतवानहम्। वयं क्षुद्र-बुद्धया ईश्वरकार्यं कथं बुध्येमहि ? अनेके पूर्वगा जन्मान्तरकथामुक्तवन्तः, अतोऽहमविश्वासकरणे न क्षमः। भीष्मदेवः स्वदेहं त्यक्ष्यति, शरशय्यायां शयानः, पाण्डवाः सर्वे श्रीकृष्णेन सह दण्डायमानाः। भीष्मदेवस्य चक्षुर्भ्याम-श्रूणि पतन्तीति ते दृष्टवन्तः। अर्जुनः श्रीकृष्णमवादीत्—'सखे, किमाश्चर्यम् ! अस्माकं पितामहो यः स्वयं भीष्मदेवः, सत्यवादी, जितेन्द्रियः, ज्ञानी, अष्टवसूना-मेकश्च—सोऽपि देहत्यागकाले मायावशात् क्रन्दति।' श्रीकृष्णे एवमुक्तवति भीष्मदेव उवाच—'कृष्ण, नाहं तद्धेतोः रोदिमीति त्वं सुष्ठु जानासि। यदा भावयामि—स्वयं भगवान् पाण्डवानां सारथिः, तेषामपि दुःखविपदामन्तो नास्ति। अतः एतन्मनसि कृत्वा क्रन्दामि—नाहं भगवत्कार्यस्य किमपि बोद्धुं क्षमः।'

अथास्मिन्नवसरे समाजगृहे सान्ध्योपसना समनुष्ठिताऽभूत्। प्रायेण सार्वाष्टघटिका रात्रिः। सन्ध्यायाश्चतुःपञ्चदण्डेभ्यः परं रात्रिर्ज्योत्स्नामयी जाता। उद्यानस्य वृक्षराजयो लताः पल्लवाश्च शरच्चन्द्रस्य विमलकिरणेषु भासमाना आसन्। समाजगृहे संकीर्तनमारब्धम्। भगवान् श्रीरामकृष्णो

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हरिप्रेम्णा प्रमत्तः सन् नृत्यन्नास्त। ब्राह्मभक्ता मृदङ्गकरतालादीन्यादाय तं वेष्टयन्तो नृत्यन्ति स्म। सर्व एव भावेन मत्ताः; मन्ये, ते श्रीभगवतः साक्षात्कारं लब्धवन्तः। हरिनामध्वनिरुत्तरोत्तरमुत्तिष्ठति स्म। चतुर्दिक्षु ग्रामवासिनो हरिनाम श्रुतवन्तो मनसा च उद्यानस्वामिने भक्ताय वेणीमाधवाय भूयो भूयो धन्यवादान् प्रायच्छन्।

कीर्तनान्ते श्रीरामकृष्णो भूमिष्ठः सन् जगन्मातरं प्राणमत्। प्रणमन्नब्रवीत्—"भागवत-भक्त-भगवद्ज्ञानिचरणेषु प्रणामः। भक्तस्य चरणयोः प्रणामः, साकारवादिनो भक्तस्य चरणयोः प्रणामः, निराकारवादिनो भक्तस्य चरणयोः प्रणामः; पूर्वगाणां ब्रह्मज्ञानिनां, ब्राह्मसमाजस्य इदानीन्तन-ब्रह्मज्ञानिनां च चरणेषु प्रणामः।"

वेणीमाधवो नानाविधानाम् उपादेयखाद्यानाम् आयोजनमकरोत्; स परितोषं विधाय भक्तान् सर्वानभोजयत्। श्रीरामकृष्णो भक्तसङ्गे उपविशन् सानन्दं प्रसादं गृहीतवान्।

१५-नभेम्बरः, १८८२-खृः

श्रीरामकृष्णः श्यामपुकुरस्थ-विद्यासागर-विद्यालयस्य द्वारे शकटेन समागत्योपस्थितः। वेला त्रिघटिका भवेत्। माष्टारं शकटमारोहयत्। राखालादिभक्ताः शकटे आसन्। अद्य बुधवासरः, १५-नभेम्बरः, १८८२-खृष्टाब्दः, कार्तिकमासः, शुक्ला पञ्चमी। शकटं क्रमेण चित्पुरनामकपथेन 'गड़ेरमाठा'ख्यप्रान्तरमभि प्रचलति स्म।

श्रीरामकृष्ण आनन्दमयः—मत्तवत्—कदा शकटस्य अस्मिन् पार्श्वे, कदा वा अमुष्मिन् पार्श्वे मुखमायम्य बालकवत् पश्यति स्म। पथिकानुद्दिश्य—मन्ये, तैः साकं कथयति स्म। माष्टारमवदत्—दृश्यताम्, सर्व एव लोका निम्नदृष्टय इति पश्यामि। उदरार्थमेव सर्वे गच्छन्ति। ईश्वरमभि तेषां दृष्टिर्नास्ति।

अद्य श्रीरामकृष्णो 'गड़'प्रान्तरे उइलसनाभिधस्य क्रीड़ाविदः 'सार्कासे'ति मल्लक्रीड़ां द्रष्टुं गच्छति स्म। प्रान्तरं समागम्य निर्दर्शन्यः क्रीताः। निर्दर्शनी तावत् अष्टाणकमूल्यस्य—अर्थात् शेषश्रेण्याः। भक्ताः श्रीरामकृष्णमादाय एकस्मिन् उच्चस्थाने पीठोपरि उपाविशन्। श्रीरामकृष्णः सानन्दमवोचत्—अहो, इतः शोभनमेव द्रष्टुं शक्यते!

रङ्गस्थले अनेकक्षणं नानाविधाः क्रीड़ा दृष्टा आसन्। वर्तुलाकारवर्त्मनि अश्वो धावति स्म। अश्वपृष्ठे एकपदेन काचित् आरोहिका दण्डायमानाऽसीत्। अन्तराऽन्तरा पुरतः बृहन्ति लौहचक्राणि। चक्रसमीपमागत्य यदा अश्वश्चक्रस्य नीचै-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

धावति स्म, तदारोहिका अश्वपृष्ठादुत्प्लुत्य चक्रमध्येन चलिता सती पुनरश्वपृष्ठे एकपदेन दण्डायमानाऽभूत्। अश्वः पुनः पुनर्द्रुतवेगेन तेनैव वर्तुलवर्त्मना धावन्नासीत्, आरोहिकाऽपि पुनः पूर्ववदेव अश्वपृष्ठे दण्डायमानाऽस्त।

मल्लक्रीड़ा समाप्तिं गता। श्रीरामकृष्णो भक्तैरवतीर्य प्रान्तरे शकट-समीपमागच्छत्। शीतं समापतितम्। स गात्रे हरितमुत्तरीयं परिदधानः प्रान्तरे दण्डायमानः कथां कथयति स्म। समीपे भक्ता दण्डायमानाः। कस्यचित् भक्तस्य हस्ते श्रीरामकृष्णस्य वस्त्रपेटिकाऽसीत्। तस्यां मुखशुद्धि-द्रव्याणि आसन्।

श्रीरामकृष्णो माष्टारमभ्यधात्—"किं दृष्टम्? आरोहिका कीदृशदक्षतया एकेन पदेन अश्वोपरि दण्डायमानाऽसीत्, अश्वोऽपि तीव्रवेगेन अधावत्! कियन्नाम कठिनमेतत् कर्म! सा दीर्घकालमभ्यासं कृतवती, अतस्तया ईदृशं नैपुण्यं प्राप्तम्। स्वल्पेऽपि अनवधाने हस्तपादं भग्नं स्यात्, मृत्युरपि भवितु-मर्हति। संसारकरणमपि एतादृक् कठिनम्। बहुषु साधनभजनेषु कृतेषु ईश्वरकृपया केचन संसारकरणसामर्थ्यं प्राप्तवन्तः। परन्तु बहव एव नात्र प्रभवन्ति। संसारकरणे प्रवृत्ता भूयोऽपि बद्धा भवन्ति, निमज्जन्तितराञ्च। मृत्युयन्त्रणाऽपि आविर्भवति। केचन—यथा जनकादयः—अनेकतपस्याबलेन संसारं कृतवन्तः। अतः साधनभजनाभ्यां सविशेषं प्रयोजनम्, तदसत्त्वे संसारे स्थिरबुद्ध्या स्थातुं न शक्यते।"

अथ श्रीरामकृष्णः शकटं समारूढः। शकटं तावत् बाग्बाजाराभिधान-पल्ल्यां वसुपाड़ाख्यवर्त्मनि बलरामवाट्या द्वारे उपस्थितमभूत्। श्रीरामकृष्णो भक्तैः सह द्वितलस्य बहिःप्रकोष्ठे समागम्योपविष्टः। सन्ध्यादीपः प्रज्वालित एव। श्रीरामकृष्णो मल्लक्रीड़ायाः प्रसङ्गं कुर्वन्नास्त। अनेके भक्ताः समवेताः। तैः साकमीश्वरीयकथा बहुशः प्रचलति स्म। मुखे नान्या काऽपि कथा स्वल्पेनपि अभवत्, केवलमीश्वरकथा।

जातिभेदसम्बद्धा कथाऽपतत्। श्रीरामकृष्णोऽवोचत्—"नन्वेकेन उपायेन जातिभेदोऽपगतो भवितुमर्हति। स एवोपायः भक्तिः। भक्तस्य जातिर्नास्ति। सति भक्तिमात्रे देहो मन आत्मा चैवैतानि शुद्धान्यापद्यन्ते। गौरनित्यानन्दौ हरेर्नाम प्रदातुं प्रचक्रमाते, आचण्डालं च क्रोड़ं ददतुः। भक्त्या विना ब्राह्मणो ब्राह्मणो नैव भवेत्। पुनर्भक्तिसद्भावे चण्डालोऽपि न चण्डालो भवेत्। अस्पृश्यजातिर्भक्त्या शुद्धः पवित्रश्च सञ्जायते।"

श्रीरामकृष्णः संसारिबद्धजीवप्रसङ्गं करोति स्म। ते खलु पट्टकीटवत्। संकल्पमात्रमेव संसारात् ते निर्गन्तुं क्षमाः। कीटा अपि तादृशाः। अनेक-यत्नपूर्वकं तैः तन्तुनिर्माणं कृतम्, तत्ते त्यक्तुं नार्हन्ति। एतेनैव मृत्युर्भवति।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पुनर्यथा जालबद्धा मत्स्याः। येन पथा ते प्रविष्टास्तेनैव पथा निर्गन्तुं क्षमाः, किन्तु जलस्य मधुरः शब्दोऽन्यैश्च मत्स्यैः क्रीड़ा—द्वयमपि मोहकरम्; अतो विस्मृतिमापन्ना निर्गन्तुं न यतन्ते।

अपत्यानामर्धस्फुटा कथा जलकल्लोलमधुरशब्दवत्। मत्स्यास्तावज् जीवाः, परिवारवर्गः। अवश्यमेव कति धावन्तः पलायन्ते। ते मुक्तजीवा अभिधीयन्ते।

श्रीरामकृष्णो गायति स्म—

"महामायामाया जयति किमहो मोहनकरी
यया विश्वं सर्वं विषमकुहकैरावृतमिदम्।
विरिञ्चिर्विष्णुश्च व्यपगतचितिस्तद्बलवशात्
अशक्तो जीवोऽस्मिन् किल किमिह कर्तुं प्रभवति ॥
विलं घूर्णावर्तेः कृतमथ तु मीनः प्रविशति
स्थिते मार्गेऽप्यस्मान्न बहिरपसर्तुं क्षम इह।
स्वयं कृत्वा सूत्रं निजविहितबन्धादभिलषन्
पतङ्गः कश्चिद् भोः प्रभवति पुनर्निष्क्रमविधौ ॥
महामायासूत्रैर्विहितनिजबन्धो न च पुनः
समर्थो निर्यातुं निजकृतिवशाद् याति निधनम् ॥"

पुनरब्रवीत् श्रीरामकृष्णः—जीवा वैदलवत् पेषणयन्त्रे निपतिताः, अतोऽवश्यमेव पिष्टा भवेयुः। किन्तु ये नाम वैदलाः पेषणयन्त्रदण्डमवलम्ब्य तिष्ठन्ति ते न पिष्टाः स्युः। पेषणयन्त्रदण्डोऽत्र ईश्वरः। ईश्वरशरणागतेन भवितव्यम्। तं प्रार्थयस्व, तन्नाम गीयतां, तस्मादेव मुक्तिः। तदसत्त्वे कालरूपपेषणयन्त्रेण पिष्टा भविष्यथ।

श्रीरामकृष्णः भूयोऽपि गायति स्म—

"भवसागरसङ्गततनुतरणीयं
जननि! निमज्जति किमु करणीयम्।
माया-विजृम्भन-मोहप्रभञ्जन
एजति जर्जति परिगतवर्धनः
दुर्दमरोषण-षड्नाविकजन

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एकः खलु पुनरनिपुणचालकः
विषमसमाश्रये किमु करणीयम् ।
दुष्टसमीरण-गमनारम्भण-
फलमिह मज्जनमिह समुपात्तम्
किमु करणीयम् ।
अभवद् भक्तिवहनीविभङ्गः
खण्डितमान्तरभावमयाङ्ग-
तरणीचालनवसनं विषमं
समुपस्थितमिह किमु करणीयम् ॥
दृश्यत इह न च कः समुपायः
चिन्ताजर्जरमभूदथ काय-
मस्ति च पुनरेक एष उपायः
स एव हि साम्प्रतमिह वरणीयः ।
दुर्गाऽभयप्रदनाममयोडुप-
लम्भनमिति किल मम करणीयम् ॥"

विश्वास-महोदयो बहुक्षणमुपाविशत् ; इदानीमेव उत्थाय गतः । तस्य अर्थप्राचुर्यम् आसीत्, किन्तु तच्चरित्रे मलिने जाते सर्व एव अर्थ उड्डीनभूतः । अधुना पत्नीकन्याप्रभृतीनां केषामपि वार्तां न गृह्णाति । बलरामेण तत्प्रसङ्गे कृते श्रीरामकृष्णोऽवदत्—"एतन्नाम लक्ष्मीहीनं दारिद्र्यम् । गृहस्थस्य कर्तव्य-मस्ति, ऋणानि सन्ति—दैवमृणं, पैत्र्यमृणम् आर्षमृणञ्च—परिवारसम्बद्धमपि ऋणमस्ति, पत्न्यां साध्वीभूतायां तत्प्रतिपालनं कर्तव्यम्, सन्तानप्रतिपालनञ्च करणीयं यावत्ते सन्तानाः प्राप्तवयसो न स्युः ।

"केवलं साधुरेव न सञ्चयं कुर्यात् । पक्षी यतिश्चैव सञ्चयं न कुरुतः । जातशावकः पक्षी तु सञ्चयमाचरति । असौ शावकार्थं मुखे कृत्वा खाद्यं नयति ।"

बलरामः—इदानीं विश्वासमहोदयस्य साधुसङ्गकरणार्थम् इच्छा जाता ।

श्रीरामकृष्णः (सहास्यम्)—साधोः कमण्डलुर्धामचतुष्टयं भ्रमन् पुनरा-वर्तते, तथापि यथा तिक्तस्तथैव स्यात् । मलयवायुर्यान् यान् वृक्षान् स्पृशति, ते एव सर्वे चन्दनतामापद्यन्ते ; परम् अश्वत्थशाल्मलीप्रभृतयश्चन्दनतां नोपयन्ति । केचन गञ्जिकासेवनार्थं साधुसङ्गं कुर्वन्ति । (हास्यम्) साधवः प्रायशो गञ्जिकां सेवन्ते, अतस्तत्समीपमागत्य गञ्जिकामुपकल्प्य प्रसादं प्राप्नुवन्ति ।

(सर्वेषां हास्यम्)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१६-नभेम्बरः, १८८२-खृः

यस्मिन्नहनि भगवान् श्रीरामकृष्णः गड़प्रान्तरे मल्लक्रीड़ां दृष्टवान्, तस्मात् परेद्यवि पुनः कलिकातायां शुभागमनमकरोत्। बृहस्पतिवासरः, १६-नभेम्बरः, १८८२-खृष्टाब्दः, कार्तिकमासस्य शुक्ला षष्ठी, १-अग्रहायणः। समागम्यैव आदौ गराणहाटाभिधायां पल्ल्यां षड्भुजमहाप्रभोर्दर्शनं कृतवान्। तत्रास्ति वैष्णवसाधूनां मठः। मठाध्यक्ष आसीत् श्रीगिरिधारिदासः। षड्भुजमहाप्रभु-सेवा बहुकालं यावत् प्रचलत्येव। श्रीरामकृष्णोऽपराह्णे दर्शनमकरोत्।

सन्ध्यायाः कियत्कालात् परं श्रीरामकृष्णः सिमुलियानिवासिनः श्रीयुक्त-राजमोहनस्य गृहं शकटयोगेन समागम्योपस्थितः। अत्र नरेन्द्रप्रभृतयो युवानो मिलिताः सन्तो ब्राह्मसमाजस्योपासनां कुर्वन्तीति श्रीरामकृष्णः श्रुतवान्। अतस्तान् द्रष्टुमागतः। माष्टारोऽन्ये च कति भक्ताः सङ्गे आसन्। श्रीयुक्त-राजमोहनः पुरातनो ब्राह्मभक्तः।

श्रीरामकृष्णो नरेन्द्रमालोक्य आनन्दितोऽभूत्। अभाषत च—"युष्माक-मुपासनां द्रक्ष्यामी"ति। नरेन्द्रो गातुं प्राक्रमत। श्रीयुक्त-प्रियप्रभृतयो युवान-स्तत्रोपस्थिता आसन्।

उपासना संसर्पति स्म। यूनां मध्ये कश्चिदुपासनां कुर्वन्नास्त। असौ प्रार्थयमानोऽवदत्—"भगवन्, सर्वं विहाय त्वय्येव मग्नो भवेयम्।" मन्ये, भगवन्तं श्रीरामकृष्णं दृष्ट्वा तस्योद्दीपनं जातम्। अतोऽसौ सर्वत्यागकथां वदति स्म। माष्टारः श्रीरामकृष्णस्यातिसन्निकटे उपाविशत्। श्रीरामकृष्णो-ऽतिमृदुस्वरेणाभ्यधात्—'तत् पुनः सम्पत्स्यते एवे'ति माष्टारः केवलं श्रुतवान्।

श्रीयुक्त-राजमोहनः श्रीरामकृष्णं जलयोगं कारयितुं गृहाभ्यन्तरं नयति स्म।

१९-नभेम्बरः, १८८२-खृः

प्रागुक्त-बृहस्पतिवारात् परं रविवासरे श्रीश्रीजगद्धात्रीपूजा ; तस्मिन्नवसरे सुरेन्द्रः श्रीरामकृष्णं निमन्त्रितवान्। स पुनः पुनः गृहाद् बहिरागच्छति—श्रीरामकृष्णः समागच्छेदिति निर्णेतुम्। माष्टारं दृष्ट्वा सोऽवोचत्—"त्वं समागतोऽसि, पुनस्तत्रभवान् कुतः ?" तदैव श्रीरामकृष्णशकटमुपस्थितम्। समीप एव श्रीयुक्त-मनोमोहनस्य वाटिका। श्रीरामकृष्ण आदौ तत्रावातरत्, तत्र किञ्चिद्विश्रम्य सुरेन्द्रगृहमागमिष्यतीति निश्चय आसीत्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मनोमोहनस्य बहिःप्रकोष्ठे श्रीरामकृष्णो वदन्नास्त—"यो नामाकिञ्चनः, यो दीनश्च तस्य भक्तिरीश्वरस्य प्रियं वस्तु। यथा सर्षपपिष्टकविमिश्रं यवसं गवां प्रियम्। दुर्योधनः प्रचुरं धनैश्वर्यं प्रादर्शयत्, किन्तु तद्गृहे भगवान् श्रीकृष्णः किल न ययौ। परं स विदुरगृहं गतः। स भक्तवत्सलः; यथा धेनुर्वत्समनुधावति तथाऽसौ भक्तमनुगच्छति।" ततः श्रीरामकृष्णो गायति स्म—

"युगान्तरं भोः परमेण योगिना
तपस्यते योगविधिश्रुतेन वै।
यदर्थमन्तः समुदेति चेत् पुनः
स एष भावः परमार्थसाधकः।
तदा समाकृष्यत एव तेन हि
यथाऽऽयसैस्तन्मणिभिश्च लौहकम्।"

"कृष्णनामप्रसङ्गात् चैतन्यदेवस्य अश्रूण्यपतन्। ईश्वर एव वस्तु, तदन्यत् सर्वमेवावस्तु। संकल्पदाढर्यादेव लोको भगवन्तं लब्धुं प्रभवति। किन्तु कामिनीकाञ्चनभोगेष्वेवासौ मत्तः। शिरसि माणिक्यमस्ति, तथापि सर्पो हन्त! भेकं भुक्त्वा म्रियते!

"भक्तिरेव सारभूता। विचार्य क ईश्वरं ज्ञातुं शक्नोति? भक्त्या मे प्रयोजनम्। तस्य भगवतोऽनन्तमैश्वर्यम्। एतावद्ज्ञानैर्मे किम्? एककाचपात्रमितेन मद्येनाहं मत्तो भवामि, शौण्डिकापणे कियन्'मन'मितं मद्यमस्तीति वार्तया मे किं प्रयोजनम्? एकघटीमात्रेण जलेन मे तृष्णाशान्तिर्भवेत्, पृथिव्यां कियत्परिमाणं जलमस्तीति वार्तया मे प्रयोजनं नास्ति।"

इदानीं श्रीरामकृष्णः सुरेन्द्रभवनमायातः। समागतः सन् द्वितलस्थिते बहिःप्रकोष्ठे उपविशन्नास्त। सुरेन्द्रस्य ज्येष्ठाग्रजो विचारकः, सोऽपि उपस्थित आसीत्। अनेके भक्ता गृहे समवेताः। श्रीरामकृष्णः सुरेन्द्रस्य ज्येष्ठाग्रजमाह—"भवान् विचारकः; तत् खलु साधु। ज्ञायतामेतत्—सर्वमेव ईश्वरशक्तेर्विलासः। उच्चैःपदं स एव दत्तवान्, अतो भवता प्राप्तम्। वयं महान्तो जना इति लोका मन्यन्ते। उपरिच्छदिषो जलं सिंहमुखाकारनलिकया पतति, कश्चित् सिंहस्तावन्मुखेन जलं निष्क्रामयतीति प्रतिभाति। किन्तु दृश्यताम्—कुत्रत्यं जलम्! आकाशे क्व मेघाः समुद्भवन्ति! तज्जलं तु सौधपृष्ठे पतति; ततो विगलितं सत् नलिकामाप्नोति, तदनन्तरं नलिकासिंहमुखेन निर्गच्छति।"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सुरेन्द्राग्रजः—महाशय, ब्राह्मसमाजे स्त्रीस्वाधीनता स्वीक्रियते ; तैरुदाह्रियते—जातिभेदो निरस्यताम्।

श्रीरामकृष्णः—ईश्वरं प्रति नवानुरागे सति ईदृशं भवत्येव। झटिकायां समागतायां धूलय उत्तिष्ठन्ति। तदा क आम्रातकः, कस्तिन्तिड़िः को वा आम्र इति बोद्धुं न शक्यते। व्यपगतायान्तु झटिकायां सर्वं बुध्यते। नवानुरागस्य वायौ प्रशान्ते क्रमश एव ज्ञायते—ईश्वर एव श्रेयान् नित्यपदार्थः, अन्यत् सर्वमनित्यम्। विना साधुसङ्गं तपस्यां वा नैतेषामवधारणं सम्भाव्येत। मृदङ्गतानसूचकशब्दानां मुखेनोच्चारणेन किं स्यात्? एतेषां करायत्तीकरणमेव दुष्करम्। केवलं वक्तृतादानेन किम्? तपस्या आवश्यकी, तत एव धारणा भवेत्।

"अथ जातिभेदः? केवलमेकेनैव उपायेन जातिभेदो विलुप्येत। भक्तिरेव स उपायः। भक्तस्य वै जातिर्नास्ति। अस्पृश्यजातिर्विशुध्यति। भक्तौ सत्यां चण्डालश्चण्डालतां न भजते। चैतन्यदेव आचण्डालं स्वाङ्केऽकरोत्।

"ब्रह्मज्ञानिनो हरेर्नाम कीर्तयन्तीति अत्युत्तमम्। व्याकुलतया प्रार्थ्यमाने ईश्वरे तत्कृपा भवेत्, तल्लाभश्च स्यात्।

"सर्वैरेव पथिभिरसौ प्राप्तुं शक्यते। एक एवेश्वरः, नानानामभिर्व्यपदिश्यते। यथा, हिन्दव एकस्य घट्टस्य जलं पिवन्ति, उदाहरन्ति जलमिति ; अपरस्मिन् घट्टे खृष्टीयाः पिबन्ति, वदन्ति च 'वाटार्' इति। पुनरन्यस्मिन् घट्टे मुसलमानाः पिबन्ति, भणन्ति च 'पानी'ति।"

सुरेन्द्राग्रजः—महाशय, प्रेततत्त्वं पुनर्भवतां कीदृशं प्रतिभाति?

श्रीरामकृष्णः—श्रुतं मया, अमुष्य परिशीलनेन अलौकिकी शक्तिर्जायते। देवमण्डलस्य गृहे कञ्चित् पिशाचसिद्धं दृष्टवानहम्। कति नाम द्रव्याणि पिशाचेन समानीय समर्पितानि। पुनस्तु अलौकिकशक्त्या किमहं करिष्यामि? किमनया ईश्वरलाभः सम्पद्यते? अथेश्वर एव न लभ्येत चेत् तर्हि सर्वमेव मिथ्या।

२६-नभेम्बरः, १८८२-खृः

भगवान् श्रीरामकृष्णः कलिकातायां श्रीयुक्तमणिलालमल्लिकस्य सिन्दुरियापट्टीतिपल्ल्या वाटिकायां भक्तैः साकं शुभागमनं कृतवान्। तत्र प्रतिवत्सरं ब्राह्मसमाजस्य उत्सवो भवति। अपराह्णः, चतुर्घटिका भवेत्। अत्राद्य ब्राह्मसमाजस्य सांवत्सरिक उत्सवः। २६-नभेम्बरः, १८८२-खृष्टाब्दः। श्रीयुक्तविजयकृष्ण-गोस्वामी, अनेके ब्राह्मभक्ताः, श्रीप्रेमचांदबड़ालो गृह-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्वामिनोऽन्ये च बन्धवः समागताः। माष्टारप्रभृतयोऽपि श्रीरामकृष्णेन सह वर्त्तन्ते स्म।

श्रीयुक्तमणिलालमहोदयो भक्तसेवार्थं प्रचुरमायोजनं कृतवान्। प्रह्लाद-चरित्रकथा भविष्यति। ततो ब्राह्मसमाजस्य उपासना भवेत्। अन्ते भक्ताः प्रसादं प्राप्स्यन्ति।

श्रीयुक्तविजयमहोदयः तदानीमपि ब्राह्मसमाजभुक्त एवासीत्। सोऽद्यकार-स्योपासनां विधास्यति। असावद्यापि गैरिकवस्त्रं न धृतवान्।

कथकमहाशयः प्रह्लादचरित्रकथां कथयति स्म। प्रह्लादपिता हिरण्यकशिपुः हरेर्निन्दां कृतवान्, प्रह्लादञ्च बहुशो निर्यातितवान्। प्रह्लादो बद्धाञ्जलिः सन् हरिं प्रार्थयमानोऽभ्यधात्—'हे हरे, पित्रे मे सुमतिं प्रयच्छ।' भगवान् श्रीरामकृष्णः कथामेतामाकर्ण्य रुदन्नास्त। श्रीयुक्तविजयप्रभृतयो भक्ताः श्रीरामकृष्णसमीपे उपविष्टा आसन्। श्रीरामकृष्णस्य भावावस्था सञ्जाता।

अथ व्यतीते कियत्क्षणे श्रीरामकृष्णो विजयादीन् भक्तानाह—"भक्तिरेव सारभूता। तस्य भगवतो नामगुणकीर्तने सदा क्रियमाणे भक्तिर्लभ्यते। अहो, शिवनाथस्य कीदृशी भक्तिः! रसनिक्षिप्तया आमिक्षावटिकया उपमीयतेऽसौ।

"केवलं ममैव धर्मो यथार्थः, अन्येषां सर्वेषां तु धर्मो भ्रमात्मकः—नैव ईदृशं चिन्तनं शोभनम्। आन्तरिक्या व्याकुलतयैव इष्टसिद्धिर्भवेत्। अनन्ताः पन्थानोऽनन्तानि मतानि च।

"दृश्यताम्—ईश्वरः साक्षात्कर्तुं शक्यते। वेदे आम्नातं यद् 'अवाङ्मनस-गोचरं ब्रह्म' अस्यार्थः—विषयासक्तमनसोऽगोचरम्। वैष्णवचरणोऽवादीत्—'असावीश्वरः शुद्धस्य मनसः शुद्धायाश्च बुद्धेर्गोचरः। अतः साधुसङ्ग-प्रार्थना-गुरूपदेशैः—एतैः सर्वैः प्रयोजनम्। तदैव चित्तशुद्धिर्भवेत्। तदा तद्दर्शनं भवत्येव। कर्दमाक्तजले जलशोधके निर्मलीति द्रव्ये प्रक्षिप्ते जलं परिष्कृतं भवति। तदा तस्मिन् मुखमपि द्रष्टुं शक्यते। समले दर्पणेऽपि मुखदर्शनं न सम्भवेत्।

"चित्तशुद्धेरनन्तरं भक्तिलाभे सति ईश्वरकृपया तद्दर्शनं जायते। भगवद्-दर्शनात् परं तदादेशे प्राप्ते सति लोकशिक्षा दातुं शक्येत। न पुनरग्रत एव वक्तृताप्रदानं शोभते। एवमस्ति किञ्चित् गानम्—

"एकाकिना मम तु मानस! चिन्त्यते किं
प्रेमान्तरेण किमु गौरशशाङ्क ऐति?
अरे, आ जन्मनो न कृतवान् परिमार्जनं वा
देवालयेषु निवसन्ति ततो विशङ्काः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एकादशेति विदिता मलिना ह्यशुद्धा
नित्यं हि चर्मचटिकाः किमु तत्र न स्युः ?
त्वन्मन्दिरे न हि विराजति माधवो वा
शून्या विशोभत इयं किल वेदिकाऽस्मिन् ।
अन्ते च रे सपदि शङ्खनिनादकाद्यै-
रानीतवांस्त्वमिह रे विषमां समस्याम् ॥"

"आदौ हि परिष्करणीयं नाम हृदयमन्दिरम् । तत्र च पुनः देवप्रतिमा आनेतव्या, विधेयञ्च तत्र पूजायोजनम्। किमपि आयोजनं नास्ति. केवलं शङ्खध्वनिना किं स्यात् ?"

अथेदानीं श्रीयुक्तविजय-गोस्वामी वेद्यामुपविष्टः सन् ब्राह्मसमाजपद्धत्या उपासनां विदधाति स्म। उपासनान्ते स श्रीरामकृष्णसमीपमागम्य उपाविशत् ।

श्रीरामकृष्णः (विजयं प्रति)—भोः, कथं यूयमेतावत् केवलं पापं पापमिति उच्चारितवन्तः ? अहं पापी, अहं पापीति शतशो उच्चारिते सति लोकस्तद्भूत एव स्यात्। ईदृशो विश्वासः कर्तव्यो यत्—तन्नामाहं कीर्तितवान्—मम तावत् किं नाम पापम् ? असावस्माकं पिता माता च ; तमेव वद यत्—नूनमहं पापं कृतवान्, पुनः कदापि न करिष्यामि। भूयस्तन्नाम कीर्त्यताम्, तन्नामकीर्तनेन यूयं सर्वे आत्मनो देहमनांसि पवित्रीकुरुध्वम्—जिह्वां पवित्रयत।"

डिसेम्बरः, १८८२-खृः

भगवान् श्रीरामकृष्णो दक्षिणेश्वरमन्दिरे अपराह्णे निजप्रकोष्ठे पश्चिमालिन्दे आलपन्नासीत् । तेन सहासन् बाबुराम-माष्टार-रामदयालप्रभृतयः। डिसेम्बर-मासः, १८८२-खृष्टाब्दः। बाबुरामो रामदयालो माष्टारश्चाद्य रात्रौ स्थास्यन्ति। शीतस्य अवकाशः प्रारब्धः। माष्टारः परेद्युरपि स्थास्यति। बाबुरामो नूतनमेव आगच्छति स्म ।

श्रीरामकृष्णः (भक्तान् प्रति)—ईश्वरः सर्वमेव करोतीति ज्ञाने सम्पन्ने मानुषो जीवन्मुक्त एव भवति। केशवसेनः शम्भुमल्लिकेन साकमागमत् । अहं तमवदम्—'वृक्षस्य किञ्चित् पत्रमपि ईश्वरेच्छां विना न स्पन्दते।' क्व स्वाधीना इच्छा ? सर्वमेव ईश्वराधीनम्। नग्नस्तापसः (तोतापुरी) ईदृशमहाज्ञानी आसीत्, सोऽपि जले निमज्जितुमगच्छत् ! अत्रैकादश मासानवसत् । तस्योदरामयोऽभवत् ; रोगयन्त्रणया अस्थिरो भूत्वा गङ्गायां निमज्जितुमगमत् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

घट्टसमीपे अनेकदूरं यावद् द्वीपवदुन्नतभूमिरासीत् ; यावदग्रसरति, जानु-परिमाणाज्जलादधिकं न भवति। तदा पुनरबुध्यत, बुद्ध्वा च प्रत्यावर्तत। मम तावत् कदा वायुवृद्धिर्जाता, अतो गलदेशे छुरिकां दातुं प्राक्रमे। तस्मादहं वच्मि—'मातः, अहमेव यन्त्रम्, त्वं खलु यन्त्रिणी ; अहं रथः, त्वमेव रथिनी ; यथा चालयसि तथा चलामि, यथा च कारयसि तथा करोमि।'

श्रीरामकृष्णप्रकोष्ठे गीतं चलति स्म, भक्ता गायन्त आसत—

"हृदि वृन्दावने यदि तु कमलेश निवससि
भवेद् भक्ती राधा मम शरण्यभक्तिप्रिय विभो।
मुमुक्षा मे नूनं भवति भवतो गोपयुवतिः
वपुर्नन्दागारः स्नेहरूपा हि माता यशोमती ॥
मदीयं पापं भो भवतु तव गोवर्धनगिरिः
ततः कारुण्यात्तं निजकरयुगैर्धारय भृशम् ॥
अये ! कामं कंसं जहि मम मनोवासनिलयं
चिरं षट् शत्रून् मे विजहि कृपया कंससहगान्।
कृपावेणोनादैः कृतनिजवशान्तर्धेनुनिवहः
चिरं हृद्गोष्ठे मे विहर चरणे प्रार्थ्यत इदम् ॥
अथ प्रेमश्रेणीललितयमुनायास्तटगतः
मदाशासद्वंशीवटविटपिमूले चिरमहो।
इमं दासं मत्वा सदयवसतिं स्वीकुरु सदा
ध्रुवं दास्यं ते भवति नियतं दाशरथिकृतम् ॥

अपि च

मम हृदयपिञ्जर-निवासविहङ्गम गाय रे।
ब्रह्मकल्पतरुमूलवरासने तिष्ठ रे।
महिमसमन्वित-विभुगुणसङ्गीतकर्मतः
पुरुषचयार्थितफलचयनन्दित नन्द रे ॥

नन्दनबागानाभिधान-स्थाननिवासी श्रीनाथमित्रः सबन्धुः समागतः। तमालोक्य श्रीरामकृष्णोऽभ्यधात्—"अये, चक्षुषास्य एतस्य आन्तरं सर्वं विलोक्यते, गवाक्षकाचेन यथा गृहाभ्यन्तरस्थं सर्वं दृश्यते।" श्रीनाथयज्ञनाथौ नन्दनबागान-ब्राह्मपरिवारभुक्तौ। अनयोर्वाटिकायां प्रतिवत्सरं ब्राह्मसमाजोत्सवो भवति स्म। उत्सवदर्शनार्थं श्रीरामकृष्णः पश्चात्तत्रागच्छत्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सन्ध्यायां समतीतायां देवतायतने आरात्रिकं समारब्धम्। स्वगृहे क्षुद्र-खट्वायां समासीनः श्रीरामकृष्ण ईश्वरचिन्तां कुर्वन्नासीत्। क्रमेणासौ भावाविष्टो जातः। भावोपशमात् परं कथयति स्म—"मातः, इममपि जनं समाकर्ष। स ईदृशेन दीनभावेन तिष्ठति। त्वत्सविध एव गमनादिकं करोति।"

किं श्रीरामकृष्णो भावाविष्टः सन् बाबुरामकथां कथयति स्म? बाबुराम-माष्टार-रामदयाल-प्रभृतय उपविष्टा आसन्। रात्रिरष्टनवघटिका भवेत्। श्रीरामकृष्णः समाधितत्त्वं प्रपञ्चयन्नासीत्—जड़समाधिः, चेतनसमाधिः, स्थित-समाधिः, उन्मनःसमाधिश्च तेन व्याख्याता आसन्।

तदानीं प्रचलति सुखदुःखसम्बन्धिनी कथा। कथमीश्वर एतावन्ति दुःखानि कृतवान्?

माष्टारः—विद्यासागरः साभिमानमुक्तवान्—"ईश्वराह्वानेन तावत् किम्? दृश्यताम्—जेङ्गिसखानाभिधो दिग्विजयी लुण्ठनादिकं समारभमानो बहून् लोकान् वन्दीचकार। क्रमेण लक्षप्राया जना वन्दिदशामापन्नाः। तदा सेना-पतयः समागम्यावदन्—'महाशय, एतान् को भोजयिष्यति? अस्माभिः सहैतेषामवस्थितौ अस्माकं विपत् समापतेत्। अथ किं समाधेयम्? एषां मोचनेनापि विपत्।' तदा जेङ्गिसखानाह—'तर्हि किं कर्तव्यम्? हन्यन्तामेते सर्वे।' अतो तूर्णमेवैतेषां वधः समादिष्टः। ईश्वरेण खल्वेतत् हत्याकृत्यं दृष्टम्। तेन तु एतन्न निवारितम्। ईश्वरोऽस्तु नाम, नाहं तेन किमपि प्रयोजनं मन्ये। मम तावत् कोऽपि उपकारो न सञ्जातः।"

श्रीरामकृष्णः—ईश्वरकार्यं किं बोद्धुं शक्यते? किमुद्दिश्यासौ किं करोतीति किं बुध्यते? स सृष्टिस्थितिसंहारान् सर्वानेव विदधाति। कथमसौ संहरतीति वयं किं बोद्धुं शक्नुमः? अहं कथयामि—'मातः, मम तावत् बोधेनापि प्रयोजनं नास्ति, त्वत्पादपद्मयोर्भक्तिर्दीयताम्।' भक्तिलाभ एव मनुष्यजीवनस्योद्देश्यम्। अन्यत् सर्वं माता जानाति। आम्रोद्याने आम्रभक्षणार्थमागतोऽहम्। कति वृक्षाः, कति शाखाः, पत्राणां कति वा कोट्यः—आसीनस्य मे एतेषां परिसंख्या-नेन किम्? आम्रमहं भक्षयामि, वृक्षपत्राणां परिसंख्यानेन मे प्रयोजनं नास्ति।

अद्य रात्रौ श्रीरामकृष्णकक्षभूमौ बाबुराम-माष्टार-रामदयालाः शयितवन्तः। गभीरा रात्रिः—द्वि-त्रि-घटिका। श्रीरामकृष्णकक्षे आलोको निर्वापितः। स स्वयं शय्यायां समासीनो भक्तैः सह अन्तरा अन्तरा कथाः कथयति स्म।

श्रीरामकृष्णः (माष्टारप्रभृतीन् भक्तान् प्रति)—श्रूयतां, दया माया च—द्वयं नाम पृथग्भूतं वस्तु। माया तावदात्मीयजनेषु ममत्वम्; यथा पितृ-मातृ-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भ्रातृ-भगिनी-स्त्रीपुत्रादिषु प्रीतिः। दया नाम सर्वभूतेषु प्रीतिः, सर्वत्र समदृष्टिः। यदि कस्मिंश्चिद् दया लक्ष्येत—यथा विद्यासागरे—तर्हि सा ईश्वरदयेति ज्ञातव्या। दयायाः सर्वभूतानां सेवा समुत्पद्यते। मायापि ईश्वरस्य। मायया स ईश्वर आत्मीयानां सेवां कारयत्येव। पुनः काचित् कथा स्मर्तव्या—मायया जीवा अज्ञाना बद्धाश्चापि क्रियन्ते। परन्तु दयया चित्तशुद्धिर्जायते। क्रमेण बन्धनमुक्तिः स्यात्।

"चित्तशुद्धि विना भगवद्दर्शनं न भवति। कामक्रोधलोभानां जये तस्य कृपा स्यात्। तदैव तद्दर्शनं भवति। अतिगुह्यकथां वो वदामि। कामं जेतुमहमनेकशः प्रयत्नं कृतवान्। जय कालि जय कालीति व्याहरन् बहुशोऽहम् आनन्दासनं प्रदक्षिणीकृतवान्। यदाऽहं दशैकादशवार्षिको स्वदेशे (कामारपुकुरे) आसम्, तदा सैवावस्था (समाध्यवस्था) मे जाता। क्षेत्रपथेन गच्छन्नहं यद्दृष्टवान्, तेनाहं विह्वलोऽभवम्। ईश्वरदर्शनस्य कति लक्षणानि सन्ति। ज्योतिर्दृश्यते, आनन्दः सञ्जायते, वक्षसि गुड़ु-गुड़ु इति कृत्वा अग्निद्रव्यवत् महावायुरुत्तिष्ठति।"

परेद्युः बाबुराम-रामदयालौ स्वावासं प्रत्यावृत्तौ। माष्टारस्तु तस्मिन्नेवाहनि रात्रौ श्रीरामकृष्णेन सह अतिवाहितवान्। तद्दिनेऽसौ देवतायतन एव प्रसादं प्राप्नोत्।

अपराह्णः समायातः। माष्टारः कति भक्ताश्च आसीनाः। केचन मारवारदेशीया भक्ताः समागम्य श्रीरामकृष्णं प्राणमन्। कलिकातायां ते वाणिज्यं कुर्वन्ति। ते श्रीरामकृष्णमभाषन्त—"भवान् अस्मभ्यं कञ्चिदुपदेशं प्रयच्छतु।" श्रीरामकृष्णो हसन्नासीत्।

श्रीरामकृष्णः (मारवारदेशीयान् भक्तान् प्रति)—श्रूयताम् 'अहं वयञ्चे'ति द्वयमेव अज्ञानम्। अयि ईश्वर, त्वमेव कर्ता, एतत् सर्वं तवैव—एतन्नाम ज्ञानम्। कथङ्कारं पुनर्ममेति ब्रूयात ? उद्यानस्य पर्यवेक्षको वदति—उद्यानं तावन्ममैवेति। किन्तु यद्यसौ कञ्चिद् दोषं करोति, तर्हि उद्यानस्वामिनाऽसौ विताड्यते। तदा तस्य एतादृशं साहसं न स्यात् येन आत्मन आम्रपेटिकामुद्यानाद् बहिरानयेत्। कामक्रोधादयो न निःसर्तुमर्हन्ति। ईश्वरं प्रत्येव तेषां वेग आवर्त्यताम्। कामना—यदि लोभः कर्तव्यस्तर्हि ईश्वरलाभार्थं कामना कर्तव्या—लोभः करणीयः। विचारपूर्वकं ते ताड़नीयाः। अन्येषां कदलीवृक्षान् भक्षितुमुद्यते हस्तिनि हस्तिपकस्तमङ्कुशेन आहन्ति।

"यूयं वाणिज्ये नियुक्ताः, क्रमेण उन्नतिर्लब्धव्येति जानीथ। केचन आदौ एरण्डतैलयन्त्रं चालयन्ति ; पुनः प्रभूतार्थागमे सति वस्त्रव्यवसायं कुर्वन्ति।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तथैव ईश्वरपथेन क्रमशः अग्रेसर्तव्यम्। सति सम्भवे अन्तरा अन्तरा कति दिनानि निर्जने प्रदेशे अवस्थाय समधिकं तमीश्वरमाह्वयेत।

"परन्तु किं ज्ञायते? समयोपस्थितिं विना किमपि न सिध्यति। केषाञ्चन भोगा अनेकानि च कर्माणि अवशिष्यन्ते। अतः सिद्धौ विलम्बो जायते। अपरिपक्वस्य विस्फोटकस्योपरि अस्त्रोपचारे कृते हितं विपरीताय कल्पते। पक्वदशायां मुखव्यादाने सति भिषग् अस्त्रोपचारं विदधाति। कश्चिद् बालकोऽवदत्—'मातः, इदानीमेवाहं स्वपिमि। मम तावत् पुरीषोत्सर्गवेगे प्राप्ते मां जागरय।' माता आह—'वत्स, पुरीषोत्सर्गवेग एव त्वां जागरयिष्यति, त्वं पुनर्मया न जागरयितव्योऽसि।" (सर्वेषां हास्यम्)

मारवारदेशीया भक्ता अन्तराऽन्तरा श्रीरामकृष्णसेवार्थं मिष्टान्नादीनि द्रव्याणि आनयन्ति, फलखण्डादीनि च उपहरन्ति। खण्डखाद्ये पाटलसुरभितजलसंसर्गः। श्रीरामकृष्णस्तु तादृशानि द्रव्याणि प्रायशो नाहारार्थं गृह्णाति। वदति च—'एतैः व्यवसायिभिः प्रभूतमिथ्याकथनेन अर्थोपार्जनं क्रियते।' अतः स उपस्थितान् मारवारदेशीयान् कथाच्छलेन उपदिशन्नास्ते।

श्रीरामकृष्णः—व्यवसायकरणे सत्यकथाया दार्ढ्यं न तिष्ठति। व्यवसाये तावत् तेजोवत्ता मान्द्यमपि च भवतः। नानकस्य कथायाम् एवमस्ति; सोऽवदत्—'असाधोर्द्रव्यं भोक्तुं प्रवृत्तोऽहं दृष्टवान्—सर्वं रक्ताक्तं संवृत्तम्।' साधुभ्यः शुद्धद्रव्याणि देयानि नाम। मिथ्योपायेनार्जितं द्रव्यं न प्रदातव्यम्। सत्यपथेनैव ईश्वरो निगम्यते।

"सर्वदैव तन्नाम कीर्तनीयं खलु। कर्मसम्पादनकालेऽपि चित्तं तत्समीप एव समुपन्यस्यम्। यथा पृष्ठे मे विस्फोटो जातः, सर्वकर्माण्यपि करोमि, परन्तु मनो विस्फोटमभि वर्तते। उत्तमं खलु रामनामकीर्तनम्। यो रामो दशरथपुत्रः, स एव जगत्सृष्टिं करोति, सर्वभूतेष्वपि तिष्ठति, अतिसन्निकटे चास्ते—अन्तश्च बहिश्च वर्तते—स एव कीर्तनीयः—

"रामश्चायं दशरथसुतः सर्वलोकाभिरामः
तिष्ठेच्चायं रघुकुलमणिः सर्वभूतेषु चान्तः।
विश्वस्रष्टा भवति च तथा रामचन्द्रोऽयमेव
सर्वेषां च प्रभुरपि महान् रामचन्द्रः किलैषः॥"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

M.S.P. Sharma



श्रीरामकृष्णो विजयगोस्वामी च

१४-डिसेम्बरः, १८८२-खृः

दक्षिणेश्वर-कालिकायतने श्रीयुक्त-विजयकृष्ण-गोस्वामी भगवन्तं श्रीरामकृष्णं द्रष्टुं समागतः। तत्सङ्गे त्रिचतुरा ब्राह्मभक्ता आसन्। तद्दिनम् अग्रहायण-मासस्य शुक्ला चतुर्थी तिथिरासीत्। बृहस्पतिवासरः, १४-डिसेम्बरः, १८८२-खृष्टाब्दः। परमहंसदेवस्य परमभक्तेन श्रीयुक्त-बलरामेण सह ते नौकया कलिकातायाः समागताः। श्रीरामकृष्णो मध्याह्नकाले स्वल्पतया विश्राम्यन्नास्ते। रविवासर एव समधिकतया लोकसमागमो भवति। ये नाम भक्ता एकान्तत एव तेन सार्धं कथोपकथनं कर्तमिच्छन्ति, ते प्रायशोऽन्यस्मिन् दिवसे आगच्छन्ति।

परमहंसदेवः खट्वोपरि उपविष्टः। विजय-बलराम-माष्टारा अन्ये च भक्ताः पश्चिमास्या भूत्वा तस्याभिमुखं केचन कटोपरि, केचिच्च केवलं कक्षभूमौ उपविशन्त आसते। गृहात् पश्चिमभागे भागीरथी द्वारमध्यतो दृष्टाऽभूत्। शीतकालस्य स्थिरा स्वच्छसलिला भागीरथी। द्वारात् परमेव पश्चिमदिग्वर्ती अर्धमण्डलाकारोऽलिन्दः; तत एव पुष्पोद्यानम्, ततश्च चत्वरम्। प्रस्तर-चत्वरस्य पश्चिमगात्रे पुण्यसलिला कलुषहारिणी गङ्गा ईश्वरमन्दिरस्य पादमूलं सानन्दं प्रक्षालयन्ती प्रवहति।

शिशिरकालः, अतः सर्वेषां गात्रेषु उष्णवसनानि। विजयः शूलवेदनया दारुणां यन्त्रणामनुभवति। अतः काचकूप्या भेषजमानीतवान्, प्राप्ते काले तद् यथा सेव्येत। विजय इदानीं ब्राह्मसमाजस्य कश्चिद् वेतनभुग् आचार्यः। समाजवेद्या उपरि आसीनेन अनेन उपदेशो दीयेत। सम्प्रति तु समाजेन सह नानाविषयेषु तस्य मतभेदश्चलत्येव। कर्म तावदसौ स्वीकृतवान्; किं वा कुर्यात्? स्वाधीनभावेन कथां कार्यं वा कर्तुं नार्हति। विजयोऽतिपवित्र-वंशे—अद्वैतगोस्वामिवंशे जातः। अद्वैत-गोस्वामी ज्ञानी बभूव; स निराकार-परब्रह्मणो मननं चकार, भक्तेरपि परां काष्ठां प्रदर्शयामास। स भगवत-श्चैतन्यदेवस्य एकः प्रधानपार्षद आसीत्। स हरिप्रेम्णा मत्तः सन् नृत्यति स्म। एतादृशी आत्मविस्मृतिरभूत् यत् नृत्यतोऽस्य परिधेयवस्त्रमस्खलत्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विजयोऽपि ब्राह्मसमाजं समागतः। सोऽपि निराकार-परब्रह्मणो मननं कुर्वन्नास्ते। परन्तु महाभक्तस्य पूर्वगस्य अद्वैतस्य शोणितं तस्य धमन्यां प्रवहति खलु। तत् शरीरमध्यस्थितं हरिप्रेम्णो बीजमिदानीं प्रकाशोन्मुखं, केवलं कालं प्रतीक्षते। अतोऽसौ भगवतः श्रीरामकृष्णस्य देवदुर्लभेन हरिप्रेम्णा गभीरमत्तावस्थां दृष्ट्वा विमुग्धः सञ्जातः। मन्त्रमुग्धः सर्पो यथा फणं प्रसार्य आहितुण्डिकसन्निधौ आसीनस्तिष्ठति, विजयोऽपि परमहंसदेवस्य श्रीमुखान्निःसृतं भागवतं वच आकर्ण्य विमुग्धः सन् तत्सन्निधौ उपविशति। पुनर्यदाऽसौ हरि-प्रेम्णा बालकवत् नृत्यन्नास्ते, विजयोऽपि तदा तेन सार्धं नृत्यति।

एड़ियादहे विष्णोरावासः; स गलदेशे क्षुरिकां प्रदाय शरीरमत्यजत्। अद्य आदावेव तत्कथा भवति।

श्रीरामकृष्णः (विजयं, माष्टारं भक्तांश्च प्रति)—श्रूयतां, बालकोऽयं शरीरं त्यक्तवानिति मया श्रुतम्। एतेन मनो मे विषादं गतम्। असावत्रा-गच्छति स्म, विद्यालये चाधीते स्म, किन्तु 'संसारो मे न रोचत इति कथय-न्नासीत्। पश्चिमदेशमापन्नः कस्यचिदात्मीयस्यावासे कति दिनान्यवसत्। तत्रत्ये निर्जने प्रदेशे, प्रान्तरे, पर्वतके च सर्वदासीनो ध्यायन्नास्त। सोऽभ्यधात्—कतिविधानि ईश्वरीयरूपाणि मया दृश्यन्ते इति।

"मन्ये तावदिदम् अस्यान्तिमं जन्म। पूर्वजन्मनि खलु अनेककर्माणि कृतान्यासन्। किञ्चिदवशिष्टमासीत्, मन्ये तदपि जन्मनीह सम्पन्नम्।

"पूर्वजन्मनः संस्कारः खलु स्वीकर्तव्यः। श्रुतवानहं यत् कश्चित् शव-साधनामकार्षीत्। गभीरवनेऽसौ भगवत्या आराधनं कुर्वन्नासीत्। किन्त्वसौ विविधा विभीषिका द्रष्टुमारेभे। शेषे व्याघ्रः कश्चित् तमाक्रम्य गृहीतवान्। अपरः कश्चित् व्याघ्रभयात् समीपस्थ-वृक्षस्योपरि उत्थितः। स शवमन्यानि च पूजोपकरणानि सज्जीभूतानि दृष्ट्वा अवतरन्नेव आचमनपूर्वकं शवस्योपरि उपाविशत्। किञ्चिज् जपतोऽस्य पुरतः माता साक्षादाविर्भूता सत्याह—'अहं त्वयि प्रसन्ना जाता। वरं याचस्व।' मातुः पादपद्मयोः प्रणतः सन्नसौ उवाच—'मातः, किञ्चित् ते प्रष्टुमिच्छामि—त्वद्व्यापारं दृष्ट्वा निर्वाक् संवृत्तोऽस्मि। य एतावन्तं परिश्रमं स्वीकृत्य, एतावदायोजनं च विधाय, इयन्ति दिनानि त्वत्-साधनां कृतवान्, तं प्रति ते दया नाभूत्। परन्त्वहं किमपि न जानामि, किमपि न श्रृणोमि, भजनहीनः, साधनहीनो ज्ञानहीनो भक्तिहीनश्चाहम्; मां प्रति एतादृशी कृपा ते सञ्जाता!' भगवती हसन्त्याह—'वत्स, जन्मान्तर-वार्ता ते स्मृतौ नास्ति; जन्मनि जन्मनि त्वं मामाप्तुं तपः कृतवानसि; तेनैव साधनबलेन ते ईदृशो योगः संप्राप्तः; अतस्त्वं दर्शनं मे प्राप्तवान्। अधुना कथ्यतां को नाम वरस्तव याच्य' इति।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कश्चिद् भक्तः प्रावोचत्—'कोऽपि आत्महत्यां कृतवानिति शृण्वतो मे भयमुदेति।'

श्रीरामकृष्णः—आत्महत्या महापापम्। भूयो भूयः संसारे आवृत्तिर्भवेत्; पुनः संसार-यन्त्रणा भोग्या। किञ्च ईश्वरदर्शनात् परं यदि कश्चित् शरीरं मुञ्चति तर्हि एषात्महत्या नाभिधीयेत। तादृक् शरीरत्यागस्तु न दोषाय। ज्ञानलाभात् परं केचन शरीरं त्यजन्ति। यदा स्वर्णप्रतिमा मृत्तिकामूषायां निक्षिप्येत, तदा सा मृत्तिकामूषा संरक्षितुं वा भङ्क्तुमपि वा शक्येत।

"अनेकवत्सरेभ्यः प्राग् वराहनगरात् कश्चिद् युवा समायाति स्म। विंशतिवार्षिकोऽसौ। स गोपालसेननामा। अत्रागते तस्मिन् एतावान् भावस्तस्य समुदेति स्म यद् हृदयरामेणासौ धर्तव्योऽभूत्; नोचेत् पतनात् हस्तपादभङ्गः शङ्क्य आसीत्। एकदा युवासौ हठात् पादौ मे हस्तेन धृत्वाऽवदत्—'पुनरहमायातुं न शक्नोमि। तदहं साधयामि तावत्।' कियद्दिनानन्तरं श्रुतं मया यत् स शरीरं त्यक्तवान्।

"जीवाश्चतुर्विधा व्यपदिश्यन्ते—बद्धा मुमुक्षवो मुक्ता नित्याश्च। संसारो जालस्वरूपः। जीवास्तस्मिन् मत्स्यवत्। संसारोऽयं यस्य माया स एवेश्वरो धीवरः। धीवरस्य जाले यदा मत्स्याः पतन्ति, तदा केचित् जालं छित्त्वैव पलायितुम् अर्थात् मुक्ता भवितुं यतन्ते। एते मुमुक्षवो जीवा उदाह्रियन्ते। ये नाम पलायितुं चेष्टन्ते तेषां सर्व एव पलायितुं न शक्नुवन्ति। द्विचतुरा मत्स्याः सशब्दं पलायन्ते। तदा लोका वदन्ति—अहो, विशालोऽयं मत्स्यः पलायित इति। एते द्विचतुरा जना मुक्तजीवाः। केचिन्मत्स्याः स्वभावत एवैतावत् सावधाना यत् कदापि जालाभ्यन्तरे न पतन्ति। नारदादयो नित्यजीवाः कदापि संसारजाले न पतन्ति, किन्तु प्रायः सर्व एव मत्स्या जालबद्धा भवन्ति। परन्तु एषां बोधो नास्ति यत् ते जाले निपतिताः, अतस्तैर्मर्तव्यमेव। ते जाले पतित्वैव जालग्राहं सवेगं धावन्तः पङ्क एव आत्मशरीराणि गूहितुं यतन्ते। तेषां पलायनस्य काऽपि चेष्टा नास्ति, परन्तु भूयस्येव पङ्के पतन्ति। एते खलु बद्धजीवाः। जालमध्ये एते तिष्ठन्ति; किन्तु मन्यन्ते—अत्र सुखेनास्महे इति। बद्धजीवाः संसारे—अर्थात् कामिनीकाञ्चनयोः—आसक्ता विद्यन्ते; कलङ्कसागरे मग्नाः सन्ति, किन्तु सुखेनास्महे इति मन्यन्ते। ये नाम मुमुक्षवो मुक्ता वा, संसारस्तेषां कूपवत् प्रतिभाति, नासौ तेभ्यो रोचते। अतः केचन ज्ञानलाभानन्तरं, भगवल्लाभात् परमेव, शरीराणि जहति। किन्तु तादृशः शरीरत्यागः प्रायश एव सुदुर्लभः।

"बद्धजीवानां—संसारिजीवानां—कथमपि बोधो न जायते। एतावद् दुःखं,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एतावन्तमाघातं प्राप्नुवन्ति, एतावत्यां विपदि पतन्ति, तथापि तेषां चैतन्यं नोदेति।

"उष्ट्रेभ्यः कण्टकमयः घासः सातिशयं रोचते। किन्तु यावदेव खादन्ति तावदेव तेषां मुखतो रक्तं दरेण विगलति। तथापि ते तमेव सकण्टकं घासं खादेयुः, न तु मुञ्चेयुः। संसारिजना ईदृशं शोकतापौ प्राप्नुवन्ति, तथापि तेषां यथापूर्वं तथैव। कस्यचित् स्त्रियां मृतायामसतीत्वं गतायां वा स पुनरेव उद्वहेत्; पुत्रः मृतः, तस्मात् कियन्तं शोकमापन्नः, कियद्दिनेभ्यः परं तु सर्वस्य विस्मृतिमगात्। पुत्रस्य सैव माता—या शोकेनाधीरा संवृत्ता—कियद्दिनेभ्यः परं पुनरेव केशबन्धनं कृतवती, अलंकारानपि धृतवती! एवंविधा जनाः कन्या-विवाह-हेतोः सर्वस्वान्तं गच्छन्ति। भूयोऽपि प्रतिवर्षं तेषां कन्याः पुत्राश्चापि जायन्ते। व्यवहारमाश्रित्य ते सर्वस्वान्तं गच्छन्ति; पुनरपि व्यवहारमालम्बन्ते। यानि अपत्यानि जातानि तान्यपि ते भोजयितुं न पारयन्ति, पाठयितुं न प्रभवन्ति, उत्तमगृहे च वासयितुं नार्हन्ति, तथापि प्रतिवर्षं तेषां सन्ताना जायन्ते!

"कदापि पुनः सर्पेण छुछुन्दरग्रसनवत् तेषां दशा भवति। गेलितुमुद्-गेलितुं वापि तैर्न शक्यते। बद्धजीवा नु जानीयुर्वा संसारे न किमपि सार-भूतमस्ति—यथा आम्रातकस्य अष्ठिः त्वक् च; तथापि ते हातुं नार्हन्ति, तथापि च ईश्वरमभि मनः स्थापयितुं नेशते।

"पञ्चाशद्वार्षिकं केशवसेनस्य कञ्चिदात्मीयं 'तास्'क्रीड़ां कुर्वन्तमपश्यम्। मन्ये ईश्वरनाम-स्मरणसमयः तस्य नायातः। बद्धजीवस्य अपरं तावल्लक्षणमेक-मस्ति। यद्ययं संसाराद् बहिरपसृत्य समुचितस्थाने स्थाप्येत तर्हि नितरां खेदमापन्नो मृतवज् जायेत। विष्ठायाः कीटानां विष्ठायामेव प्रभूतानन्दः! तस्यामेव सातिशयं खलु हृष्टपुष्टा भवन्ति। यदि ते कीटा अन्नहण्डिकायां स्थाप्येरन् तर्हि म्रियेरन्!" (स्तब्धाः सर्वे)

विजयः—बद्धजीवानां मनसः किंभूतायामवस्थायां मुक्तिः सम्भवेत्?

श्रीरामकृष्णः—ईश्वरकृपया तीव्रवैराग्ये समुत्पन्ने कामिनीकाञ्चनासक्ततो निस्तारो भवितुमर्हति। किं नाम तीव्रवैराग्यमुदाह्रियते? एतद् भवति, भविष्यति, ईश्वरनाम च कीर्त्यतां—एते भावा मन्दवैराग्यम्। यस्य नाम तीव्र-वैराग्यं तस्य प्राणा भगवत्कृते व्याकुलाः; यथा मातृप्राणाः स्वोदरज-सन्तानार्थं व्याकुलाः। यस्य तावत् तीव्रवैराग्यं स भगवन्तमृते अन्यत् किमपि नेच्छति। संसारमसौ कूपवत् पश्यति, तस्य मनसि समुदेति—अहं नु मज्जा-मीति। आत्मीयान् कृष्णसर्पवत् प्रेक्षते, तेभ्यः पलायनार्थमपि इच्छा जायते,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अपि च पलायत एव। आदौ वासगृहस्य व्यवस्थां करोमि, तत ईश्वरचिन्तां करिष्यामीति नासौ भावयति। तस्यान्तरे प्रबलदृढ़ता।

"किं नाम तीव्रवैराग्यमित्यत्र काचित् कथा श्रूयताम्। कस्मिंश्चिद् देशे अनावृष्टिर्जाता, कृषीवलाः सर्वे प्रणालीं खनित्वा दूरादेव जलमानयन्ति। कस्यचित् कर्षकस्य महत् मनोदार्ढ्यमासीत्। तेनैकदा प्रतिज्ञातं—यावज्जलं नायाति, प्रणाल्या च सह नद्याः संगमो न भवेत्, तावत् खनन्नेवाहं यास्यामि। इतस्तु स्नानवेला समायाता। गृहिणी कन्याहस्तेन तैलं प्राहिणोत्। कन्याऽभाषत—'पितः, समयः संप्राप्तः, तैलाभ्यञ्जनं विधाय स्नानं समापय।' स आह—'अयि गम्यताम्—ममेदानीं कार्यमस्ति।' द्विप्रहरा वेला, एकघटिका वादिता, तथापि स हालिकः प्रान्तरे कार्यं कुर्वन्नास। स्नानस्य नामापि तस्य नासीन्मनसि। अथ तत्पत्नी क्षेत्रमासाद्य अब्रवीत्—'कथं नाधुनापि स्नातोऽसि? अन्नं तु शीततां गतम्। आतिशय्यं ते सर्वेषु व्यापारेषु। श्वो वा करिष्यसि, आहारात् परं वा करिष्यसि।' गालिं प्रदाय हालिकोऽसौ खनित्रपाणिस्ताम् अताड़यत्; पुनरभ्यधात्—"अपि ते बुद्धिर्नास्ति? वृष्टिर्न भवेत्, कर्षणादिकं किमपि न स्यात्; ऐषमः सन्तानाः किमश्नीयुः? अनाहारेण सर्वे यूयं मरिष्यथ? मया प्रतिज्ञातम्—क्षेत्रे आदावहं जलमानेष्यामि, ततः स्नानाहारयोः कथां कथयिष्यामि।' पत्नी तस्य भावगतिं दृष्ट्वा धावन्ती पलायिता। हालिकः समग्रदिवसं कठोरपरिश्रमात् सायं प्रणाल्या सह नद्या योगं साधितवान्। तदा एकपार्श्वत आसीनो द्रष्टुमारभत—कलकलनादेन नदीजलं क्षेत्रमायातीति। तदा तस्य मनः शान्तमानन्देन च पूर्णं संवृत्तम्, गृहञ्च समागम्य पत्नीमाहूय अवादीत्—'अयि, तैलमधुना देहि, तमाखुञ्च सज्जीकुरु।' ततो निश्चिन्तः सन्नसौ स्नानाहारौ विधाय सुखेन घर्घरायमाणः स्वपितुं प्राक्रमत। ईदृशं चित्तदार्ढ्यं तीव्रवैराग्यस्य उपमा।

"अथापरः कश्चित् कर्षकः क्षेत्रे जलमानयन्नासीत्। तस्य पत्नी प्रत्यासन्ना सती यदाऽवदत्—वेलाऽतीव संवृत्ता; अधुना समागम्यताम्—कृतम् एतावता आधिक्येन; तदाऽसौ अधिकां वाचमनुक्त्वा खनित्रं निधाय पत्नीं व्याहरत्—'यतस्त्वयैव उच्यते तर्हि चल्यताम्।' (सर्वेषां हास्यम्) तस्य हालिकस्य क्षेत्रे पुनर्जलानयनं नाभूत्। एषा तु मन्दवैराग्यस्य उपमा। असति दार्ढ्ये कर्षकस्य यथा क्षेत्रे जलं नायाति, तथा मनुष्यस्यापि ईश्वरलाभो न स्यात्।

श्रीरामकृष्णः—(विजयं प्रति)—प्राक् त्वया बहुश आगम्यत। कथमधुना नायासि?

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विजयः—इहागमने महतीच्छा वर्तते ; परन्तु नाहं स्वाधीनः। ब्राह्म-समाजस्य कार्यं स्वीकृतवानस्मि।

श्रीरामकृष्णः (विजयं प्रति)—कामिनीकाञ्चने जीवं बध्नीतः। एताभ्यां स्वाधीनता व्यपगच्छेत्। कामिनीत एव काञ्चनेन प्रयोजनम्। तदर्थं परस्य दासत्वमावश्यकम् ; तेन स्वाधीनता प्रयात्येव। आत्ममनोऽनुरूपं कर्म कर्तुं नार्हसि।

"जयपुरे गोविन्दस्य पूजकाः प्रथमतो विवाहं न कृतवन्तः। तदा ते सुतरां तेजस्विन आसन्। राजा एकदा तानाहूतवान् ; किन्तु ते राजसमीपं नागमन्। तैरुक्तञ्च—'राजा अत्रागमनार्थमुच्यताम्।' अतःपरं राजा, पञ्चजनाश्चापरे, तेषां विवाहं विहितवन्तः। ततो राजसाक्षात्कारार्थम् अपरकृताह्वानं तेषां नावश्यकमासीत्। ते स्वयमेव समागम्योपस्थिता ऊचुः—'महाराज, आशीर्वाद-ज्ञापनार्थं वयमागताः, एतन्निर्माल्यमानीतवन्तः, कृपया धारय।' अतः कार्य-व्यपदेशेन तेषां राजसमीपे आगमनमावश्यकं बभूव—अद्य गृहनिर्माणं भविष्यति, अतः पुत्रस्य अन्नप्राशनं, ततोऽस्य विद्यारम्भः—एवमादीनि।

"ननु मुण्डिनां द्वादशशतानां मुण्डिनीनाञ्च त्रयोदशशतानां कथा युष्माभि-र्ज्ञायते। नित्यानन्दगोस्वामिनः पुत्रस्य वीरभद्रस्य मुण्डि-शिष्याणां त्रयोदश-शतान्यासन्। ते यदा सिद्धा बभूवुस्तदा वीरभद्रस्य भयमभवत्। सोऽचिन्तयत्—एते सिद्धा जाताः ; लोकेभ्यो हि यत् ते कथयिष्यन्ति तदेव फलिष्यति। ते यां दिशं प्रति गच्छेयुस्तत एव भयम्। कुतः ? यदि जना अजानन्त एवापराद्धाः स्युस्तर्हि तेषामनिष्टं भवेत्।' एवं विचिन्त्य वीरभद्र-स्तानाहूय जगाद—'युष्माभिः गङ्गां गत्वा सन्ध्यादिकं विधाय पुनरागम्यताम्। मुण्डिनामेतादृशं तेजो यद् ध्यायन्त एव ते समाधिमगमन्। कदा जलप्रवाहस्तेषां मस्तकानामुपरि गत इति तेषां संज्ञा नासीत्। पुनः प्रवाहह्रासे सत्यपि तेषां ध्यानभङ्गो नाभवत्। त्रयोदश शतानां मध्ये शतसंख्यका मुण्डिनोऽजानन् वीरभद्रः किं वदिष्यतीति। गुरुवाक्यं न लङ्घनीयमिति ते व्यपगताः, तैर्वीर-भद्रेण साकं साक्षात्कारो न कृतः। मुण्डिनां शिष्टानि द्वादश शतानि तत्सकाशं गतानि। वीरभद्रो बभाषे—'मुण्डिनीनां त्रयोदश शतानि युष्मान् सेविष्यन्ते। युष्माभिरेता विवाह्याः।' तेऽवदन्—'यदाज्ञापयति भवान्। परन्तु शतमस्माकं क्व प्रचलितम्।' अमीषां द्वादशशतानां प्रत्येकेन सह सेवादास्यः स्यातुमार-भन्त। तदा तेषां तादृशं तेजो नासीत्, तथाविधायाः तपस्यायाश्च बलं नासीत्। स्त्रीसाहचर्यात् तादृग् बलं नातिष्ठत्। यतस्तत्सङ्गात् स्वाधीनता लुप्येत। (विजयं प्रति) यूयं स्वयमेव पश्यथ—परकर्मस्वीकारात् किंविधाः संवृत्ताः स्थ। पुनर्दृश्यताम्—एतावत्परीक्षोत्तीर्णाः कति इंराजीशिक्षिताः पण्डिताः प्रभूणां कार्यं

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्वीकृत्य तेषां 'बुटो'पानह आघातं दिवसस्य द्विर्भुञ्जते! अस्य हेतुस्तु केवलं 'कामिन्ये'व। परीणीय 'नदीयायाः हट्टं' च विधाय हट्टभङ्गे तु निरीहाः! अत एतावान् अपमानबोधः, दासत्वस्य च इयती यन्त्रणा!

"अथ यद्यपि सकृदपि ईदृशतीव्रवैराग्यात् परमीश्वरलाभः स्यात्, तर्हि स्त्रीषु आसक्तिर्न स्यात्। गृहे सतोऽपि स्त्रीषु ताभ्यो भयं न विद्यते। यदि कश्चित् चुम्बकप्रस्तरो बृहदाकारो 'वर्तते, अपरः कश्चित् क्षुद्रो भवति, तर्हि को नाम लौहं समाकर्षेत्? बृहन् खलु आकर्षेत्। ईश्वरस्तावद् बृहन् चुम्बकप्रस्तरः, कामिनी तु क्षुद्रः चुम्बकप्रस्तरः। कामिनी किं करिष्यति?"

कश्चिद् भक्तः—महाशय, किं स्त्रियं प्रति घृणा कर्तव्या?

श्रीरामकृष्णः—यस्तु ईश्वरलाभं कृतवान्, स कामिनीम् अन्यदृष्ट्या न पश्यति येन भयं स्यात्। स यथार्थमेव पश्यति यत् स्त्रियो मातुर्ब्रह्ममय्या अंशभूताः, मातृरूपेण च ताः सर्वाः पूजयति। (विजयं प्रति)—त्वमन्तराऽन्तरा आगच्छेः त्वां द्रष्टुं भृशं स्पृहयामि।

विजयः—ब्राह्मसमाजकार्यं करणीयम्, अतः सदा आगन्तुं न शक्नोमि। सति अवकाशे आगमिष्यामि।

श्रीरामकृष्णः—(विजयं प्रति)—दृश्यताम्, आचार्यकर्म नितरां कठिनम्। ईश्वरस्य साक्षादादेशं विना लोकशिक्षा दातुं न शक्या। यदि आदेशं विना उपदेशं ददासि लोका न श्रोष्यन्ति। तस्योपदेशस्य कापि शक्तिर्नास्ति। आदौ साधनेन अन्येन केनापि वा उपायेन ईश्वरो लब्धव्यः। तदादेशात् भाषणं प्रदेयम्। अमुष्मिन् देशे काचित् पुष्करिणी वर्तते हालदारपुष्करिणीति नाम। तत्तीरे प्रत्यहमेव लोका मलत्यागं कृतवन्तः। ये नाम प्रातस्तद्घट्टमागतास्ते सर्वे तानुद्दिश्य गालिं ददतो भृशं कोलाहलं कृतवन्तः। गाल्यादिभिः किमपि सिद्धं नाभवत्—परेद्यवि तीरदेशे पुरीषोत्सर्गस्य पुनरावृत्तिः! शेषतो राजकीय-भटः कश्चित् समागम्य 'अत्र केनापि ईदृशं कर्म कर्तुं न शक्येत; यदि कोऽपि कुर्यात् तर्हि तस्य दण्डः स्यादि'ति कृत्वा विज्ञप्तिमेकां प्रालम्बयत्। तस्या विज्ञप्तेः परं नान्यः कोऽपि तत्तीरे मलत्यागं कृतवान्।

"तस्य आदेशलाभात् परं यत्र कुत्रापि आचार्यभावो भाषणप्रदानञ्च सम्भवे-ताम्। यस्तस्यादेशं प्राप्नोति, स तत्सकाशादेव शक्तिं लभते। तदाचार्यस्य कठिनमेतत् कर्म कर्तुं प्रभवति।

"केनचित् बलवता भूस्वामिना सह काचित् साधारणी प्रजा उच्चन्याया-धिकरणे व्यवहारमाश्रितवती। तदा 'तस्याः प्रजायाः पश्चात् कश्चिद् बलवान् जनो वर्तत' इति लोका अबुध्यन्त। अपरो नु वा बलवान् कोऽपि भूस्वामी

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तस्य पश्चात् तिष्ठन् व्यवहारं चालयन्नास्ते। मानुषः सामान्यो जीवः, ईश्वरस्य साक्षात्शक्तिमनवाप्य आचार्यस्य ईदृशं कठिनं कर्म कर्तुं न ईष्टे।

विजयः—महाशय, ब्राह्मसमाजे ये नाम उपदेशादयो भवन्ति, तैः किं न लोकानां परित्राणं स्यात् ?

श्रीरामकृष्णः—मानुषाणां का शक्तिर्यत्, तेऽपरान् संसारबन्धनान्मोचयेयुः। यस्येयं भुवनमोहिनी माया, स एव केवलं मायाया मोचयितुं शक्नुयात्। सच्चिदानन्दगुरोरन्या काऽपि वै गतिर्नास्ति। ये नाम ईश्वरलाभं न कृतवन्तः, ये तस्यादेशं न प्राप्तवन्तः, ये च ईश्वरशक्त्या न शक्तिमन्तो जाताः, तेषां का नाम शक्तिर्यत् जीवानां भवबन्धनमोचनं कुर्युः।

"अहमेकदा पञ्चवटीसमीपं चलन् मलत्यागार्थं झाउतलमगच्छम्। श्रुतवानहम्—कश्चित् स्फीतोदरो भेको भृशं रौति स्म। सर्पधृतोऽयमिति मे बोधोऽभूत्। अनेकक्षणात् परं प्रत्यावर्तमानोऽहं तदाऽपि दृष्टवान्—स एव भेको विरौति स्म। वारमेकमुद्वीक्ष्य किं संवृत्तमिति अद्राक्षम्। मया आलोकितम्—कश्चिद् डुण्डुभो भेकममुं धृतवान्—मोक्तुमपि नाशक्त्—गेलितुमपि न; भेकस्य यन्त्रणा नापगच्छति। तदाऽहम् अभावयम्—अरे, यदि नाम कश्चिद् यथार्थसर्प इममधरिष्यत् तर्हि नादत्रयात् परं भेकोऽयं तूष्णीमभविष्यत्। कश्चिद् डुण्डुभ इमं धृतवान्, अतः सर्पस्यापि यन्त्रणा, भेकस्य चापि।

"यदि सद्गुरुर्लभ्येत तर्हि जीवस्याहङ्कारो आरावत्रयेण अपसरेत्। गुरौ असिद्धे सति गुरोरपि यन्त्रणा शिष्यस्य चापि। शिष्यस्याहङ्कारो नापगच्छेत्, संसारबन्धनं चापि न छिद्येत। असिद्धगुरुसन्निधौ शिष्यस्य मुक्तिर्न सम्पद्यते।"

विजयः—महाशय, कथं नाम वयमेतादृग्बद्धा आस्महे ? किमिति ईश्वरं साक्षात्कर्तुं न शक्नुमः ?

श्रीरामकृष्णः—जीवानामहङ्कार एव माया। अहंकारोऽयं सर्वमेव आवृतवान्। 'अहमर्थविनाशे स्यान्निवृत्तिः पांशुलावलेः।' यदीश्वरकृपया कस्यचिद् 'अहमकर्ते'ति बोधो जायेत, तर्हि जीवन्मुक्त एवासौ इति मन्तव्यम्। ततस्तस्य नास्ति किमपि भयम्।

"मायेयम् अहंकारो वा, मेघस्वरूपत्वेन गृह्येत। मेघमात्रसमावृतः सूर्यो द्रष्टुं न शक्यते। व्यपगते मेघे सूर्यो द्रष्टुं शक्यः। सकृद् यदि गुरुकृपया अहंबुद्धिः व्यपगच्छेत्तर्हि ईश्वरदर्शनं स्यात्।

"सार्धद्विहस्तमिते दूरस्थाने श्रीरामचन्द्रः, यः साक्षादीश्वरः, मध्ये च

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सीतारूपाया मायाया व्यवधानमस्तीति हेतोः लक्ष्मणरूपो जीवः तमीश्वरं द्रष्टुं न शशाक। दृश्यतामेतत्, एषोऽहम् गात्रमार्जन्यैकया आननसम्मुखे व्यवधानं साधयामि, नातःपरं मां द्रष्टुं शक्नुथ ; तथाप्यहम् ईदृक्समीपवर्ती। तथा हि, भगवान् सर्वेभ्यो नेदिष्ठः ; तथापि मायया, आवरणेन वा तं द्रष्टुं न शक्नुथ।

"जीवाः खलु सच्चिदानन्दस्वरूपाः ; किन्तु माययाऽनया अहंकारेण वा तेषां सर्व एव व्यापारा उपाधिभूता जाताः, अपि च ते आत्मस्वरूपं विस्मृतवन्तः।

"एकैकस्य तावदुपाधेराविर्भावे जीवस्वभावः परिवर्तते। यः कृष्णदशं वस्त्रं परिदधानो वर्तते, संद्रक्ष्यसि भोः, तस्य निधोः टप्पेति तानं समागच्छत्येव। किञ्च क्रीड़ापत्रं, भ्रमणकाले हस्ते काचिद् यष्टिः—सर्वाण्येतानि समाविर्भवन्ति।

"यदि रुग्णो लोकः 'बुटो'पानहौ परिधत्ते तर्हि सपद्येव शीस्शब्दं कर्तुं प्रक्रमते, सोपानेन आरोहणसमये च इउरोपीयवद् उत्प्लुत्यारोहति। मानुषस्य हस्ते काऽपि चेत् लेखनी वर्तेत तर्हि लेखन्या ईदृग् गुणो यत् किमपि पत्र-मुपलभ्यैव तस्योपरि फ्यास् फ्यासिति कृत्वा रेखाङ्कनं विदधाति।

"अर्थोऽपि तावत् कश्चिद् विलक्षण उपाधिः। अर्थसद्भावे एव मानुषः कश्चिदन्यविधो जायते, स एव मानुषो न वर्तते।

"अत्र कश्चिद् ब्राह्मणो गतागतं करोति स्म। असौ बाह्यतः सविशेषं विनयी आसीत्। कियद्दिनेभ्यः परं वयं कोन्नगरमगच्छाम। हृदयरामः अस्मत्सङ्गे आसीत्। नौकाया यावदहमवतरामि तावत् पश्यामि—ब्राह्मणोऽसौ गङ्गातीरे आसीनो वर्तते। मन्ये, वायुसेवनं कुर्वन्नासीत्। अस्मान् दृष्ट्वाऽसौ प्रावोचत्—'किमास्से भोः ठक्कुर!' तस्य कथायाः स्वरमाकर्ण्य अहं हृदयराममुक्तवान्—'रे हृदय, लोकोऽयम् अर्थवान् जातः। तस्मादेवंविधा कथा।' हृदयरामो हसितुं प्रावर्तत।

"कस्यचिद् भेकस्य रूप्यकमेकमासीत्। गर्ते एव तद्रूप्यकमवर्तत। कश्चन हस्ती तद्गर्तमतिक्रम्य गतः। तदा भेकोऽसौ बहिरागत्य भृशं क्रोधं विजृम्भयन् पदाघातभूमिकां प्रादर्शयत्। एतदपि प्राह—'तव नाम एतावान् शक्त्यतिरेको यत् मामुल्लङ्घ्य गन्तुमीहसे!' अर्थस्याहो एतावान् अहंकारः!

"ज्ञानलाभे सति अहंकारोऽपव्रजेत्। ज्ञानलाभे सम्पन्ने लोकः समाधिस्थो भवति। समाधिस्थे सति अहंकारो विलुप्यते। स ज्ञानलाभः अत्यन्तमेव कठिनः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"वेदेषु श्रूयते—मनसि सप्तमभूमिं संप्राप्ते समाधिर्भवति। समाधौ सत्येव अहंकारः अपगन्तुमर्हति। क्व मनसस्तावत् साधारणतो वासः? प्रथम-भूमित्रये। लिङ्गगुह्यनाभि—तदेव भूमित्रयम्। तदा मनस आसक्तिः केवलं संसारे—कामिनीकाञ्चनयोः। यदा हृदये मनसो वासो भवेत्, तदा ईश्वरीयं ज्योतिर्दृश्यते। स एव जनः ज्योतिर्दर्शनात् वदति—'किमिदम्! किमिदं नाम!' ततः कण्ठः। तत्र यदा मनसो वासः, तदा तस्य केवल-मीश्वरीयकथानां कथनार्थं श्रवणार्थञ्च ईच्छा जायते। ललाटे—भ्रूमध्ये—मनो यावत् समापतेत्, तावत् सच्चिदानन्दरूपदर्शनं स्यात्; तद्रूपस्य आलिङ्गनार्थं स्पर्शनार्थञ्च इच्छा प्रजायते, किन्तु तन्न सम्भाव्यते। लण्ठनस्यान्तः आलोकदर्शनं भवति, किन्तु तस्य स्पर्शो न भवेत्। स्पृशामि, स्पृशामीति बोधो जायते, परन्तु स्प्रष्टुं न पार्यते। सप्तमभूमौ मनसि समुपस्थिते अहंबोधो नावशिष्यते, समाधिश्च भवति।"

विजयः—तत्र समुपस्थितेः परं ब्रह्मज्ञानं भवति, किं पुनस्तदा मानुषेण समालोक्यते?

श्रीरामकृष्णः—सप्तमभूमौ मनसि समुपस्थिते किं भवतीति वाचा प्रकाशयितुं न शक्यते।

"अर्णवपोतः वारमेकं कृष्णवारि समापन्नः पुनर्नैव प्रत्यागच्छति। अर्णव-पोतस्य वार्ता न भूयः समुपलभ्यते।

"लवणमयी छविः समुद्रं परिमातुं गता। परं यावदसौ जलमवतीर्णा तावदेव विगलिता संवृत्ता। समुद्रस्य कियती नाम गभीरतेति का वार्ता विसृजेत्? या नाम विसृजेत्, सा खलु विलीना एव। सप्तमभूम्यां मनसो लयो भवेत्, समाधिश्च स्यात्। तद्दशायां कीदृशो बोधो जायते वाचाऽसौ प्रकाशयितुं न शक्यः।

"अहमिति यो बोधो मनुष्यं संसारिणं विदधाति, कामिनीकाञ्चनयोश्च आसक्तिं जनयति, अहमिति सोऽभिमानो मन्दः खलु। अहमित्यस्य अन्तरा-वस्थानात् जीवात्मनोर्भेदः संवृत्तः। जलस्योपरि एकस्मिन् दण्डे निक्षिप्ते जलस्य भागद्वयं दृश्यते। वस्तुतो जलमेकमभिन्नमेव। दण्डसद्भावाज् जलद्वय-प्रतीतिः।

"अहमित्येवासौ दण्डः। दण्डमपनय, तर्हि तदेकमभिन्नं जलमेव स्यास्य-तीति दिक्।

"को नाम मन्दः 'अहमि'ति बोधः? यः 'अहमि'ति बोधो वक्ति—अपि मां न वेत्ति? मम तावदेतावान् अर्थः, मत्तो धनवान् को नामास्ति? यदि चौरः दश रूप्यकाणि हरति, आदौ रूप्यकाणि तस्माद् प्रसह्य गृह्णाति;

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अतःपरं चौरं भृशं प्रहरति, ततोऽपि न मुञ्चति, प्रहरिण आहूय आरक्षकेभ्यः प्रयच्छति, किञ्च कारागारे निक्षिप्य कियत्कालं तत्र श्रमकर्माणि कारयति। मन्दः अहमिति बोधो ब्रूते—किं न ज्ञायते—मम दश रूप्यकाणि हृतवानसौ। अस्य तु एतावती महती स्पर्धा!"

विजयः—यदि अहंबोधानपगमात् संसारं प्रति आसक्तिश्चेद् नापव्रजेत्, समाधिश्च न स्यात्, तर्हि ब्रह्मज्ञानपथावलम्बनं हि वरं यथा समाधिराविर्भवेत्। अपि यदि भक्तियोगे अहंबोधस्तिष्ठति तर्हि ज्ञानयोग एव श्रेयान्।

श्रीरामकृष्णः—कति जनानां समाधिना अहंबोधः नूनमपैति, किन्तु प्रायेण न प्रैति। सहस्रशो विचारस्तावत् क्रियताम्, तथापि अहंबोधः प्रत्यावृत्यैव पुनरायातः! अश्वत्थवृक्षोऽद्य छिद्यताम्, परेद्यवि तु द्रक्ष्यसि—प्ररोह उद्गतः! एकान्ततो यदि अहंबोधः नापगच्छेत्, तर्हि स्थीयतां श्यालेन दासोऽहमि'तिरूपेण! 'हे ईश्वर, प्रभुस्त्वम्, दासोऽहम्'—एवंभावेन स्थीयताम्। 'दासोऽहम्, भक्तोऽहमि'ति अहंबोधे दोषो नास्ति। मिष्टभक्षणाद् अम्ल उत्पद्यते, किन्तु खण्डमोदकः तन्मिष्टद्रव्येषु न गण्यते।

"ज्ञानयोगस्तावत् सुकठिनः। देहात्मबुद्धौ नापगतायां ज्ञानं नोदेति। कलौ अन्नगताः प्राणाः, देहात्मबुद्धिः—अहंबुद्धिर्नापयाति। अतः कलियुगस्य कृते भक्तियोगः। भक्तिपथः सुगम एव। आन्तरिकतया व्याकुलः सन् तस्य नामगुणगानं कुरु। प्रार्थ्यताम्, भगवान् अवश्यमेव लभ्येत त्वया इत्यत्र नास्ति कोऽपि सन्देहः।

"यथा जलराशेरुपरि वंशदण्डस्थापनं विना काऽपि रेखा अङ्किता। एवमाभासते—जलस्य भागद्वयम्। अपि च रेखा चिरं न तिष्ठति। 'दासोऽहमि'ति बोधः, 'भक्तोऽहमि'ति बोधः, 'बालकोऽहमि'ति बोधश्च—एते वै अहंबोधस्य रेखामात्रम्।"

विजयः (श्रीरामकृष्णं प्रति)—भवान् मन्दाहंबोधस्य त्यागार्थमुपदिशति। किं दासोऽहमिति बोधे दोषो नास्ति?

श्रीरामकृष्णः—अथ किम्। दासोऽहमिति बोधः; अर्थात् अहमीश्वरस्य दासः, अहमीश्वरभक्त इत्यभिमानः। एतत्तु न दोषाय, परन्तु एतेन ईश्वरलाभो भवति।

विजयः—भवतु नाम, यस्य दासोऽहमिति भावस्तस्य कामक्रोधादयः कीदृशा भवेयः?

श्रीरामकृष्णः—यदि यथार्थो भावः स्यात्तर्हि कामक्रोधयोः केवलमाकारमात्रमवशिष्यते। ईश्वरलाभात् परं कस्यापि चेत् दासोऽहं, भक्तोऽहमिति वा

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बोधः स्यात्, तर्हि कस्यापि अनिष्टम ौ विधातुं न शक्नोति। स्पर्शमणिसंयोगादेव असिः सुवर्णत्वं प्राप्नोति ; अस्य असेराकारः तिष्ठति, परन्तु नासौ तदा कमपि हिनस्ति।

"नारिकेलतरोः शाखा शुष्का सती स्खलति चेत्, केवलं चिह्नमात्रमवशिष्यते। तेनैव चिह्नेन एवमनुमीयते—एकदा तत्रैव नारिकेलस्य शाखा आसीत्। एवं यस्य ईश्वरलाभः संवृत्तः, तस्याहङ्कारस्य चिह्नमात्रमवशिष्यते ; कामक्रोधयोः आकारमात्रं तिष्ठति, बालकस्यावस्था जायते। यथा बालकस्य सत्त्वरजस्तमसां गुणानां मध्ये कस्यापि गुणस्य बन्धो नास्ति। बालकस्य किमपि द्रव्यं प्रति आकर्षणानुभवे यावत्क्षणः—तत्त्यागेऽपि तावत-क्षणः। अर्धपणमूल्यया पुत्तलिकया वापि स प्रलोभितुं शक्यते। परन्तु आदौ बलवद्दृढ़तया स वदेत्तदा—'न हि, नाहं दास्यामि। पिता मे क्रीत्वा तु दत्तवान्।' बालकस्य सविधे पुनः सर्व एव समानाः—अयमुच्चः, असौ नीच इति बोधो नास्ति। तस्मात्तस्य जातिविचारोऽपि न विद्यते। मात्रा भणितम्—'असौ ते ज्यायान् भ्राता'—तस्मिन् सूत्रधरे सत्यपि, स बालकः आसीनस्तु एकस्मिन्नेव पात्रे अन्नग्रहणं कुर्यात्। बालकस्य घृणा नास्ति, नास्ति शुच्यशुचिबोधश्च। मलत्यागार्थं गतः स हस्तयोर्मृत्तिकां न व्यवहरति।

"केचन वा समाधेरनन्तरमपि 'भक्तोऽहं, दासोऽहमि'ति भावमवलम्ब्य तिष्ठन्ति। 'दासोऽहम्, प्रभुस्त्वमेव ; भक्तोऽहं, त्वमेव भगवान्' इत्यभिमानो भक्तस्यास्ति। ईश्वरलाभात् परमपि ईदृशोऽभिमानस्तिष्ठति। सर्व एवाहंभावो न निवर्तते। पुनरेतादृशम् अभिमानमभ्यस्यत एवेश्वरलाभो भवति। भक्तियोगोऽयमाख्यायते।

"भक्तिपथानुसरणादेव ब्रह्मज्ञानं सम्पद्यते। भगवान् सर्वशक्तिमान् ; यद्यसौ इच्छति तर्हि ब्रह्मज्ञानमपि प्रदातुं प्रभवति। भक्ताः प्रायशो ब्रह्मज्ञानं नेच्छन्ति। भक्तो 'दासोऽहं, भुस्त्वमेव, पुत्रोऽहं, त्वं च माते'ति अभिमानं रक्षितुमिच्छति।

विजयः—ये नाम वेदान्तविचारं कुर्वन्ति किं तेऽपि तमेवेश्वरं प्रतिपद्यन्ते ?

श्रीरामकृष्णः—वाढ़म्, विचारपथेनापि प्राप्यतेऽसौ। अयमेव ज्ञानयोग इत्युच्यते। विचारपथस्तु नितरां कठिनः। तुभ्यं तावत् सप्तभूमिकथां कथितवानस्मि। सप्तमभूमिं मनसि संप्राप्ते समाधिर्भवति। ब्रह्म सत्यं जगन्मिथ्येति बोधे यथार्थं सञ्जाते मनसो लयो भवति, समाधिश्च भवति। कलौ जीवा अन्नगतप्राणाः, ब्रह्म सत्यं जगन्मिथ्ये'ति, बोधः कथं स्यात् ? देहबुद्धौ अनपगतायां तादृग् बोधो न जायते। नाहं देहो न चापि मनः, नाहं चतुर्विंशतिस्तत्त्वानि,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अहं सुखदुःखयोरतीतः ; मम तावद्रोगः शोको जरा मृत्युर्वा कुतः ?—इत्येष बोधः कलौ सुदुष्करः। यावदेव विचारः क्रियतां नाम, कुतश्चिदपि देहात्मबुद्धिः समापतेत् । कश्चिदश्वत्थवृक्षः अद्यैव छिद्यताम्, आमूलं निपातितोऽयमिति त्वया भावितम् ; किन्तु परेद्यवि प्रातर्द्रष्टव्यम्—वृक्षस्य कश्चन प्ररोह उद्गतः ! न हि देहाभिमानो निवर्तते। अतः भक्तियोगः कलौ उत्तमः, सुसाध्यश्च।

"नातःपरं शर्करा भवितुमिच्छामि, शर्कराशनं मे रोचते। मम तावत् कदापि ईदृशी इच्छा न जायते यद्—'अहं ब्रह्मास्मी'ति ब्रवीमि। अहं वच्मि—'त्वं भगवान्, अहं ते दासः।' पञ्चमभूमिं षष्ठभूमिं चान्तरा नौविलास एव वरम्। षष्ठभूमिपारात् परं सप्तमभूमौ चिरमवस्थाने मे स्पृहा न प्रजायते। अहं तु तदीश्वरनामगुणगानं करिष्यामीति मे अभिलाषः। सेव्यसेवकभावो हि अत्युत्तमः। किञ्च दृश्यतां, गङ्गाया एव तरङ्गः, तरङ्गस्य गङ्गेति न कोऽपि आचष्टे। 'सोऽहमि'ति अभिमानो न साधुः। देहात्मबुद्धौ सत्यां यो नाम एतदभिमानं पुष्णाति तस्य विशेषेण हानिर्भवति ; नाग्रसरो भवितुमर्हति, क्रमेण चाधःपतनं स्यादेव। स परातिसन्धानं विदधाति, पुनरात्मातिसन्धानमपि, स्वावस्थाञ्च बोद्धुं न क्षमते।

"किन्तु यया कया वा भक्त्या ईश्वरो लब्धुं न शक्यते। असत्यां प्रेमभक्तौ ईश्वरलाभो न सिध्येत्। रागभक्तिः प्रेमभक्तेर्नामान्तरम्। प्रेमानुरागयोरसत्त्वात् भगवल्लाभो न सम्पद्यते। ईश्वरे प्रीतावसत्यां स पुनर्नैव लभ्यते।

"पुनरपरा काचिद् भक्तिर्वर्तते। सा वैधी भक्तिर्नाम। एतावज्जपः करणीयः, उपवासः कर्तव्यः, तीर्थं गन्तव्यम्, एतावद्भिरुपचारैः पूजा विधातव्या, इयत्संख्यकाश्च बलयः प्रदातव्याः—एतान्येव सर्वाणि वैधी भक्तिः। इमान्यखिलानि अनेकश आचरतः क्रमेण रागभक्तिरुदेति। किन्तु यावद् रागभक्तिर्न अभिजायते तावदीश्वरलाभो न स्यात्। तस्मिन्नीश्वरे प्रीतिरभिप्रेता। संसारबुद्धिः निःशेषं निवर्तेत, तस्मिंश्च सकलं मनो नियोक्तव्यम्, तर्हि एव स खलु लभ्यः।

"परन्तु कस्य कस्यापि रागभक्तिः स्वत एव भवति—स्वतःसिद्धा। आ बाल्यादस्त्येव। शैशवात् प्रभृति ईश्वरार्थं क्रोशन्ति ते—यथा प्रह्लादः। 'विधिवादीया भक्तिः', यथा—वायवे वीजनप्रयासः। वातार्थं हि व्यजनेन प्रयोजनं भवति। ईश्वरे प्रीतिरुत्पत्स्यते इति कृत्वा जपः तपः उपवासश्च। किन्तु यदि दक्षिणानिलः स्वत एव प्रवहेत्, तर्हि लोकः व्यजनं निक्षिपेत्। ईश्वरे स्वत एव प्रेमानुरागसम्भवात् जपादिकर्मणां त्यागो भवत्येव। हरिप्रेम्णा मत्ततया को नाम वैधकर्माचरेत् ?

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"यावत् तस्मिन्नीश्वरे प्रीतिर्न जायते, तावद् भक्तिरपक्वैव। तस्मिन् प्रीतावुत्पन्नायां तस्या भक्तेर्नाम पक्वा भक्तिः।

"यस्य नाम अपक्वा भक्तिर्वर्तते स ईश्वरीयं वचः, उपदेशं च मनसि धारयितुं न क्षमः। सम्पन्नायां तु पक्वभक्तौ धारयितुमर्हति। आलोक-लेख्यस्य काचश्चेत् मसीसंलिप्तः स्यात् तर्हि तस्मिन् यैव प्रतिच्छविः समापतेत् सा संतिष्ठत एव। परन्तु केवलस्य काचस्योपरि सहस्रशः प्रतिच्छवयः पतन्तु नाम, एकाऽपि नावतिष्ठते—अपसृतिमात्रमेव काचो यथापूर्वं तथाऽऽस्ते। ईश्वरे प्रीतौ असत्याम् उपदेशावधारणं न भवति।"

विजयः—महाशय, ईश्वरलाभाय तद्दर्शनाय भक्तिरेवालम्।

श्रीरामकृष्णः—वाढ़म्, भक्त्यैव तद्दर्शनं सम्भवति, परन्तु पक्वभक्त्या प्रेम-भक्त्या रागभक्त्या च प्रयोजनम्। तस्यामेव भक्त्यां समुपस्थितायां तमीश्वरं प्रति प्रीतिरागच्छति। यथा पुत्रस्य मातरि प्रीतिः, मातुश्च पुत्रे प्रीतिः, पत्न्याश्च स्वामिनि प्रीतिः।

"एतादृश्यां प्रीत्यां समुदितायाम् एतादृश्याञ्च रागभक्त्यां समागतायां स्त्रीपुत्रान्, आत्मीयकुटुम्बिनश्च प्रति स एव मायाकर्षो न तिष्ठति, अपि तु दयैव तिष्ठति; तदा संसारो विदेशवत् प्रतिभाति, किमपि कर्मभूमिमात्रमा-भाति। यथा पल्लीग्रामे गृहम्, परन्तु कलिकाता कर्मभूमिः। कलिकातायां कर्मकरणार्थमावासम् उपकल्प्य स्थातव्यम्। ईश्वरे प्रीतौ समागतायां संसारा-सक्तिः—विषयबुद्धिः साकल्येन गमिष्यत्येव।

"विषयबुद्धेर्लेशमात्रेऽपि सति तदीश्वरदर्शनं न भवेत्। यदि दीपशलाका सिक्ता भवेत्, तर्हि सहस्रशो घर्षणेनापि इयं कथमपि न प्रज्वलेत्; केवलं शलाकाराशेः क्षतिर्जायते। विषयासक्तं मनः सिक्ता दीपशलाका एव।

"श्रीमती राधिका यदाऽवदत्—"सर्वमहं कृष्णमयं पश्यामि' तदा सख्यो जगदुः—'क्व? वयं तु तं द्रष्टुं नार्हामः। किं प्रलपसि?' श्रीमत्या ऊचे—'सख्यः, अनुरागाञ्जनं चक्षुषि लिप्यताम्, तदाऽसौ द्रष्टुं शक्येत।' (विजयं प्रति) युष्माकं ब्राह्मसमाजसङ्गीते वर्तते—

"अनुरागमृते कृतैः प्रभो!
ननु यागैरथ होमतोऽपि वा।
किमयं विविधैश्च कर्मभिः
विदितस्त्वं भवसीह मानवैः॥

अयमनुरागः, इदं प्रेम, इयं च पक्वा भक्तिः, एषा प्रीतिश्च यदि सकृत् सम्पद्येरन्, तर्हि साकार-निराकारयोर्द्वयोः साक्षात्कारो भवेत्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विजयः—ईश्वरदर्शनं कथं सम्पद्येत ?

श्रीरामकृष्णः—चित्तशुद्धिं विना तन्न सम्भवेत्। कामिनीकाञ्चनाभ्यां मनो मलिनं जातम्, मनसि तावन्मलः पतित आस्ते। सूचिश्चेत् कर्दमावृता स्यात् नेयं चुम्बकेन कृष्यते। प्रक्षालितमृत्कर्दमा सती चुम्बकेन समाकृष्यते। मनोमलस्तथैव अश्रुभिः प्रक्षाल्येत। तदा ईश्वररूपश्चुम्बकप्रस्तरः मनोरूपां सूचिमाकर्षति। तदानीमेव समाधिर्भवति, ईश्वरदर्शनञ्च।

"किन्तु कामं सहस्रशः चेष्टचताम् ; तदीश्वरस्य कृपामन्तरेण न किमपि सिध्येत्। तस्य कृपायामसत्यां तद्दर्शनं न स्यात्। कृपा किमनायासेनैव सम्भवेत् ? सर्वत एव अहंकारस्त्याज्यः। 'अहं कर्ते'ति बोधे विद्यमाने ईश्वर-दर्शनं न भवेत्। भाण्डारे कश्चिद् वर्तते, अपरो यदि कोऽपि गृहस्वामिनं भणति—'भवान् स्वयमेव द्रव्यजातं बहिरानीय ददातु' तर्हि गृहस्वामी निगदति—'भाण्डारे कश्चित् तिष्ठत्येव, अहं गत्वा तावत् किं करोमि ?' यः स्वयं कर्तृत्वमापन्न आस्ते, तस्य हृदयमध्यम् ईश्वरोऽनायासं न समायाति।

"कृपायां सत्यामेव तद्दर्शनं जायते। स ज्ञानसूर्य एव। तस्यैकेनैव किरणेन जगतीह ज्ञानालोकः पातितः। तस्मादेव वयं परस्परं ज्ञातुं शक्नुमः, जगति कतिविधविद्यानामुपार्जनं च कुर्मः। शल्यचिकित्सको रात्रौ अन्धकारे लण्ठन-हस्तो विचरति। तन्मुखं कोऽपि विलोकितुं नार्हति। किन्तु अनेनालोकेनासौ सर्वेषां मुखानि द्रष्टुं प्रभवति। अपि चान्ये सर्वे परस्परमुखानि प्रेक्षितुं पारयन्ति। यदि कश्चन तं शल्यचिकित्सकं द्रष्टुमर्हति, तर्हि तस्मै प्रार्थना विधेया। एवमुच्येत च—भावमिश्र ! कृपया सकृदालोक आत्मनो मुखस्योपरि आवर्त्यताम्, वारमेकं पश्याम्यहम्।'

"ईश्वरः खल्वेवं प्रार्थयितव्यः—'प्रभो, कृपया ज्ञानालोकस्ते निजमुखस्योपरि सकृत् सम्पात्यताम्, त्वामहं पश्यामि।'

"गृहे यदि आलोको न ज्वलति, तर्हि तद् दारिद्र्यस्य चिह्नम्। अत एव हृदयमध्ये ज्ञानालोकः प्रज्वाल्यः। 'ज्ञानदीपैः समुद्भास्य ब्रह्ममयी प्रदृश्य-ताम्।"

विजयस्तावद् औषधं समानीतवान्। श्रीरामकृष्णस्य पुरतः सेविष्यते। औषधं जलेन सेवनीयम्। श्रीरामकृष्णो जलमानाययत् तस्मै च प्रादात्। स खलु अहेतुककृपासिन्धुः ; विजयः शकटभृतिं नौकाभृतिं चोपकल्प्य आगन्तुं न शक्नोति। श्रीरामकृष्णः अन्तराऽन्तरा लोकं प्रेषयति, आगमनार्थञ्च वारेऽ-स्मिन् बलरामं प्राहिणोत्। बलरामेणैव भृतिर्दातव्या। तेन साकं विजयः समायातः। सायंकाले विजयो नवकुमारो विजयस्य चान्ये सङ्गिनो बलरामस्य

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नौकायां पुनरारूढ़वन्तः। बलरामस्तान् बाग्बाजारघट्टं संप्रापयिष्यति। माष्टारोऽपि तामेव नौकामारोहत्।

नौका बाग्बाजारस्य अन्नपूर्णाघट्टे लग्नाऽभूत्। यदा ते बलरामस्य बाग्बाजारस्थ-वाटिकासमीपमागतास्तदा ज्योत्स्ना स्तोकमाविष्कृता। अद्य शुक्लपक्षीया चतुर्थी तिथिः। शिशिरकालः। किञ्चित् शीतमनुभूयते। भगवतः श्रीरामकृष्णस्य अमृतायमानान् उपदेशान् स्मारं स्मारं तस्यानन्दमूर्तिञ्च हृदयेषु धारयन्तो विजय-बलराम-माष्टारप्रभृतयो गृहेषु प्रत्यावर्तन्त।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

संक्षिप्तविषयविवृतिः

(दिवसानुक्रमिका)

२६, २७-२-८२
५, ६-३-८२] दक्षिणेश्वर-कालिकायतनम्। श्रीयुक्तमाष्टारस्य प्रथम-दर्शनम्। सन्ध्यासमयः। श्रीरामकृष्णस्य समाधिदशादर्शनम्। माष्टारेण सह नानाविषया कथा। नरेन्द्रादिभिः सह श्रीरामकृष्णस्यालापः, श्रीरामकृष्णस्य गानं, श्रीयुक्तनरेन्द्रस्य गानम्। माष्टार-नरेन्द्र-भवनाथ-रामलाल-प्रभृतयः उपस्थिताः। (पृः १)

११-३-८२ : कलिकाता, बलरामगृहम्। ८-९ घटिका रात्रिः। कीर्तनानन्दे राखालप्रभृतिभिर्भक्तैः सह श्रीरामकृष्णः। राखालस्य भावावस्था। राम-मनोमोहन-राखाल-नित्यगोपाल-माष्टारप्रभृतय उपस्थिताः। (पृः २३)

९-४-८२ : कलिकाता, प्राणकृष्णगृहम्, महोत्सवः। अपराह्णः, १-२-घटिका। प्राणकृष्णप्रभृतिभिः साधुसङ्गमहिमवर्णनं संसारदशायाञ्च ईश्वर-लाभकथा। राम-मनोमोहन-सुरेन्द्र-राखाल-बलराम-प्रभृतयः उपस्थिताः।

कमलकुटिरः, अपराह्णः, ५-घटिका। केशवादिभिर्भक्तैः सह गानं नृत्यञ्च। राम-मनोमोहन-सुरेन्द्र-प्रताप-त्रैलोक्य-प्रभृतयो भक्ता उपस्थिताः। (पृः २५)

५-८-८२ : कलिकाता, विद्यासागरगृहे श्रीरामकृष्णस्य शुभागमनम्। विद्यासागरेण आलपनम्। ज्ञान-भक्ति-कर्मयोगा आलोचिताः। श्रीराम-कृष्णगानं तस्य च समाधिः। बलरामस्यागमनं श्रीरामकृष्णदर्शनञ्च। भवनाथ-माष्टार-हाजराप्रभृतयः उपस्थिताः। (पृः ३७)

१३-८-८२ : दक्षिणेश्वर-कालिकायतनम्, अपराह्णः, ५-घटिका। केदार-गृहे उत्सवः। समाधितत्त्वं सर्वधर्मसमन्वयञ्च अधिकृत्य कथा। राम-मनोमोहन-सुरेन्द्र-राखाल-भवनाथ-केदार-प्रभृतयः उपस्थिताः। (पृः ५४)

२४-८-८२ : दक्षिणेश्वर-कालिकायतनम्। सायं सन्ध्या। मणिप्रभृतीन् प्रति उपदेशः। योगतत्त्वं महामायाञ्च अधिकृत्य कथा। राखाल-माष्टार-हाजराप्रभृतयः उपस्थिताः। (पृः ५५)

१६, १७-१०-८२ : दक्षिणेश्वर-कालिकायतनम्। नरेन्द्रादिभिः कथा। श्रीमुखकथित-चरितामृतम्—श्रीरामकृष्णेन प्रथमम् ईश्वरदर्शनम् भावावस्था च। नरेन्द्रादिभिः सह संकीर्तनानन्दो नृत्यञ्च। नरेन्द्रः अधुनाऽपि ब्राह्मसमाजे तिष्ठति। पञ्चवट्यां नरेन्द्रस्य ध्यानम्। नरेन्द्र-राखाल-माष्टार-हाजरा-स्तथा नरेन्द्रस्य कतिचित् ब्राह्मबान्धवाः कश्चित् नानकपन्थी साधुश्च उपस्थिताः। (पृः १६, ६९)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

२२-१०-८२ : दक्षिणेश्वर-कालिकायतनम् । अपराह्णः । मणिना बलरामेण च कथा । श्रीमुखकथितचरितामृतम्—श्रीवृन्दावनदर्शनम् । राखाल-हाजरा-बलराम-प्रभृतय उपस्थिताः । (पृः ७३)

२७-१०-८२ : केशवेन सह गङ्गावक्षसि राजपथे च श्रीरामकृष्णः । श्रीयुक्तकेशवसेनप्रभृतिभिः भक्तैः नौकाविहारः । तस्य समाधिः । ब्रह्म तथा शक्तिञ्च अधिकृत्य कथा । श्रीरामकृष्णस्य गानम् । केशव-नीलमाधव-कृष्णविहारि-नन्दलालमाष्टारादय उपस्थिताः । (पृः ७९)

२८-१०-८२ : सिँथिस्थिते ब्राह्मसमाजे श्रीरामकृष्णः । वेणी-पालस्य उद्यानवाटचाम् उत्सवः । शिवनाथादिब्राह्मभक्तास्तथा भवनाथ-माष्टार-वेणी-पालप्रभृतयः उपस्थिताः । (पृः ९७)

१५-११-८२ : कलिकाता ; गड़प्रान्तरस्थितः सार्कासरङ्गालयः । ३-४-घटिका । गृहस्थानामितरेषां कर्मिणाञ्च कठिनां समस्यामधिकृत्य कथा । राखाल-माष्टार-प्रभृतयः उपस्थिताः ।

अथ सन्ध्यासमये बलराममन्दिरे श्रीरामकृष्णः । जातिभेदस्य तथा अस्पृश्यतासमाधानप्रसङ्गः । गृहस्थानामृणविषयिणी आलोचना । (पृः १०९)

१६-११-८२ : कलिकाता-गराणहाटा-वैष्णवसाधु-आश्रमः । अपराह्णः । षड्भुज-महाप्रभु-दर्शनम् । माष्टारप्रभृतयः उपस्थिताः ।

राजमोहनस्य वाटी । सन्ध्याकालः । ब्रह्मोपासनादर्शनेच्छुः श्रीरामकृष्णः । ब्राह्मभक्त-सर्वत्याग-कथाप्रसङ्गः । नरेन्द्र-प्रिय-प्रभृतयः उपस्थिताः । (पृः ११३)

१९-११-८२ : मनोमोहनस्य ततः सुरेन्द्रस्य गृहम् । जगद्धात्रीपूजा-दिवसः । अकिञ्चनो भक्तस्तथा च भक्तिरेव सारभूतेति कथा । ईश्वरवादः (Theosophy)—अलौकिक-शक्तिश्चापि आलोचिता । सुरेन्द्र-मनोमोहनप्रभृतयः उपस्थिताः । (पृः ११३)

२६-११-८२ : कलिकाता-सिँदुरियापटी-ब्राह्मसमाज-सांवत्सरिकोत्सवः । अपराह्णः, ४-घटिका । प्रह्लादचरित्रकथा । ईश्वरदर्शनात् आदेशलाभादनन्तरमेव खलु लोकशिक्षा इत्युक्तं श्रीरामकृष्णेन । विजय-माष्टार-प्रेमचाँदबड़ाल-प्रभृतयः उपस्थिताः । (पृः ११५)

१४-१२-८२ : दक्षिणेश्वरकालिकायतनम् । विजयगोस्वामि-प्रभृतीन् प्रति उपदेशः । विजय-नवकुमार-माष्टार-प्रभृतयः उपस्थिताः । (पृः १२२)

डिसेम्बरः, '८२ : दक्षिणेश्वरकालिकायतनम् । सायं सन्ध्या । स्वतन्त्रेच्छा (free will)-सम्बन्धिनी कथा । तोतापुरीदेवस्य आत्महत्यासङ्कल्पः । किमीश्वरो निष्ठरः ? दयां मायां च अधिकृत्य उपदेशः । बाबुराम-रामदयाल-माष्टार-प्रभृतय उपस्थिताः । पराहे माड़वारभक्तैः सहालापः । (पृः ११७)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शब्दार्थ-सूचिका

(वर्णानुक्रमिका)

[अधस्तादादौ मूलशब्दाः, ततो यथावश्यकं वङ्गीयकथामृतगतशब्दा इंराजी-संस्कृतार्थाश्च]

अकृत्रिमम् साच्चा ; pure, unmixed.

अगस्त्ययात्रा भाद्रमासस्य प्रथमदिवसे अगस्त्यमुनिना यात्रा कृता, पुनस्तेन न प्रत्यावृत्तम् इति प्रसिद्धया मासस्य प्रथमदिवसीयाया यात्राया निषिद्धत्व-बोधनाय इदमभिधानम् ।

अद्वैतवादः A School of Monism ; येन दार्शनिकमतेन जीव-ब्रह्मणोरैक्यं प्रतिपादितम्, वैदान्तिकप्रवरः आचार्यशङ्करो मतस्यास्य मुख्यप्रवक्ता।

अध्यात्मरामायणम् ग्रन्थोऽयं रामायणवर्णितवृत्तान्तानामाध्यात्मिकव्याख्यायुक्तः।

अन्तरङ्गः An intimate companion ; अवतारपुरुषस्य नेदिष्ठलीला-सहचरः ।

अन्नपूर्णाघट्टः बाग्‌बाजारगत एतदभिहितो गङ्गाघट्टः ।

अर्जुनः महाभारतोक्तो महावीरः तृतीयपाण्डवः ।

अर्थः टाका ; money, meaning ; रूप्यकादि-मुद्रा, धनम्, तात्पर्यम् ।

अविद्याशक्तिः यया शक्त्या ईश्वरतो वैमुख्यं जायते ; लोकश्चान्धं तमः प्रविशति।

अव्यूढ़वसनम् आइबुड़ो भातेर कापड़ ; परिणयात् पूर्वं कन्याया अव्यूढ़त्व-विसर्जनार्थं प्रदेयं वस्त्रम् ।

अहम् आमि ; ego, अहमिति भावः ।

अहिफेनः आफिम ; opium, किञ्चित् मादकद्रव्यम् ।

आगमः तन्त्रविशेषः। शिवोऽत्र वक्ता ।

आणकः आना ; मुद्राविशेषः।

आण्डीरः आण्डिल ; inflated ; सम्पद्भिः स्फीतः ।

आद्यशक्तिः सृष्टेरादिभूता महाकाली ।

आमहार्स्ट्‌स्ट्रीट् कलिकातानगर्याः किञ्चित् विशिष्टं वर्त्म ।

आयुर्वेदः प्राचीनभारतीयभैषज्यविद्या ; अयमुपवेदोऽपि कथ्यते ।

आरक्षकः पुलिश ; police; रक्षाकार्ये नियुक्तो भटविशेषः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आरोहिका बिबि ; 'सार्कास्'-इति रङ्गस्थले काचित् अश्वारोहिका ।
आल्ला God ; ईश्लामधर्मे ईश्वरस्याभिधानमेतत् ।
आसन्दी Chair ; उच्चासन-विशेषः ।
आह्वानम्, आहूयते &c. डाका ; invoking, भक्तिपूर्वकम् आवाहनम् ।
इट्-मिट् इंराजीध्वनेरनुकारः ।
इण्डियाक्लावः कलिकातास्थ-इउरोपीयवासिनां कश्चित् संघः ।
इतिहासशास्त्रम् History ; इतिवृत्तम् ।
इंराजी The English language ; इंल्याण्डवासिनां भाषा ।
इंल्याण्ड् England ; इउरोपमहादेशात् पश्चिमभागस्थः राज्यविशेषः ।
उइलसनः 'सारकास्' इति मल्लक्रीड़ाधिकारी कश्चिद् इउरोपवासी ।
उत्कलः ओड़िशाप्रदेशस्य नामान्तरम् ।
उत्तरीयम् वनात ; a wrapper.
उदंजनम् जाला ; a jar ; स्थूलोदर-बृहत्-मृत्पात्रविशेषः ।
उपवीतम् Sacred thread ; द्विजधार्यं यज्ञसूत्रम् ।
उपाधिः Limitation ; देहादयः, यैः परस्परं भेदो निर्णीयते ।
एकोया Aqua, water, जलार्थबोधको ल्याटिनशब्दः ।
एड़ियादहम् दक्षिणेश्वरसमीपवर्ति स्थानमेतत् ।
ॐ प्रणवः, अखिलमन्त्र्याद्यवीजं ब्रह्मप्रतीकम् ।
और्णपटीयम् Flannel (clothing) ; किञ्चित् शीतवस्त्रम् ।
कञ्चुकोत्तरीये जामाचादर ; shirt and wrapper.
कटुमत्स्यव्यञ्जनम् माछ-चड़्चड़ि ; pickled fish.
कथा Words, speaking, story ; वचनम्, आख्यायिकाभेदः ।
कमलकुटीरम् 'Lily Cottage' ; ब्राह्मनेतुः केशवचन्द्रस्य गृहनाम ।
कयलाघाटा कलिकाताया दक्षिणपश्चिमदिग्भागीयं गंगातीरवर्ति स्थानम् ।
करतालिका करतालि ; cymbal ; वाद्यविशेषः ।
कर्मयोगः चित्तशुद्धयर्थं निष्कामं शास्त्रोक्तं कर्मानुष्ठानम् ।
कर्मावकाशः छुटि ; holiday.
कलायः A leguminous pulse.
कलिः पुराणोक्त-चतुर्थयुगः ।
कलिकाता Calcutta ; वङ्गदेशस्थित-प्रख्यात-नगरी तदानीन्तनभारतराजधानी ।
कलुटोला मध्यकलिकातावर्ती स्थानविशेषः ।
कविराजः An Āyurvedic physician ; आयुर्वेदीय-चिकित्सकः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कक्षभूमिः मेझे ; floor.

क्षीरिका शशा ; cucumber.

क्षौमरक्तवासः सालु ; red-coloured cloth.

काचभाजनम् ग्लास ; tumbler.

काचाधारः Glass-case.

काचावरणम् सारसी ; glass-shutters.

काञ्ची दक्षिणदेशीयः तीर्थविशेषः ।

कानु श्रीकृष्णनामान्तरम् ।

काप्तेनः कर्णेल-विश्वनाथ-उपाध्यायः, नेपालराजस्य कलिकातास्थप्रतिनिधिरासीत्, श्रीरामकृष्णभक्तोऽसौ काप्तेन इति अभिहितः ।

कामारपुकुरम् पश्चिमवङ्गीयहुगलीमण्डलान्तर्वर्ती ग्रामविशेषः ।

कामिनीकाञ्चने Lust and greed, lit. woman and gold ; कामलोभौ ।

कार्तिकेयः शिवतनयो देवसेनापतिः ।

कालिकायतनम् कालीबाड़ी ; दक्षिणेश्वरस्थितं कालीदेव्या मन्दिरचत्वरम् ।

कालिय-(दमनघट्टः) यमुनाम्भसि श्रीकृष्णेन कालियेति सर्पो निगृहीतो बभूव इति पुराणवार्ता, तत्स्मारको घट्टविशेषः ।

कालीकृष्ण (-भट्टाचार्यः) असौ परवर्तिनि काले विद्यासागर (-महोदय-प्रतिष्ठापिपे) महाविद्यालये संस्कृतस्य प्रवीण-प्राध्यापको (Senior Professor of Sanskrit) बभूव ।

कालीघट्टः दक्षिणकलिकातान्तर्गतं श्रीश्रीकालिकामन्दिरस्थलम् ।

काष्ठासनम् Bench ; दीर्घोच्चविष्टरः ।

कांस्यम् काँसर ; gong ; वाद्यविशेषः ।

किञ्चिलुकः केँचो ; earth-worm ; मृत्स्थित-कृमिजातीय-सरीसृपकीटविशेषः

कुइनिन् म्यालेरियारोगप्रतिषेधको भेषजविशेषः ।

कुञ्चिका चाबि ; key.

कुटिला श्रीराधिकाया ननान्दा ।

कुड़ुपम् बोताम ; button.

कुलकुण्डलिनी कुलाचारिणामुपास्यः तन्त्रशास्त्रोक्तो मूलाधारस्थः सर्पाकृतिः शक्तिविशेषः ।

कुस्थानम् A house of ill fame ; दुश्चरित्र-गम्यस्थलम् ।

कूटलेखः जाल ; forgery.

(श्री)कृष्णः महाभारतपुराणादिवर्णितः परमपुरुषो भगवन्नारायणः ।

कृष्णकिशोरः कश्चित् श्रीरामकृष्णानुरागी वैष्णवभक्तः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कृष्णवारि कालापानि ; Andaman Islands on the Indian Ocean ; भारतमहासागरान्तर्गतम् आन्दामाननामक-द्वीपपुञ्जम्, तत्र इंरेजराजत्वकाले राजद्रोहाद्यभियुक्ताः प्रेरिता आसन्।

केदार (-चट्टोपाध्यायः) श्रीरामकृष्णस्य अन्यतमो गृही भक्तः।

केन्द्रक्रीड़कः बुड़ि ; the principal player, central figure in a running game ; धावनादिक्रीड़ासु ध्रुवो स्थाणुवत् क्रीड़कः।

केशव (चन्द्र-सेनः) प्रख्यातो 'ब्राह्मसमाज'-नेता (१८३८-१८८४ खृः)।

कोजागरी आश्विन-पूर्णिमा-तिथि-सम्बन्धिनी।

कोठारम् ओड़िशाराज्यान्तर्गतं स्थानमेकम्।

कोन्नगरम् कलिकाताया अदूरवर्ती हुगलिमण्डलस्थ उपनगरविशेषः।

कोम्पानीबागानम् कलिकातायाः पश्चिमदिग्वर्ती वाणिज्यबहुल-स्थानविशेषः।

कोष्ठिका कुठि ; bungalow ; राजपुरुषाणां वासभवनम्।

क्रमेलकः उट ; camel.

क्रीड़ापत्रम् तास ; card ; क्रीड़ार्थं चित्रितकर्गजखण्डविशेषः।

क्याबिन् Cabin ; जलयानान्तर्वर्ती कश्चित् क्षुद्रप्रकोष्ठः।

खट्वा तक्तपोश ; bed-stead.

खड़िका खड़ि ; chalk ; रञ्जनद्रव्यविशेषः।

खण्डमोदकः मिछरि ; sugar-candy ; पिण्डीभूतः स्फटिकवत् शर्करा विशेषः।

खृष्टाब्दः Anno Domini ; यीशुखृष्टस्य जन्मतः प्रचलितः अब्दः।

खृष्टीयः खृष्टान ; the Christian ; खृष्टधर्मावलम्बी।

गङ्गामायी (-माता) श्रीरामकृष्णसङ्घन्या वृन्दावनवासिनी काचित् साधिका।

गञ्जिका गाँजा ; hemp.

गड् God ; ईश्वरस्याभिधानमेतत्।

गणेशः करिवदनः सिद्धिदाता देवविशेषः।

गया विहारराज्यान्तर्गतं तीर्थस्थानम्, अत्र उपरतसद्गत्यर्थं गदाधर-पादपद्मयोः पिण्डान्नं प्रदीयते।

गलितहस्तः यदा स्वत एव हस्तात् तर्पणवारि स्खलितं भवति तदवस्थो जनो गलितहस्त इति व्यपदिश्यते।

गाजीपुरम् उत्तरभारतीयं स्थानमेकम्।

गाणनिकपदम् The post of an accountant.

गात्रमार्जनी गामछा ; napkin, towel.

गायत्री अष्टाक्षरत्रिपाद-वैदिकमन्त्रविशेषः उपनीतेन च सन्ध्याह्निकप्रभृतिषु जप्यः।

गिरीन्द्रः कलिकातास्थ-पाथुरियाघाटा-पल्लीनिवासी श्रीरामकृष्णभक्तः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गिर्जा Church ; खृष्टधर्मावलम्बिनां धर्ममन्दिरं भजनालयो वा।
गीता श्रीमद्भगवद्गीता, महाभारत-भीष्म-पर्वान्तर्गता, हिन्दुजनमहाधर्मग्रन्थः।
गृहालिका टिकटिकि ; lizard.
गोपः (-पी) Cowherd ; वृन्दावनादिस्थाननिवासि-गोपालकजातिविशेषः।
गोलालुः Potato.
गोवर्धनः वर्षासु वर्षणपीड़ितान् व्रजवासिनो रक्षितुं श्रीकृष्ण एकदा व्रजसन्निहितं गिरिगोवर्धनमुच्चिक्षेप। स एव गिरिः।
घटिका घड़ि ; watch ; समयनिरूपकयन्त्रविशेषः।
घटी Jug ; क्षुद्रो घटः।
घुटिका घुँटी ; die ; अक्षक्रीड़ासाधनं किञ्चिद् वस्तु।
चणकः छोला ; chick-pea.
चण्डालः नीचजातीयो हिन्दुसम्प्रदायविशेषः।
चत्वरम् चाँदनि ; an open portico ; मण्डपविशेषः।
चरणक्रमपातः Footpath.
चरणवीथिः Footpath.
चर्मचटिका चामचिके ; vampire.
चर्मपादुका चटिजुता ; slipper.
चिपिटकः चिँड़े ; flattened rice.
चीनाबाजारम् पश्चिमकलिकातान्तर्वर्ती पल्लीविशेषः।
(श्री) चैतन्यदेवः वङ्गदेशे नवद्वीप-जनपदे १४८५-खृष्टाब्दे जातो महापुरुषः, हरिनामसंकीर्तनादिना भक्तिपथाश्रय एव भगवल्लाभस्य प्रकृष्टतम उपाय इति तस्योपदेशः ; गौर-निमाइ-गौराङ्ग-नामपरिचितोऽसौ।
चोष्यम् चुषि ; a sucking toy.
जटिला श्रीराधिकायाः श्वश्रूमाता।
जनकः मिथिलाधिपतिः राजर्षिः श्रीरामचन्द्रश्वशुरश्च।
जयमुखोपाध्यायः वराहनगरनिवासी श्रीरामकृष्णभक्तः, भूस्वामी।
जलयोगः Tiffin ; जलमिष्टान्नादि-सहित-लघुभोजनम्।
जोसेफ् कुक् Joseph Cook ; कश्चिद् आमेरिकावासी धर्मयाजकः।
ज्ञानयोगः नित्यानित्यवस्तुविवेकपुरःसरं परमात्मसाक्षात्कार-साधनम्।
झाउ (सं झावुक ?) सूचवत्पत्रयुक्त-वृक्षविशेषः।
ठनठनिया मध्यकलिकातान्तर्वर्ती पल्लीविशेषः।
डि-गुप्तः ज्वरनिवारकेण औषधेन संश्लिष्टं नामेदम्।
ढाका (नगरी) वर्तमान-बांलादेश-राजधानी।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तन्त्रम् शिवशक्तिसम्बन्धीय-साधनप्रणालीप्रधानः शास्त्रविशेषः ।
तापि ता देओया ; to hatch.
ताम्रकूटम् तामाक ; tobacco ; तमाखुः ।
तारा दशमहाविद्यानामन्यतमा ।
तालयन्त्रम् ताला ; lock.
तुँहु You ; त्वम् ।
तुलादण्डकम् निक्ति ; goldsmith's balance,
तूलमार्जकः धुनुरी ; a cotton-cleaner.
तैलचित्रम् Oil painting.
त्रैलोक्य(-सान्यालः) विख्यात-ब्राह्मगायकः, चिरञ्जीवशर्मेतिच्छद्मनामपरिचितः ।
दक्षिणदेशः South India.
दक्षिणेश्वरः कलिकाता-नगर्या उत्तरतो भागीरथीतीरस्थं जनपदम् ।
दर्शनम् Philosophy ; ज्ञानशास्त्रम् ; भारतीयानां सांख्यादिषड्दर्शनानि ।
दामोदरः वङ्गीय-नदविशेषः ।
दीपशलाका देशलाइ ; match ; आग्नेय-चूर्णोपरि घर्षणेन अग्न्युत्पादकः क्षुद्रकाष्ठ-खण्डविशेषः ।
दीपाधारः पिलसुज ; a lamp-stand.
दीर्घिका दीघि ; a large oblong pond.
दुर्गा महाशक्तिरूपा जगत्प्रसूतिर्देवी शिवगेहिनी च ।
दुलाली श्रीराधिका ।
देवतासौधः ठाकुरदालान ; a mansion for the household Deity.
देवीमाहात्म्यम् मार्कण्डेयपुराणान्तर्गत-श्रीश्रीचण्डीया नामान्तरं सप्तशतीति च ।
दोलयात्रा फाल्गुनपूर्णिमायां श्रीकृष्णस्य हिन्दोलोत्सवः, होलीति भाषा ।
धूनकम् धुना ; incense ; गन्धाढ्यो वनस्पतिरसः ।
नरेन्द्र (-नाथदत्तः) श्रीरामकृष्णदेवस्य शिष्यः ; परमेवासौ 'स्वामि-विवेकानन्द' इति नाम्ना जगति प्रसिद्धिमभजत् ।
नर्मालापादिकम् फच्किमि; cracking jokes ; लघुपरिहासादिभिः वाचालत्वम् ।
नर्मवाचालता इयार्कि ; light-hearted friendly talks.
नस्क(-क्रीड़ा) भारतीयपत्रक्रीड़ाविशेषः । अस्यां क्रीड़केन सप्तदशलभ्यानाम् (points) अधः स्थातव्यम् । अत ऊर्ध्वं गतस्यास्य निःसारणम् ।
नाटमन्दिरम् देवतामन्दिरपुरतो गृहविशेषः विग्रहप्रीत्यर्थं नृत्यगीतस्थानञ्च ।
नाटागड़म् दक्षिणेश्वरादुत्तरतः स्थानविशेषः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नानकः शिखधर्मप्रतिष्ठाता, धर्मस्यास्य दशगुरूणां प्रथमः पञ्जावप्रदेशे असौ जातः। (१४६९-१५३८ खृः)

नारदः पुराणवर्णितः परमभागवतो देवर्षिः।

नारिकेलफलम् डाब ; green coco-nut.

निः The last note of the Indian gamut ; भारतीय-स्वरग्रामगतः अन्तिम-स्वरः। निषादः इत्यस्य प्रथमाक्षरः।

निकषा रावणादीनां जननी।

निगमः तन्त्रशास्त्रविशेषः। दुर्गात्र वक्त्री।

निचोलः जामा ; shirt ; किञ्चिद् गात्रावरणम्।

नित्यगोपालः नित्यगोपाल-वसुः, ज्ञानानन्द-अवधूत इति अस्य सन्न्यासनाम।

नित्यसेवा देवतानां नैवेद्यादिभिः प्रात्यहिकमुपासनम्।

नित्यानन्दः हरिनामप्रचारकः श्रीचैतन्यसहचरः।

निधु-टप्पा निधुनामकस्य कस्यचिद् गायकस्य टप्पेति सङ्गीतस्वरः।

निधुवनम् वृन्दावनस्थितं प्रसिद्धं वनम्।

निर्दर्शनी Ticket ; प्रदर्शनीयः पत्रविशेषः।

न्याय-(तर्क) शास्त्रम् Logic ; गौतम-कणादादिप्रवर्तितं तर्कशास्त्रम्।

पओहारीबाबा उत्तरप्रदेशान्तर्गत-गाजीपुरस्य महात्मा। पूर्वाश्रमे हरभजनदास इति अभिहित आसीत्। जौनपुरमण्डले जन्म जग्राह। दीर्घकालं बद्धार्गले गृहे उवास, किमपि न बुभुजे। अतोऽयं पओहारी (पवनाहारी) बाबेति परिचितः। केशवचन्द्रसेनः, स्वामी विवेकानन्दश्च तस्य दर्शनं चक्रतुः। अन्ते चासौ अग्नौ आत्माहुतिं प्रादात्। (१८४०-१८९८ खृः)

पञ्चवटी दक्षिणेश्वरमन्दिरवाटिकाया उत्तरदिग्भागीयं वटादिपञ्चतरुसमन्वितं श्रीरामकृष्णस्य साधनक्षेत्रम्।

पट्टकीटः गुटीपोका ; silk worm.

पणः Paisa ; 'पैसा' इति मुद्राविशेषः।

परमहंसः सन्न्यासिषु आध्यात्मिकज्ञानभूयिष्ठः।

परमहंस(-देवः) श्रीरामकृष्णस्य अपराभिधानम्।

परिवारः Family, wife.

(मत्स्य-) पलान्नम् (माछ-) पोलोया ; pilau ; मत्स्य-मांसघृतादियोगेन पक्वमन्नम्

पल्ली पाड़ा ; the neighbourhood ; पद्रः।

पाइकपाड़ा कलिकाताया उत्तरपूर्वदिग्भागीया काचित् पल्ली।

पादत्राणम् मोजा ; stocking.

पानि Water ; जलार्थबोधको हिन्दिशब्दः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पियानो Piano ; 'हार्मोनियम्'-जातीयो बृहदाकार-वाद्ययन्त्रविशेषः।
पीतरोगः न्याबा ; jaundice ; रोगेणानेन सर्ववस्तूनि हरिद्रावर्णानि दृश्यन्ते।
पुराणम् सर्ग-प्रतिसर्ग-वंश-मन्वन्तर-वंशानुचरित-लक्षणाक्रान्तं शास्त्रम्।
पुरी उड़िष्याराज्यान्तर्गतं तीर्थस्थानम्, भारतस्य चतुर्धाम्नाम् अन्यतमम्, अपराणि त्रीणि धामानि यथा, द्वारका, केदारनाथः, रामेश्वरश्चेति। शङ्कराचार्यमतावलम्बि-सन्न्यासिनां दशसम्प्रदायानाम् अन्यतमनाम।
पुरुषः सांख्यमतानुसारेण प्रकृतिव्यतिरिक्तः साक्षी चैतन्यमयः निष्क्रियः तत्त्वविशेषः।
पुलि A kind of sweetened cake ; सुमिष्टः अपूपभेदः।
पूगकर्तरिका जाँति ; a nut-cracker.
पेषणयन्त्रम् जाँता ; grind stone.
पोट्टलिः पुँटलि ; bundle.
पौत्तलिकता Idolatry ; ईश्वर-प्रतिमा-पूजनं यन्निराकारवादिहेयम्।
प्रकृतिः सांख्यमतानुसारेण जड़ः त्रिगुणात्मकः सृष्टेरादिभूतः तत्त्वविशेषः।
प्रताप (-हाजरा) असौ श्रीरामकृष्णभक्तः कियत्कालं दक्षिणेश्वरे अवसत्।
प्रतिबोधविदितम् बोधे बोध हओया ; realization in the heart of hearts.
प्रबोधचन्द्रोदयम् कृष्णमिश्रविरचितस्य संस्कृतनाटकस्य नाम।
प्रभासः कच्छान्तर्गतः तीर्थविशेषः ; तत्र भगवान् श्रीकृष्णः स्वदेहमुत्ससर्ज।
प्रयागः उत्तरप्रदेशस्थः गङ्गा-यमुना-सरस्वती-संगमात्मकस्तीर्थविशेषः।
प्ररोहः फेँकड़ि ; a new twig.
प्रलोभनाहार्यम् टोप् ; bait ; मत्स्यप्रलोभनार्थं बड़िशविद्धं खाद्यम्।
प्रस्तरावलीढ़ं (प्राङ्गणम्) पाका (उठान) ; stone-built (court-yard).
प्राणकृष्ण (-मुखोपाध्यायः) कलिकातास्थश्यामपुकुरनिवासी श्रीरामकृष्णभक्तः। म्याकेञ्जिलायान् इति कार्यालयस्य कश्चिद् विभागाध्यक्ष आसीत्।
प्रावारः लेप ; quilt.
प्रावारकः Wrapper.
फलकम् ताक ; shelf ; table.
फल्गुनदी गयास्थोऽन्तःसलिलो नदीविशेषः।
फुट्-फाट् इंराजीध्वनेरनुकारः।
फेब्रुयारी February ; खृष्टाब्दस्य द्वितीयो मासः।
बलराम (-वसुः) श्रीरामकृष्णस्य गृही शिष्यः (१८४२-१८९० खृः)।
बहुरूपः Chameleon ; कृकलासः, सरटः।
बाँधाघाटम् कलिकातासमीपवर्ति-हाओड़ानगर्याः गंगातटगतस्थानविशेषः।
बाग्बाजारम् उत्तरकलिकातागतं स्थानमेकम्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बादुड़बागानम् मध्यकलिकातान्तर्वर्ती पल्लीविशेषः।

बाबा Father ; पित्रर्थबोधको वङ्गीयशब्दः।

बाबुरामः पूर्वाश्रमे बाबुरामघोषः, श्रीरामकृष्णस्यान्यतमः सन्न्यासी शिष्यः, स्वामी प्रेमानन्द इति अभिहितः। श्रीरामकृष्णस्तम् ईश्वरकोटीनामन्यतम इति मेने। बाबुरामस्य अस्थि अपि शुद्धमित्यपि उवाच। (१८६१-१९१८ खृः)

बार्ड्साइ A cigarette named Bird's Eye ; एतदभिहितं तमाखु-जातीय-धूम्रपानम्।

बालिशम् Pillow ; शय्यायां व्यवहृतः कोमलो मस्तकाधारः।

बाष्पीयजलयानम् Steamer.

बाष्पीयदीपः Gas light.

बुटम् Boot, उपानद्विशेषः।

बुसम् भुषि ; bran ; गवादीनां खाद्यम्।

बृहद्वंश्यादिवाद्यसम्भारध्वनिः नहबत शब्द ; song from music tower.

बेणीमाधवपालः कश्चिद् ब्राह्मभक्तः, श्रीरामकृष्णः कलिकातान्तर्वर्ति-सिँतिनामिकां तस्योद्यानवाटिकां ब्राह्मसमाजस्य षाण्मासिकाधिवेशने बहुश आजगाम।

बेलघरिया दक्षिणेश्वरादुत्तरदिग्भागीयः स्थानविशेषः।

बैदलः डाल ; pulse.

बोधेन बोधः Intuitive realization in the heart of hearts.

ब्रह्मचारी ब्रह्मचर्यपालनकारी ; ब्रह्मचर्यं नाम वेदादिशास्त्रानुशीलनं तथा मैथुनादिभोगवासनावर्जितं पवित्रं संयतं जीवनयापनम्।

ब्रह्मा सृष्टिकर्ता चतुर्मुखो देवः।

(साधारण-) ब्राह्मसमाजः राममोहनरायमहोदयेन प्रतिष्ठापिता धर्मीय-संस्था।

ब्राह्मसमाजीयः ब्रह्मज्ञानी ; ब्राह्मधर्मावलम्बी।

भक्तिः ईश्वरे परानुरक्तिः। पक्व—परिणता, विपाकप्राप्ता ; प्रेम—परम-प्रीत्युपलक्षिता ; राग—आसङ्गोपलक्षिता ; वैध(ी)—विधिसम्मता, अनुष्ठान-विषयिणी ; शुद्ध(ा)—परमपूता, फलाभिसन्धानरहिता।

भक्तियोगः जपध्याननामकीर्तनादिपुरःसरमीश्वरे एकान्तशरणागतिरूपं साधनम्

भटः चापरासी ; an orderly.

भद्रमुखः बाबु ; a well-to-do gentleman, also equivalent to Mr. or Esq. ; समाजे प्रतिष्ठामापन्नो विशिष्टो जनः।

भद्रविलासी बाबु ; a gentleman.

भर्जिततण्डुलः मुड़ि ; fried rice.

भवतारिणी भगवती कालिकादेवी।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भवनाथ-(चट्टोपाध्यायः) श्रीरामकृष्णस्य कश्चिद् गृही भक्तः।
भवानीपुरम् दक्षिणकलिकातान्तर्वर्ती स्थानविशेषः।
भागवतम् अष्टादशपुराणानां श्रीकृष्णलीलाख्यायकमन्यतमं पुराणम्।
भाजनम् वासन ; utensil.
भाद्रोत्सवः ब्राह्मसमाजीयानां भाद्रे मासि सम्पाद्य उत्सवः।
भावः Ecstasy ; अनुभूतिगाम्भीर्याद् जातो भक्त्यावेशः।
भीतभीतः 'जुजु' इति कल्पितपिशाचयोनिभीत इति बोध्यम्।
भीष्मदेवः महाभारतोक्तः शान्तनु-नन्दनः, दृढ़प्रतिज्ञो महावीरो ज्ञानिवर्यश्चिर-कुमारश्चासीत्।
भूम्यधिकारी जमिदार ; landlord.
भृङ्गारः गाड़ु ; a pitcher of a particular shape ; किञ्चिज्जलपात्रम्।
मङ्गलारात्रिकम् देवतानां प्रातर्नीराजनम्।
मणिः माष्टारमहाशयस्य नामान्तरम्। 'श्रीम'-चरितं द्रष्टव्यम्।
मण्डलम् जेला ; district.
मतस्यभर्जनम् माछभाजा ; fried fish.
मथुरा उत्तरप्रदेशान्तर्गता काचित् नगरी श्रीकृष्णजन्मभूमिश्च।
मधुकैटभौ महाप्रलयसलिले योगनिद्राशयानस्य विष्णोः कर्णमलोद्भूतौ द्वावसुरौ पश्चाद् विष्णुना हतौ इति पुराणवार्ता।
मनोमोहन(-मित्रः) श्रीरामकृष्णस्य गृहिशिष्याणामन्यतमः (१८५१-१९०३ खृः)
मन्दोदरी राक्षसराजरावणस्य स्त्री।
मरिचफलम् लङ्का ; pepper.
मशारिः Mosquito-net ; मशकनिवारकं जालम्।
मसी कालि ; silver-nitrate ; आलोकलेख्य-यन्त्रे या व्यवह्रियते।
मस्तुगुड़ः Intoxicating molasses.
महाकालः अनादेरनन्तस्य महादेवस्य रुद्ररूपिणो नामान्तरम्।
महाभारतम् व्यासरचितम् इतिहासप्रधानम् अन्यतममहाकाव्यम्।
महामारी Epidemic ; संक्रामकरोगादिजनित-व्यापकमृत्युः।
महाविद्यालयः College ; यस्मिन् विद्यालये उच्चतर-शिक्षा प्रदीयते।
माघोत्सवः ब्राह्मसमाजीयानां माघमासि सम्पाद्य उत्सवविशेषः।
माता जगज्जननी-देवी-महामाया इत्यर्थे प्रायशः श्रीरामकृष्णेनास्य प्रयोगः कृतः।
मातृस्वसृपतिः मेशोमहाशय ; husband of one's mother's sister.
माष्टारः Master ; 'श्रीम'-चरितं द्रष्टव्यम्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

माया Illusion ; ब्रह्मणः अघटनघटनपटीयसी शक्तिः, अविद्यारूपा सत्त्व-रजस्तमोमयी प्रकृतिः।

मिउमिउ मार्जाररवः।

मिरार् 'Indian Mirror', a periodical ; सामयिकपत्रविशेषः।

मिस्-पिगट् आमेरिकादेशजा खृष्टीययाजिका।

मुसलमानः A Muslim ; हजरतमोहम्मद-प्रवर्तितधर्मावलम्बी।

मूलाधारः A mystical circle above the organ of generation ; पायु-लिङ्ग-मध्यवर्ति द्व्यङ्गुलिपरिमितं स्थानम्।

मृदङ्गम् खोल ; a kind of drum ; वाद्ययन्त्रविशेषः।

मोहम्मदीयः मुसलमानः द्रष्टव्यः।

यतीन्द्रः कलिकातास्थ-प्रसिद्ध-ठाकुरवंशजो भूस्वामी।

यमुना उत्तरभारतीया प्रसिद्धा नदी यद्रोधसि श्रीकृष्णेनालौकिकी लीला विहिता

यशोदा श्रीकृष्णस्य पालिका माता, नन्दघोषपत्नी।

यात्राभिनयः A country theatrical performance.

यान्त्रिकप्रतिकृतिः Photograph ; यन्त्रग्राह्यमालोकचित्रम्।

यीशु(-खृष्टः) Jesus Christ ; ईश्वरावतारः, तन्नाम्ना खृष्टधर्मः प्रवर्तितः।

युधिष्ठिरः महाभारतवर्णितः प्रथमपाण्डवः, धर्मपुत्रः।

योगिनी (न्यः) दुर्गादेव्या चतुःषष्टिः सहचर्यः।

रक्षणशीलः गोँड़ा ; Conservative.

रक्तदशम् लालपेड़े, red-bordered.

राखालः राखालचन्द्र-घोषः ; अस्य सन्न्यासनाम स्वामी ब्रह्मानन्द इति ; श्रीरामकृष्णशिष्यश्चासौ। (१८६३-१९२२-खृः)

राधा वृन्दावनवासिनीषु गोपीषु श्रेष्ठा श्रीकृष्णस्य सहचरी।

राधाकान्तमन्दिरम् दक्षिणेश्वरस्थितं राधासनाथं श्रीकृष्णस्य मन्दिरम्।

राधाकुण्डः वृन्दावनस्थो जलाशयविशेषः।

राम(-चन्द्रः) रामायणनायकः, भगवदवतार इति हिन्दुजनैः पूज्यतेऽसौ।

राम (-चन्द्र-दत्तः) श्रीरामकृष्णस्य गृहिशिष्याणामन्यतमः (१८५१-१८९९ खृः)।

रामप्रसाद (-सेनः) पश्चिमवङ्गस्थ-हालिशहर-वास्तव्यः कश्चित् शक्तिसाधकः ; असौ असंख्यातानि मातृसङ्गीतानि व्यरचयत्। (१७२३-१७७५-खृः)

राममोहनरायः असौ भारतीयसंस्कारान्दोलनस्य अग्रणीरासीत्, अशेषप्राच्य-पाश्चात्त्यशास्त्रविद् ब्राह्मसमाजप्रतिष्ठापकश्च बभूव। (१७७२-१८३३ खृः)

रामलालः (चट्टोपाध्यायः) श्रीरामकृष्णदेवस्य भ्रातुष्पुत्रः ; दक्षिणेश्वरस्थितस्य कालीमन्दिरस्य पूजकश्च।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रामानन्दः श्रीचैतन्यदेवस्य भक्तः ।

रामानुजः दाक्षिणात्यस्य प्रख्यातः वैष्णवाचार्यः ; असौ विशिष्टाद्वैतवादप्रवक्ता । (१०१७-११३७ खृः)

रोटिका रुटि ; bread ; यवगोधूमनिर्मितं खाद्यम् ।

लक्ष्णौ भारतराष्ट्रान्तर्गत-'उत्तरप्रदेश'स्य राजधानी।

लक्ष्मीः धनाधिष्ठात्री देवी, हरिप्रिया।

लक्ष्यभूः चिक ; the goal of the die cast.

लङ्का भारतमहासागरान्तर्गता द्वीप-भूता काचित् नगरी, सिंहलेति नामान्तरम् ; रावणस्य राजधानीति रामायणप्रसिद्धिः।

लण्ठनम् Lantern ; प्रच्छन्न-दीपिका।

लवकुशौ श्रीरामचन्द्रस्य द्वौ पुत्रौ।

लाटुः पूर्वाश्रमे राखतुराम इति अभिहितः ; श्रीरामकृष्ण-भक्तमण्डले लाटु-रिति सादरमाकारितः। श्रीरामकृष्णस्य सन्न्यासिशिष्याणामन्यतमः स्वामी अद्भुतानन्द इति ख्यातः। तिरोधानम्—१९२० खृः।

लीला The relative phenomenal world ; sport of God ; नित्या-पेक्षं सोपाधिकं जगत् ; ईश्वरशक्तेर्विलासः।

लुचि घृतपक्व-गोधूमचूर्ण-द्रव्यविशेषः।

लेखनाधारः Table ; लिखनपठनोपयोगी उच्चकाष्ठाधारविशेषः।

वकुलतलम् दक्षिणेश्वर-कालिकायतनवर्ति स्थानमेकम्।

वङ्गभाषा बाङ्ला ; the Bengali language ; भारतीय-भाषाणाम् एकतमा प्रधानभाषा।

वङ्गाब्दः ५९३(-४)-खृष्टाब्दात् वङ्गदेशे प्रचलितोऽब्दः।

वराकः शाला ; the wretched.

वराहनगरम् कलिकाताया उत्तरतो दक्षिणेश्वराच्च दक्षिणतः स्थितं जनपदम्।

वरुणः जलानां तथा पश्चिमदिशोऽधिपतिदेवः।

वर्तिकाग्रम् सल्ते ; प्रदीपज्वलनसूत्रम्।

वर्धमानम् पश्चिमवङ्गान्तवर्ति नगरम्।

वसुः गणदेवताविशेषः, अष्टवसूनामन्यतमः गाङ्गेयश्च।

वसुपल्ली बोसपाड़ा ; उत्तरकलिकातान्तर्गता काचित् पल्ली।

वस्तुविचारः Discrimination between the real and the unreal ; सदसद्विवेचनम्।

वस्त्रपेटिका बटुया ; wallet ; क्षुद्रकोषः।

वाग्वादिनी सरस्वतीदेव्या नामान्तरम् ; वागधिष्ठात्री देवतासौ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वाटार् Water ; जलार्थबोधक इंरेजीशब्दः ।

वातवस्त्रम् पाल ; a sail ; वायु-साहाय्येन नौचालनार्थं नौकामध्यस्थ-स्थूलदण्डाबद्ध-वस्त्रखण्डविशेषः ।

वाद्यभवनम् नहबतखाना ; concert-house.

वाद्यसमारोहः नहबत ; concert.

विजयकृष्ण-गोस्वामी श्रीचैतन्य-पार्षदस्य अद्वैतगोस्वामिनो वंशजोऽयम् । नदीया-मण्डलस्थ-शान्तिपुरेऽसौ जन्म लेभे। आदौ ब्राह्मधर्मप्रचारक आसीत् ; परतो ब्राह्मसमाजं विहाय वैष्णवसाधने निमग्नोऽभूत् । श्रीरामकृष्णस्यासौ परमप्रियः आसीत् । (१२५१-१३१६-वङ्गाब्दः)

विजया दुर्गापूजाया अन्तिमदिवसः ; दशमी तिथिः ; अस्यां देवीप्रतिमाया विसर्जनं भवति ; जयोद्दिष्टा च शुभयात्रा विधीयते ।

विद्याशक्तिः Spiritual power, of divine nature, God-ward and to light ; यया शक्त्या जन ईश्वराभिमुखं गच्छन् ज्योतिषां ज्योतिरेति ।

विद्यासंसारः The environment of knowledge or discrimination.

विद्यासागरः ईश्वरचन्द्रवन्द्योपाध्याय इति ; एष तस्य उपाधिः, वङ्गदेशस्य प्रख्यातपण्डितः समाजसेवकश्च । (१८२०-१८९१ खृः)

विभीषणः रावणस्य भ्राता, रावणात्ययात् परं लङ्कायां राक्षसराजस्य पदमारूढः ; रामस्यासौ विश्वस्तो भक्तः ।

विभ्रमगोलकम् गोलकधाँधा ; Labyrinth ; अशक्यनिर्गमवेष्टनी ।

विलम् आड़ा ; bank-pit ; नद्यादितीरगतं गर्तम् ।

विविधवाद्यसमारोहकारकः रोशनचौकिओयाला ; concert-man.

विशालाक्षी श्रीदुर्गाया नामान्तरम् ।

विशिष्टाद्वैतवादः School of Qualified Non-dualism ; जीवविशिष्ट-ब्रह्मप्रतिपादनम् ; आचार्यरामानुजेन प्रवर्तितोऽयं वादः ।

विष्टरः Chair ; आसनविशेषः ।

विसूचिका Cholera ; कठिनरोगविशेषः ।

वीरसिंहः पश्चिमवङ्गीय-मेदिनीपुरमण्डलान्तर्गतः कश्चिद् ग्रामः ।

वृतिः बेड़ा ; fence ; वेष्टनी ।

वृत्तिः Regular doles ; नियमितभृतिः ।

वेदः ऋग्-यजुः-सामाथर्वाणः इति चर्तुर्धा विभक्तं प्राचीनतमम् आर्यशास्त्रम् ।

वेदान्तः षड्दर्शनानामन्यतमं व्यासप्रणीत-दर्शनम्, जीवब्रह्मस्वरूपमत्र विचारितम्

वैष्णवचरणः श्रीरामकृष्णानुरागी प्रसिद्धो वैष्णवभक्तः ।

व्यक्तिः Personal God ; उपास्यत्वादिगुणविशिष्टः ईश्वरः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्यञ्जनम् Cooked dish ; पक्वमाहार्यम् ।

व्युत्थानदशा समाधिभङ्गावस्था ।

व्रजः श्रीकृष्णस्य बाल्यलीलाभूमिरिति वर्णितो मथुरासमीपवर्ती ग्रामविशेषः ।

शङ्करा An indeterminate epithet ; कमपि जनं बोधयितुमिदमभिधानं डित्थडवित्थादिवत् ।

शङ्कराचार्यः ब्रह्मसूत्रादिभाष्यकारः, अद्वैतवेदान्तप्रवक्ता, महादार्शनिकाचार्यश्च (७८८—८२० खृः) ।

शालम् Shawl ; मूल्यवान् मेषलोमादिविनिर्मितो गात्रावरणविशेषः ।

शिखः A Sikh ; शिखधर्मावलम्बी ।

शिरोवेदना माथाव्यथा ; headache (not lit.) ; सविशेषचिन्ताहेतुत्वात् शीर्षवेदना जायते इति कृत्वा भावनाकारणार्थेन वक्रोक्त्या प्रयोगः ।

शिवनाथ-(शास्त्री) कश्चिद् ब्राह्मनेता । आदौ केशवसेनेन समाकृष्टः, पश्चान्मतविरोधे सति अन्यैः साकं साधारण-ब्राह्मसमाजं निर्मितवान्, तस्यापि सभापतिर्बभूव । केषाञ्चिद् ग्रन्थानां रचयिता । (१८४७-१९११-खृः)

शीश् Whistling.

शुकदेवः व्यासदेवस्य पुत्रः, भागवत-प्रवक्ता, परमहंसाग्रणीश्च ।

शृगालकोलिकण्टकम् सेँकुलकाँटा ; वन्य-कण्टकलताविशेषः ।

शोषकपत्रम् Blotting paper ; येन पत्रेण मसी शुष्यते ।

शौण्डिकालयः शुँड़िर दोकान ; a grog-shop ; मद्यविक्रय-विपणिः ।

श्यामकुण्डः वृन्दावनस्थो जलाशयविशेषः ।

श्यामपुकुरम् उत्तरकलिकातायाः काचित् पल्ली, कञ्चित् कालं श्रीरामकृष्णस्तत्र न्यवसत् ।

श्यामबाजारम् कलिकातानगर्या उत्तरदिग्वर्ती स्थानविशेषः ।

श्यामा an epithet of the Goddess Kāli ; कालीदेव्या नामान्तरम् ।

श्यामासुन्दरी देवी श्रीसारदादेव्या जननी ।

श्यालः शाला ; brother-in-law ; गौणवृत्त्या अधिक्षेपणार्थकः शब्दोऽयम् ।

श्रीदामः श्रीकृष्णसखः कश्चिद् गोपबालः ।

श्रीमती श्रीराधिकाया अभिधानम् ।

श्रीश्रीमाता सारदामणिदेव्या अभिधानम् ।

श्वसनम् फोँस करा ; hissing.

सः (असौ) तिनि ; often ascribed to God ; प्रसिद्धिवशात् परमेश्वरबोधनार्थम् एष प्रयोगः ।

सन्धितम् आचार ; pickle.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सन्ध्या Vespers ; प्रातर्मध्याह्न-सायाह्नेषु द्विजानुष्ठेयमुपासनम् ।

समाधिः Ecstasy, trance, communion with God ; परमात्मनि जीवात्मनो निवेशः अथवा चित्तवृत्तिनिरोधेन स्वरूपावस्थितिः ।

सरस्वती विद्याधिष्ठात्री देवी ।

संख्यानपत्रम् हिसावखाता ; a book of accounts ; आय-व्यय-गणन-पुस्तिका ।

संमार्जकः मेथर ; scavenger.

संलापप्रकोष्ठः बैठकखाना-घर ; outer sitting room, parlour.

संसक्तकरसः आठा ; sticky milk ; येन रसेन किमपि वस्त्वन्तरसक्तं भवति ।

संस्कृतमहाविद्यालयः १८२४-खृः-प्रतिष्ठापितमुत्तरकलिकातास्थमुच्चशिक्षायतनम् ।

सामाध्यायी ब्राह्मसमाजभुक्तः कश्चित् पण्डितः ।

सार्कास् Circus ; वन्यजन्तुभिः व्यायामकौशलप्रदर्शनम् ।

साहेबः European ; इउरोपनिवासी ।

सिग्रेट् Cigerette ; तमाखुजातीय-धूम्रपानविशेषः ।

सिद्धिः Hempleaf ; किञ्चित् मत्तताजनकं द्रव्यम् ।

सिधुः सिद्धेश्वरमजमदारस्य संक्षिप्तं नाम ; वराहनगरादुत्तरतः अस्य गृहम् ।

सिमुलिया मध्यकलिकातान्तर्वर्ती पल्लीविशेषः ।

सुन्दरी सुँदरी (काठ) ; वङ्गोपसागरोपकूलवर्ति-सुन्दरवनजात-वृक्षविशेषः ।

सुप्सुप् भोजनकालोत्थितशब्दस्यानुकारः ।

सुरेन्द्र (-नाथ-मित्रः) श्रीरामकृष्णस्य कश्चिद् गृहिशिष्यः । कदा कदा 'सुरेन्दर्' इति 'सुरेश' इति वा श्रीरामकृष्णेन सादरमाकारितः । (आनुमानिकः— १८५०—१८९० खृः)

सुसज्जितगृहोपमनौः बजरा ; Yacht.

सूचकम् फातना ; the float ; मत्स्यबन्धनार्थं सूत्रबद्धो भासमानः पदार्थः यः मत्स्यैराकृष्टः जले निमज्जति ।

सूत्राबद्धविशेषपत्ररचना घुड़ि ; kite ; चिल्लसदृशं क्रीड़नकम् ।

सूपः डाल ; broth, soup ; यूषम् ।

सेवासदनम् Hospital.

सौधशिरः छाद ; roof ; छदिः ।

सौरीन्द्रठाकुरः राजोपाधिकः कश्चित् भूस्वामी ।

स्खलद्वाक् तोतला ; stammerer.

स्पर्शमणिः Touchstone ; यस्य मणेः स्पर्शमात्रेण लौहादयः स्वर्णत्वमापद्यन्ते ।

स्वरूपः श्रीचैतन्यदेवस्य शिष्यः ।

हट्टः हाट ; a market ; क्रयविक्रयस्थानम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हण्डी हाँड़ि ; pot ; स्थूलोदरपात्रविशेषः।
हनुमान् रामायणवर्णितः रामचन्द्रस्य भक्तवरो वानरः।
हम्बा Lowing (of kine) ; गवामाराव-ध्वनिः।
हलधारी दक्षिणेश्वर-मन्दिरे पुरोहितोऽसौ श्रीरामकृष्णस्य पितृव्यपुत्रः।
हस्तिपकः माहुत ; the elephant-driver.
हंसपुष्करिणी हाँसपुकुर ; goose-pond ; तन्नामधेया काचित् पुष्करिणी।
हार्मोनियाम् Harmonium ; स्वरैक्यसाधको वाद्ययन्त्रविशेषः।
हिन्दुः The Hindu ; हिन्दुधर्मावलम्बी।
होमा कश्चित् वेदोक्तः पक्षी इति श्रीरामकृष्णस्योक्तिः।
हृदयः हृदयराममुखोपाध्याय इति सम्पूर्णं नाम। असौ श्रीरामकृष्णस्य भागिनेयः ; दक्षिणेश्वरमन्दिरे पूजकश्चासीत्।

Bhawan's Sri Sankaracharya Sanskrit Mahavidyalaya ★ Bharatiya Vidya
540

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शुद्धिपत्रम्

पृष्ठाङ्काः	पंक्तयः	अशुद्धपदानि	शुद्धपदानि
०.११	२०	मथुरनाथ	मथुरानाथ
०.१८	१७	समजनिषुः	समजनिषत
०.२९	—	श्रीरामकुष्णचरितम्	श्रीरामकृष्णचरितम्
०.३२	५	यूवभिश्च	युवभिश्च
०.३२	२३	सन्न्याकव्रतं	सन्न्यासव्रतं
०.३२	२४	सुगुढ़ञ्चास्ते	सुगूढ़ञ्चास्ते
०.३९	१४	स्वं	स्व
०.४०	३०	निर्देशानूसारेण	निर्देशानुसारेण
०.४२	८	श्रीरामकृष्णेन्	श्रीरामकृष्णेन
०.४३	१३	गभीरात्रावागच्छत्	गभीररात्रावागच्छत्
०.४३	२७	एकमासाधिकालं	एकमासाधिककालं
०.४३	३२	वृक्षमृले	वृक्षमूले
०.४६	२७	कियपि	कियदपि
२	३०	बृन्दा	वृन्दा
८	१४	सूपं	सुपो
४४	३१	यृज्यते	युज्यते
६४	१०	हृदयनाथेन	हृदयरामेण
७२	३१	तिष्टन्नासीत्	तिष्ठन्नासीत्
७७	२८	सम्प्रन्नम्	सम्पन्नम्
७७	३२	श्रीरासकृष्णस्तमेव	श्रीरामकृष्णस्तमेव
८०	२८	वाद्यमवनं	वाद्यभवनं
८१	२९	कामिनीकाञ्चनञ्च	कामिनी काञ्चनञ्च
८५	५	अलावुवीजानि	अलाबुबीजानि
९०	२८	एवानुराग	एवानुरागश्च
१०२	१७	पुर्णज्ञानस्य	पूर्णज्ञानस्य
१०४	१५	देवा	देव ।
१०८	७	दर्शणात्	दर्शनात्
११०	२४	स्वल्पेनपि	स्वल्पेनापि
१२८	२	परीणीय	परिणीय
१२८	२०	साघनेन	साधनेन

Bhawan's Sri Aurobindo Mahavidyalaya

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.